शास्त्रमुक्तावली—१९

श्रीगीतार्थसङ्ग्रहदीपिका ।

श्रीमद्यतिवरावरावतारभूत
श्रीवरवर मुनिवर्य विरचिता - भगवद्गीताव्याख्या ,

श्रीकांचीप्रतिवादिभयंकरानन्ताचार्येण

परिशोधिता,

श्रीसुदर्शनमुद्राक्षरशालायां समुद्रित ।

॥ श्रीकांची ॥

१९०६

इदानीमेतन्मूल्यम् रू. २-२-०

श्रीरस्तु ।

॥ भूमिका ॥

अस्य गीतार्थसंग्रहदीपिकाख्यस्य भगवद्गीताव्याख्यानस्यानुग्रहीतार श्री वरवरमुनिवर्या श्रीवैष्णवसम्प्रदायावलम्बिषु दक्षिण कळाचार्य संज्ञाना मप्रधानतमा आचार्यवर्याः ।

गुरुवर्योऽयं ताम्रपर्णीतीरे कुरुकापुर्यां श्रीशठारिदिव्यधाम्नि श्रीमल्लोकाचार्यचरणसमाश्रितस्य गोमठान्वयवंशमुक्ताफलस्य दीप्तशयानाख्यस्य गुरुवर्यस्य तनयतया वातरत् ।

आचार्योऽयं ४४७१ वर्षेषु कलेर्यातेषु ४४७२ तमे कल्यादिवर्षे, १२९३ तमे शालीवाहनशकाब्दे (A. D. 1370) साधारणनामनि संवत्सरे तुलामासे शुक्लचतुर्थ्यां मूलनक्षत्रे वतीर्णोभूत ।

अस्याय मवतारकालप्रतिपादकः श्लोकः पठ्यते –

" पाथोभावाद्गतायां कलियुगशरदि श्रद्धराये शकाब्दे वर्षे साधारणाख्ये समधिगततुळे वासरे तीरसंख्ये । वारेजीवे चतुर्थ्यां समजनिच तिथौ शुक्लपक्षे सुकर्मा श्राजन्मूलाख्य तारे यतिपति रपरो रम्यजामातृनामा ॥ "

यथाविधि काले जातकर्मादिभि स्संस्कृतो भिरामवराधीश इति कृत नामधेयोयं मातुलगृहे शिक्किल्कडारनाम्नि अग्रहारे बाल्य मत्यवाहयत । साङ्गोपाङ्गांश्च वेदानधीत्य कृतसमावर्तनो गार्हस्थ्यं पित्रा प्रवेशितः स्साम्प्रदायिकांश्च रहस्यादिग्रन्थान् पितु स्सकाशा देवागृह्णात् ।

अथ पितरि परमपदं गते यथाविधि निर्वर्तिततदीयपैतृमेधिक कृत्यो मातुलगृहाज्जन्मभूमिं कुरुकापुरीमागत्य तत्रैव निवसन्, तदानीं तत्र श्रीवैष्णवसम्प्रदायाचार्यपदवीं निर्वहन्त मप्रतिमवैभवं ज्ञान

वैराग्यशेवधिं श्रीशठारियतिराजचरणपरिचर्यैकनिरतं श्रीशठकोपदिव्यसूक्तिसुधापानैकरतान्तरंगं श्रीशैलनाथं गुरु माश्रित्य तदेकदैवत स्तस्मादेव द्राविडप्रबन्धार्थान् शृण्वन् तत्प्रदर्शिते श्रीरामानुजचरणकमले एवोपायत्वेनोपयेत्वेनचाध्यवस्यं श्चिरमवात्सीत् । तदैवचास्य कश्चित्तनयोऽप्यजायत, यो गुरोश्श्रीशैलनाथस्या ज्ञया रामानुज इति विहितनामधेयो भूत् ।

श्रीशैलनाथोगुरुश्च चिरं श्रीरामानुजदर्शनं निरूह्य प्रातिस्विक दिव्यालयनिर्माणादिनाच श्रीरामानुजचरणकैङ्कर्यं बहुमुखं निर्वर्त्य नित्यविभूतिं मलश्चिकीर्षूरुगणशय्यामधिशयानः, पार्श्वस्थैश्शिष्यैश्च मुखवैवर्ण्य मभिवीक्ष्य शङ्कमानैस्तन्निदानजिज्ञासया विज्ञापितः "कालेऽत्रकलौ दिव्यसूरिश्रीसूक्तिषु निबद्धरुचिर्विश्वासः कोनाम दिव्यप्रबन्धान्प्रचारयिष्यती' ति क्लेशोमे मनसी' ति प्रत्युत्तरयन्, 'अयमसौ यथादेशं करिष्यती' ति अभिरामवरगुरुणा सप्रणामं विज्ञापितः, "नालमेतावतोक्तिमात्रेणे" ति पुनरुक्त्वा, पुनरप्यभिरामवरेण चरणस्पर्शपूर्वकं "एवमेतत्करिष्यामी" ति प्रतिज्ञाते तुष्यन्, अभिरामवरं गुरुं समीपे समाहूय "संस्कृतशास्त्रेष्वधिकं दृष्टिमनिक्षिप्य एकदा श्रीभाष्यंश्रुत्वा, श्रीरामानुजस्य मुनेर्ममचाभिमतं श्रीमुखसूक्तमभृतिदिव्यसूरिप्रबन्धपरिशीलनं सदा कुर्वन्, पूर्वाचार्यवद्भगवन्मङ्गलाशासनपर श्श्रीरंगे नित्यं सुखमास्वे" त्याज्ञाप्य, अन्येभ्यश्च शिष्येभ्योभिरामवरंगुरुं प्रदर्श्यास्मिन्नवतारविशेषबुद्धिं बध्नन्तस्सादरं तिष्ठतेत्युपदिश्य, कृतकृत्यो निर्भरस्स्वाचार्यचरणकमले समनुध्यायन् श्रीवैकुण्ठमभजत् ।

अथ गुरुरयं सहसब्रह्मचारिभिर्गुरोश्श्रीशैलनाथस्य ब्रह्ममेधं यथाविधि निर्वर्त्य तदाज्ञामनुपालयन् द्राविडप्रबन्धरहस्यग्रन्थादीनि विशेषतोनुशीलयन्नवस तत्रैव कंचित्कालम् । तदात्वेच सुन्दरवरदविष्वक्सेनगुरुप्रभृतयो बहव एनमाशिश्रयन् ।

गतेकतिपयेकाळे श्रीरंगनाथं सिषेविषुः कुरुकापुरीतः प्रस्थाय गतिक्रमेण श्रीरङ्गनगरंप्राप्य श्रीरङ्गनाथं संसेव्य तदाज्ञया तत्रैव च रहस्यग्रन्थान् जीर्णान् पुनरुज्जीवयन् कञ्चन काळमनयत। अथतत श्श्रीश्रीनिवासदर्शनेच्छया श्रीवेङ्कटाद्रिंगत्वा प्रतिनिवर्तमानः कांच्यां दयानिधिं देवाधिराजं संसेव्य भूतपुरींगत श्श्रीरामानुजं प्रणम्य तदाज्ञया पुनः कांचीमागत्य घटाम्बुवंशसंभवस्य कृष्णगुरो रन्तिके श्रीभाष्यमधीत्य श्रीरंगं प्रतिनिवृत्तोभुत।

एकदाच कुरुकापुरीत स्समागतैः केश्चिदाशौचे कस्मिंश्चिन्निवेदिते, तेन श्रीरंगनाथस्य सेवायां प्रतिबद्धायां निर्विद्यमान स्संसार सम्बन्धस्य सर्वधा भगवत्कैङ्कर्य विरोधिता मनुसन्दधान स्सर्वसङ्ग परित्यागपूर्वकं तदैव सन्न्यासमास्थितोभूत्।

इत्थं तुरीयमाश्रमं प्रविश्य भगवत्कैङ्कर्यैकनिरतस्तदीयमङ्गळाशासनपरश्श्रीरंगनाथस्य नित्यनैमित्तिकसमाराधनादीनि यथाविधि काळेषु कैङ्कर्यपरैः कारयन् द्राविडप्रपन्धतद्व्याख्यानलोकाचार्यानुगृहीतरहस्यग्रन्थादीन् शिष्येभ्यउपदिशन् नानाविधांश्च ग्रन्थान्निर्माया ष्टदिग्गसंज्ञांस्सिंहासनाधिपतीन्प्रतिष्ठाप्य त्रिसप्तति संवत्सरान्भूमण्डल मलंकृत्य ततः परम्पदमलमकरोत।

अस्यच गुरोश्चरणयुगळमाश्रिता बहवआचार्याः। तेषुप्रधाना अष्टदिग्गजसंज्ञा अष्टौ आचार्याः। तेषु त्रयस्सन्न्यासिनः पंचगृहस्थाः। वानाद्रियोगी, भट्टनाथमुनिः, श्रीनिवासयतिः, इतित्रयसन्न्यासिनः। प्रतिवादिभयङ्करगुरुः, देवराजगुरुः, वाधूलवरदनारायणगुरुः, रामानुज गुरुः, तत्सुतगुरुः, इतिपञ्चगृहस्थाः।

श्रीशठकोपदिव्यसूक्तिभुत श्रीसहस्रगीतिव्याख्यायां श्रीकृष्ण पादगुरुविरचितायां षट्त्रिंशत्साहस्र्यामस्य गुरोरप्रतिमं प्रावीण्य मभवत्। षट्त्रिंशत्साहस्रीस्रावक इत्येवास्य नाम जगति प्रथित

मासीव । एकदास्य वैभवं प्रकटीचिकीर्षुर्भगवान् श्रीरंगनाथ स्स्वास्थानमण्टपे प्रतिदिनं षट्त्रिंशत्साहस्री मुपन्यसितु मेनमाज्ञाप्य, तस्मिन्नुपन्यस्यति स्वयंच सपरिवारस्तत्र सन्निहित स्समाकर्ण्य न्ते बालकवेषेण स्वयमेव "श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् । यतीन्द्रप्रवणंवन्दे रम्यजामातरंमुनिम् " इत्येतद्विषकंपद्यं प्रकट यन्, ततःप्रभृतिदिव्यप्रबन्धपाठस्यारम्भे समाप्तौ च पद्यस्यास्यानु सन्धानं सर्वैरपि कर्तव्यमित्याज्ञापयामास । इत्येवं गुरोरस्यचरितं प्रतिपादयत्सु ग्रन्थेषु वर्ण्यते ।

गुरुरयं नित्यसूरिषु प्रधानतमस्यादिशेषस्यावतारभूत इति चरिते प्रतिपाद्यते । जीवनकालेचानेन स्वीयाशेषांशता स्फुटमेव प्राकाश्यत बहुधेति च तत्रैवस्फुटम् ।

" शेषश्श्रीमानजनि सपुन स्सौम्यजामातृयोगी
भोगीन्द्रोथ स्तदनु महितो राघवस्यानुजोभुव ।
भूत्वाभूयो वरवरमुनिर्भूयसा भासमानो
रक्षत्यस्मान् रघुकुलपते राश्रितो भद्रपीठम् ॥ "

इत्यस्य शेषावतारताप्रतिपादकः प्राचीनश्लोकः ।

गुरुरयं श्रीवैष्णवसम्प्रदायावलम्बिषु दक्षिणकलाचार्याणां गुरु परम्परायां लक्ष्मीपतिमारभ्याष्टादश आचार्याः ।

अथ मन्त्र परम्पराक्रमः-

(१) लक्ष्मीनाथः ।
(२) श्रीः ।
(३) विष्वक्सेनः ।
(४) शठकोपः ।
(५) नाथमुनिः ।
(६) पुण्डरीकाक्षः ।

(७) राममिश्रः ।
(८) यामुनाचार्यः ।
(९) महापूर्णः ।
(१०) श्रीमान् रामानुजमुनिः ।
(११) गोविन्दाचार्यः ।
(१२) पराशरभट्टारकः ।
(१३) वेदान्तिसूरिः ।
(१४) कलिवैरी ।
(१५) श्रीकृष्णपादगुरुः ।
(१६) लोकाचार्यः ।
(१७) श्रीशैलनाथः ।
(१८) वरवरमुनिः ।

इति ।

आचार्यवर्येणानेन प्रणीताग्रन्थाश्च - (१) श्रीवचनभूषणव्याख्यानं, (२) रहस्यत्रयव्याख्यानं, (३) तत्त्वत्रयव्याख्यानं, (४) आर्तिप्रबन्धः, (५) उपदेशरत्नमाला, (६) श्रीमुखसूक्तशतान्तादिः [तिरुवाय्मोழி नूற்றन्तादि] (७) यतिराजविंशतिः, (८)भगवदाराधनविधिः, (९) गीतार्थ-संग्रहदीपिका, (१०) श्रीविष्णुचित्तश्रीसूक्त (पेरियाழ்वारतिरुमोழி) व्याख्यानं, (११) श्रीरामानुजशतान्तादि (नூற்றन्तादि) टीका, (१२) षट्त्रिंशत्साहस्री प्रमाणसंग्रहः, (१३) ज्ञानसारव्याख्यानम्, (१४) प्रमेयसार व्याख्यानम्, (१५) सप्तगाथाव्याख्यानम्, (१६) आचार्यहृदयव्याख्यानम्, इत्यादयः । एषु " यति-राजविंशतिं ' 'गीतार्थसंग्रहदीपिकां ' प्रमाणसंग्रहग्रन्थांश्च विनान्ये सर्वेपि ग्रन्था ससंस्कृतमिश्र द्राविडभाषामयाः । ' उपदेशरत्नमाला ' ' श्रीमुखसूक्तशतान्तादिः ' इत्येतौ पुनर्द्राविडगाथारूपौ ।

अत्र केचिदर्वाचीना गीतार्थसंग्रहदीपिकाख्यस्यास्य भगवद्गीता याख्यानस्य श्रीवरवरमुनिप्रणीततां नानुमन्यन्ते । न केवलमुत्तरकळ

चार्य विभागप्रविष्टाः, दक्षिणकलाचार्यविभागान्तर्गता अपि केचि त्तथा विधा दृश्यन्ते; परन्तु नवयं तथाविधसन्देहगन्धस्यापि कारण मुपश्यामः । येपिनामाक्षिपन्ति, तेषामप्येतावतास्य ग्रन्थस्य तदीयदृष्ट्य गोचरत्वं, आचार्यस्यास्य संस्कृतसन्नयासप्रवाद इत्यादिकमेवा क्षेपस्य मूलमितिजानीमः । तत्रेदंविचारणीयं, किमेतस्य ग्रन्थस्य श्रीवरवरमुन्य प्रणीततानिर्णये पर्याप्तं कारणमस्ति नवेति ?

पूर्वपक्षिभिरेतैरेतावतास्य ग्रन्थस्या श्रुतदृष्टत्वंतु नपर्याप्तं निदानम्, सर्वैस्सर्वेषामपि ग्रन्थानां श्रवणदर्शनयो रसम्भावितत्वात, कैश्चिदश्रुत दृष्टत्वस्येव कैश्चिद्दृष्टश्रुतत्वस्यापि विद्यमानत्वात् ।

आचार्यवर्याणामेषां संस्कृतसन्नयासग्रहण प्रवादश्च नास्यग्रन्थस्य तत्प्रणीततानिर्णये विरोधी, एतदीयचरित्रप्रतिपादकेषु यतीन्द्रप्रवण प्रभावादिषु संस्कृतसन्नयासग्रहणवृत्तान्ता दर्शनात, संस्कृतग्रन्थे ष्वधिकदृष्टयनिक्षेपस्य द्राविडप्रबन्धतद्व्याख्यानादिप्रवचनेष्वेवाधिक श्रद्धानिक्षेपस्य चैवाचार्याज्ञया प्रतिज्ञातत्वावगमात् । तस्याश्च प्रतिज्ञाया स्वसंस्कृतशब्दोच्चारणसामान्यविरोधित्वे भगवद्दर्शनादि कालेषु पूर्वाचार्यप्रणीतस्तोत्राद्यनुसन्धानादेरप्यभावप्रसङ्गात; तस्यचै तदीयचरित्रग्रन्थविरुद्धत्वात ; प्रत्यहकर्तव्यसन्ध्यावन्दनाद्यनुष्ठानप्रसं- गाच्च । संस्कृतसन्नयासग्रहणस्यै तदीयचरित्रग्रन्थाप्रतिपन्नस्यै तत्कृतत्वा भ्युपगमेपि यतिराजविंशतिग्रन्थस्येवास्यापि तत्सन्नयासग्रहणपूर्व कालप्रणीतत्वांगीकारसम्भवात, वस्तुगत्यापि तदैवास्यावतीर्णत्वाच्च ।

संस्कृतभाषाया मेषामत्यन्तासामर्थ्यवर्णनंचा त्यन्तासंगतम्, यतिराजविंशतिग्रन्थस्यैकस्यैवैतदीयसरससरळसंस्कृतकविता निदर्शने पर्याप्तत्वात । 'तत्वत्रयव्याख्यान' षट्त्रिंशत्साहस्री प्रमाण संग्रहा' दिष्वस्य गुरोरप्रतिमस्य वैदुष्यस्य स्फुटमवगमाच्च ।

यत्पुनरस्य ग्रन्थस्यारम्भे एतदीयप्रसिद्धाचार्यवर्यात श्रीशैलनाथ गुरोरन्यस्य गोविन्दाचार्यस्य मंगळश्लोके निबन्धनं; तदप्यस्य ग्रन्थस्य

तत्प्रणीततायां न विरोधि, एतद्ग्रन्थावतारसमये गुरोरस्य श्रीशैल नाथगुरुसमाश्रितत्वाभावस्य सम्भावितत्वेना दोषात् । वरवरमुनेरस्य प्रथमं स्वतातपादचरणसमाश्रितत्वं पश्चादेवच तेषां निर्याणाच्छ्री शैलनाथगुरुसमाश्रयणं च तदीय चरितवेदिनां स्पष्टम् । श्रीशैलनाथगुरु चरणसंश्रयणानन्तरमपि स्वपूर्वाचार्यविषये मंगळाचरणंच नानुक्तम् ।

अथास्तु गुरोरस्य श्रीशैलनाथगुरुसंश्रयणात्पूर्वं स्वतातपाद दीप्रशयानगुरुचरणसंश्रितत्वं, अस्तुच तद्विषयकमङ्गळाचरणस्य युक्तत्वं, तावता श्रीगोविन्दाचार्यनाम्नः कस्यचन गुरोर्मङ्गळश्लोके निबन्धनं कथमुपपद्यतामितिचेत् ? श्रीवरवरमुनितातपादानां दीप्रशयान गुरूणामेव गोविन्दाचार्यसंज्ञत्वोपगमेन नकिमप्यनुपपन्नं नाम । दीप्र शयानगुरो गोविन्दाचार्यसंज्ञत्वे किम्प्रमाणमितिचेत् ? तदभावेवा किम्प्रमाणम् ? सम्प्रदायपरम्परया गुरोस्तस्य गोविन्दाचार्यनामधेयत्व प्रसिद्धिश्च प्रबलं प्रमाणं जागर्ति । 'दीप्रशयान' इति 'श्रीजिह्वाव-दधीश' इतिच नामद्वयं प्रसिद्धम् । तदेतदुभयमपि गुणप्रयुक्तं न नामकरणकाले पित्रा विहितं, किन्तु पश्चात्तदीय गुणगणानुगुणं तात्कालिकैराचार्यैस्सङ्केतितम् । प्रायोहि गुणकृतन्नाम न नाम करण कालिकं भवति, किन्तुपश्चादेवेति सर्वाभ्युपगतम् । इत्थं चास्य दीप्रशयानस्य गुरोर्नामकरणसंस्कारकाले तत्पित्रा कृतेन केन चिच्छर्मान्तेन नाम्नावश्यम्भाव्यम् । तच्च 'गोविन्दशर्मे' त्येवेत्य भ्युपगमे कोवा दोषः प्रसज्येत बलवान् । तस्माद्वरवरमुनिना गीतार्थ संग्रहदीपिकारम्भे स्वस्य पितरमाचार्यञ्च श्रीगोविन्दगुरुमधिकृत्य मङ्गळ मारचितमिति निश्चीयतइति नकोपि दोषः ।

यत्पुनरत्र केचिदाहुः - "वरवरमुनिवरस्य स्वजनक सन्निधौ कतिपयांश ग्रहणस्याभ्युपगमे श्रीशैलनाथगुरुसमाश्रयणात्पूर्वं गीता व्याख्याया अस्याः करणाभ्युपगमेच रहस्यत्रयग्रहणस्य गीताभाष्य ग्रहणस्य चाभ्युपगमोऽवश्यम्भावीति जगति निखिलैरपि दक्षिणकळा

विभागस्थे रहस्यत्रयपरम्परायामपि वरवरमुनीन्द्रात्परं श्रीशैलनाथानु सन्धानं कथमुपपद्यताम्, गुरुपरम्परायां कस्यापि परित्यागोऽपूर्वस्य निवेशश्च दोषएवेति नूनं बलवानाक्षेपोभवति ।" इति ।

तत्रवदामः । प्रथममेकं गुरुमाश्रितस्य ततोगृहीतसकलार्थस्यापि ज्ञानविशेषलुब्धस्य मधुकरवृत्तिमवलम्बमानस्य पश्चात् ज्ञानानुष्ठान विशेषशालिगुर्वन्तरसमाश्रयणं शास्त्रानुमतं सम्प्रदायसिद्धंच । अतएव भगवद्भाष्यकारावतारानन्तरं ततःपूर्वं गुर्वन्तराश्रितानां सर्वेषामेव सतां प्रायस्तदीयचरणसंश्रयणमितिहासेषु प्रतिपाद्यते । तत्र ज्ञानविशेषलोभेन गुर्वन्तरमाश्रितस्य पुरुषस्य प्राक्तनाचार्य सन्निधौ गृहीतानामप्यर्थानां पुनःपश्चात्तनाचार्यसन्निधौ शृङ्खलाया अविच्छेदाय ग्रहणंच साम्प्रदायिकम् । एतादृशानांच पूर्वोत्तरोभय गुरुमन्त्रानुसन्धानं प्राप्तम् । दृश्यतेच तथैवानुष्ठानं प्राचामाचार्या णाम् । परमिदं गुरुद्वयमन्त्रानुसन्धानं तत्तत्पुरुषविशेषमात्रविश्रान्तं, नतु शिष्यपरम्परायामनुवर्तते ।

भगवद्रामानुजमुने श्रीवैष्णवसम्प्रदायाचार्यसिंहासनास्थानात्पूर्वं यथारुचि तत्तदाचार्यचरणसमाश्रितानां ततएव गृहीत सकलार्था नामपि बहूनामाचार्याणां पुनरपि भगवद्रामानुजमुनिसंश्रयणं तत एव सकलार्थानां ग्रहणंच प्रसिद्धम् । तथाविधानामप्याचार्याणां शिष्य पुत्रसन्ततौ कुत्रापि वा श्रीमद्यामुनमुनिमहापूर्णरामानुजमुन्यादि घटितगुरुमन्त्रावळीं विनान्यस्याः कस्या अप्यनुसन्धानं नश्रुतदृष्ट चरम् । तेनेदमवगम्यते – यदेकस्य गुरुद्वयसत्त्वेपि पश्चात्तनस्य श्रीवैष्णवसम्प्रदायनिर्वाहकस्य गुरोरेव मन्त्र श्रीवैष्णवगुरुमन्त्रावळी मध्ये सम्मेळ्यते नान्यस्येति नियमोनुवर्तते काश्चिदिति । प्राक्तनस्यापि गुरोर्येनकेनापि प्रकारेण सम्प्रदायोपकारकत्वेतु कामं तस्यापिमन्त्रो नुसन्धीयत एव पार्थक्येन। अतएव कैश्चाद्यापि कूरेशस्य गुरुपरम्परायां मघटकस्याप्युपकारातिशयस्मरणेनमन्त्रोनुसन्धीयमानो दृश्यते ।

श्रीरामानुजपदच्छायाभूतस्य गोविन्दगुरो श्रीमद्रामानुजमुन्या श्रयणात्पूर्वं श्रीशैलपूर्णार्याश्रितत्वस्य प्रसिद्धत्वेपि सर्वैरपि श्रीवैष्णवै रेकरूपेण गोविन्दगुरोः परं श्रीरामानुजोमुनि रेवानुसन्धीयते, नतु श्रीशैलपूर्णः। इदमेकमेवालं पूर्वोक्तस्य सांप्रदायिकस्य नियमस्य प्रधानं प्रदर्शकम्।

इत्थमेवच वरवरमुनेश्श्रीशैलनाथसमाश्रयणात्पूर्वं स्वतातपाद चरण संश्रितत्वेपि ततएव गृहीतरहस्यार्थत्वेपिच पश्चाच्छ्रीशैलनाथ गुरुसंश्रयणेन रहस्यत्रयपरम्परायामपि वरवरमुनेः परं श्रीशैल नाथस्यैवानुसन्धानं, दीप्रशयानगुरो र्मध्ये पृथगनुसन्धानंच न्यायप्राप्तं सम्प्रदायपरम्परयानुवर्तत इति नकोपि दोषस्य लेशोऽस्ति।

"लोकगुरुं गुरुभिस्सहपूर्वैः
कूरकुलोत्तमदाससुदारम्।
श्रीनगपत्यभिरामवरेशौ
दीप्रशयानगुरुंच भजेहम्।"

इति स्वयं श्रीवरवरमुनिभी रहस्यत्रयपरंपरानुसमधायि। पश्चात्प्रतिवादिभयङ्कर गुरुणा 'दीप्रशयं वरयोगिनमीडे' इति तुरीयचरणे मन्त्रेस्मिन् ऊहोकारीति संप्रदायः।

अथैवं महता प्रयासेन गीतार्थसंग्रहदीपिकाया अस्या वरवरमुनिवर्य प्रणीतत्वव्यवस्थापने, अस्यग्रन्थस्य तदीयचरितप्रतिपादक ग्रन्थेषु तद्दत्तगृहीतग्रन्थपरिगणनसमये ऽपरिगणनं कथमुपमद्यत इतिचेत्? अपरिगणस्यैवासिद्धत्वात्कानाम तत्रोपपत्तिर्वक्तव्या! बहुषुग्रन्थेषु वरवरमुनेः गीताव्याख्यानप्रणयनंहि वर्ण्यतएव स्पष्टम्।

"यतीन्द्रप्रवणप्रभाव" नामको गुरोरस्य चारित्रग्रन्थस्संक्षेप विस्तराभ्यां बहुविधोवर्तते। प्राचीनताळपत्र मयपुस्तकेष्वेतत्प्र

णीतग्रन्थपरिगणनावसरे भगवद्गीताव्याख्यानस्यापि परिगणनं तत्र दृश्यत एव। तथाच तत्रत्योयं ग्रन्थः-

" इप्पडि सर्वलोकोज्जीवनार्थमाह अवतरित्तरुळिन जीयर् अखिल जनजीवातुवान पिळ्ळैलोकाचार्यर् दिव्यसूक्तिहळान तत्त्वरहस्यत्रयङ्गळुक्कु व्याख्यानम् शेय्दरुळि अशेषार्थप्रतिपादकमुमाय् अर्थ-कामनिराकरण चतुरमान श्रीवचनभूषणत्तुक्कु " मेच्चुवियाक्कियै" एन्रु विशेषज्ञरादरिक्कुम्बडि व्याख्यानम्शेय्दरुळि, "श्रीवचनभूषणमान देवक्कुळिहेपेत्तोम्, पारुळकैःपोन्नुलकर् पार्क्कप्पेत्तोम्, तेरिलेमक्कोप्पारिनियारुळहाशिरियनरुळ् तप्पामलेयादियपिन् एन्रु इदिन् वैभवत्ते तामनुसन्धित्तु प्पोरप्रीतरायरुळिनारिरे। अनन्तरं श्री-वचनभूषणत्तुक्कडियाय् चरमपर्वनिष्ठाक्रमङ्गळैयुडैयप्पेशुमनूत्तन्दादिक्कुम् ज्ञानसारप्रमेयसारङ्गळुक्कुम् व्याख्यानम् शेय्दरुळि, तत्त्वरहस्यत्रयङ्गळुक्कुम् ईट्टुक्कुम् प्रमाणत्तेरट्टुसंग्रहित्तरुळियुम्, गीतैक्कुम् तात्पर्यदीपमेन्रोरु व्याख्यानमिट्टरुळि, उडैयवर् नित्यम् तिरुवाराधनक्रमत्तैयुम् सुग्रहमाहवुम् सुव्यक्तमाहवुम् सर्वात्मोज्जीवनार्थमाहच्चेय्दरुळिनारिरे। "　इति।

यद्यपि " तात्पर्यदीपः " ' तात्पर्यदीपिका ' ' तात्पर्यसंग्रह ' इत्यादीनि भिन्नभिन्नानि नामानि भिन्नभिन्नेषु पुस्तकेषु दृश्यन्ते, अथापि वरवरमुनिवरप्रणीतस्य कस्यचिद्गीताव्याख्यानस्य सद्भावे तेषाम्प्रमाणभावोऽप्रतिहतः।

महीसारपुरवासिना श्रीवीरराघवगुरुणा प्रणीते ' विंशत्प्रश्नोत्तरं ' नाम्नि ग्रन्थेद्वितीयप्रश्नोत्तरेपि गीताव्याख्यानस्य परिगणनमस्ति। तत्रत्यश्चायं ग्रन्थः -

" इवर्शेय्दरुळियप्रबन्धङ्गळ् - श्रीवचनभूषणव्याख्यानमुम् आर्त्तियुम्, उपदेशरत्नमालैयुम्, तिरुवाय्मोऴिनूत्तन्दादियुम्, यतिराज

विंशतियुम्, मुमुक्षुप्पडिव्याख्यानमुम्, तत्वत्रयत्तिक्कुव्याख्यानमुम्, तिरुवाराधनक्रममुम्, गीतातात्पर्यदीपमुम्, पेरियाऴ्वार्तिरुमोऴिक्कु व्याख्यानमुम्, नूत्तन्दादियुरैयुम्, मुप्पत्तारायिरप्पडिक्कु प्रमाणत्तिरट्टुम्, ज्ञानसारव्याख्यानमुम्, प्रमेयसारव्याख्यानमुम्, सप्तगाथाव्याख्यानमुम् । इन्नुमुण्डाहिल् कण्डु कोळ्वद्दु ।" इति ।

तेनैव श्रीवीरराघवगुरुणा प्रणीते 'प्राचीनाचारप्रकाश' (पऴ नडैविळक्कम्) नाम्नि प्रबन्धेच ग्रन्थस्यास्य नामोदाहृतं दृश्यते । अयंच तत्रत्योग्रन्थः –

"इनिक्कोयिल्वृत्तान्तम् - पिन्बुपेरियजीयरुम् पेरियपेरुमाळाले मिहवुमादरिक्कप्पट्टु लोकाचार्यरुळिच्चेय्दरहस्यङ्गळुक्कुव्याख्यानङ्गळुम्, मत्तुमनेकग्रन्थङ्गळुम्, शेय्दरुळिनार्; अवैयावन - रहस्यव्याख्यानम्, तत्वत्रयव्याख्यानम्, श्रीवचनभूषणव्याख्यानम्, आचार्यहृदयव्याख्यानम्, पेरियाऴ्वार्तिरुवाय्मोऴिव्याख्यानम्, नूत्तन्दादियुरै, ज्ञानसारव्याख्यानम्, प्रमेयसारव्याख्यानम्, एऴुपाट्टुव्याख्यानम्, गीतैक्कुत्तात्पर्यदीपम्, तत्वत्रयत्तिर्कुप्रमाणत्तिरट्टु, उपदेशरत्नमालै, तिरुवाय्मोऴिनूत्तन्दादि, यतिराजविंशति, तनिक्कविहळुम् विट्टुदिश्लोकङ्गळुम्, इयल्चात्तु, आर्त्ति प्रबन्धम् । इन्नुमिप्पडिकण्डुकोळ्वद्दु ।" इति ।

एवमन्यत्रापि ग्रन्थस्यास्य नामोत्कीर्तनं बहुळंद्रष्टव्यम् । एवंच व्याख्यानस्यास्य श्रीवरवरमुनिप्रणीतत्वे न कोपिसंशयस्यावकाशलेशोपीतिसिद्धम् ।

ग्रन्थस्यास्य ताळपत्रलिखितमेकमेव प्राचीनतममांध्राक्षरमयं पुस्तकमवलम्ब्य शोधनं प्रकारि । मूलपुस्तकस्य प्रायश्शुद्धत्वादस्म दनवधानादिप्रयुक्तान् दोषान्विनान्येषां दोषाणां विशेषतस्सम्भावना नास्ति । यच्च सम्भावयन्ते तेषांच्च विषये पाठकमहाभागानां गुणग्रा हितैव शरणम् ।

इति ।

प्रतिवादिभयङ्करानन्ताचार्यः ।

सम्पादकः ।

श्रीरस्तु ।

श्री हयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

श्रीमते रामानुजाय नमः ।

श्री वरवरमुनये नमः ।

श्रीम द्यतिवरपुनरवतारभूत श्री वरवरमुनि विरचिता–

श्री–गीतार्थसंग्रह दीपिका ।

स जयति गोविन्दार्य श्शमदमकरुणादि सद्गुणैकनिधिः ।
यस्या ह मत्र जन्मनि चरणौ संश्रित्य लब्धसत्ताकः ॥
सौम्योपयन्तृनामा सूरि र्जिज्ञासु बालबोधकरीम् ।
कुर्वे गीताविवृतिं श्रीमद्यतिराजदर्शितेन पथा ॥

श्रियः पति रखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणा नन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशय ज्ञानशक्त्याद्यसंख्येय कल्याणगुणगण महोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्य दिव्याद्भुतनिरतिशय सौन्दर्यसौकुमार्या द्यनन्तकल्याणगुणनिधिदिव्यरूपः, दिव्यास्त्रभूषणोज्वलः, नित्यसूरिभि रनवरत मभिष्टूयमानचरणयुगळः, परमव्योमनिलयः, सकलजगदुदयविभवलयलीलः, परं ब्रह्म, पुरुषोत्तमो नारायणः - ब्रह्मादिस्थावरान्त मखिलं जगत्सृष्ट्वा, स्वेनैव रूपेणा वस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानार्चनाद्यगोचरो भवेय मित्यपारकारुण्यादिगुणगणमहोदधितया स्वकीयमेव रूप मजहत्स्वभावं देवमनुष्यादिसजातीयसंस्थानं कुर्वन्, तेषु तेषु लोके ष्ववतीर्यावतीर्य तैस्तै राराधित, स्तत्तदिच्छानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतरणव्याजेना स्मदादीनामपि समा-

श्री भगवद्गीता ।

धृतराष्ट्रउवाच ।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवा श्चैव किमकुर्वत संजय ॥ १ ॥

श्रयणीयो बुभूषुः, " ततोखिलजगत्पद्मबोधाया च्युतभानुना । देवकी पूर्वसंध्याया माविर्भूतं महात्मना ॥ " इत्युक्तरीत्या देवकीतनयतयोर्व्या मवतीर्य सकल मनुज नयन विषयतांगतः, कुरुपाण्डवानां युद्धे प्रारब्धे स्वाश्रितवात्सल्यादि वशतया पार्थं रथिन मात्मानंच सारथिं सर्वलोकसाक्षिकं कुर्वन्, भूभारावतरणोपयोगि पाण्डुतनय युद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षण मोक्षसाधनतया वेदान्तोदितं स्वविषयज्ञानकर्मानुगृहीतं भक्तियोग मवतारयामास ।

इममर्थं जानन्नपि सर्वात्मनान्धो धृतराष्ट्रः सुयोधनविजय बुभुत्सया सञ्जयं पप्रच्छ (धर्मक्षेत्रइति) .

इयं गीता सप्तशतश्लोकात्मिका, तत्र धृतराष्ट्रप्रश्नश्लोकान् सञ्जयप्रतिवचन श्लोकान् अर्जुनप्रश्नश्लोकान् दुर्योधनप्रश्नश्लोकांश्च विना ऽन्ये सर्वेपि साक्षा द्भगवन्मुखारविन्द निर्गळिताः । तदुक्तं गीतामाहात्म्ये - " गीता स्सुगीताः कर्तव्याः किमन्यै श्शास्त्रविस्तरैः । याः स्वयं पद्मनाभस्य मुखपद्मा द्विनिः सृताः ॥ " इत्यादि ।

धर्मक्षेत्रे - धर्मानुष्ठानोपयोगिविशिष्ट भूभागे। कुरुर्नाम पाण्डव धार्तराष्ट्राणां कूटस्थो राजा, तस्य कुरुक्षेत्राख्ये देशे। युयुत्सवः-योद्धुमिच्छवस्सन्तः । समवेताः-संमिळिताः । मम इमे मामकाः - मदीया दुर्योधनादयः । पाण्डोरपत्यानि पुमांसः पाण्डवाः - युधिष्ठिरादयश्च । किं - कार्यं । अकुर्वत - चक्रुः ॥ १ ॥

संजय उवाच ।

दृष्ट्वातु पाण्डवानीकं व्यूढं दुर्योधन स्तदा ।
आचार्य मुपसङ्गम्य राजा वचन मब्रवीत ॥ २ ॥
पश्यैतां पाण्डुपुत्राणा माचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

राजा दुर्योधनः । व्यूढं-पद्मशकटसूचीवराहादि व्यूह रचनया निवेशितम् ।: पाण्डवानीकम् - पाण्डवानां - युधिष्ठिरादीनां, अनीकम् - सैन्यम् । तुशब्दोत्र दुर्योधन सैन्यापेक्षया वैलक्षण्यं द्योतयति । दृष्ट्वा-विलोक्य । आचार्यम्-द्रोणाचार्यम् । उपसङ्गम्य - समीपंगत्वा । वचनम् - वाक्यं वक्ष्यमाणम् । उवाच-उक्तवान् ॥२॥

तदेव वचनमाह " पश्यैतानि " त्यादिभिः श्लोकैः ।

हे अचार्य ? तव - जीवतः । शिष्येण - अन्तेवासिना । धीमता - धीः - बुद्धिः, अस्यास्तीति धीमान् , तेन - तथोक्तेन । द्रुपदपुत्रेण-द्रुपदस्य-पांचालस्य, पुत्रः-धृष्टद्युम्नः, तेन । व्यूढाम् - व्यूहाकारेण निवेशितां । महतीं - अधिकां, अतिशूरजनबाहुल्येन स्वसेना मप्यतिशयितवती मित्यर्थः । एतां - पुरःस्थितां । पाण्डुपुत्राणां - पाण्डुतनयानां । चमूं - सेनां । पश्य - अवलोकय ॥ ३ ॥

तदेव माहात्म्यं दर्शयन्नाह (अत्रेति)

महेष्वासाः - इषवो - बाणाः , अस्यन्ते - लक्ष्यं प्रतिप्रेष्यन्ते , एभि रितीष्वासाः - धनूंषि, महान्तः इष्वासा येषान्ते तथोक्ताः- महाधन्विन इत्यर्थः । युधि - युद्धविषये । भीमार्जुनसमाः - भीमश्चार्जुनश्च भीमार्जुनौ, महायोधतया प्रसिद्धौ युधिष्ठिरानुजौ वायुवासव तनयौ, ताभ्यां, समाः - सदृशाः । शूराः - शौर्यगुणवन्तो राजानः । अत्र- पाण्डवसेनायां । सन्तीति शेषः ॥ तानेव तन्नामभि

धृष्टकेतु श्चेकितानः काशीराजश्च वीर्यवान् ।
पुरुजि त्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्वएव महारथाः ॥ ६ ॥

दर्शयति । युयुधानः – सात्यकिर्नाम श्रीकृष्णस्या नुजः । विराटश्च – विराटोनाम पाण्डवाना मज्ञातवासकाल परिपालनेनोपकृतवान् कश्चिद्राजा। महारथः – महान् • अत्युन्नतो रथो यस्य, स तथोक्तः। द्रुपदः – पांचालदेशाधिनाथश्च ॥ ४ ॥

धृष्टकेतुः-धृष्टकेतुर्नाम कश्चिद्राजा । चेकितानः । वीर्यमस्यास्तीति वीर्यवान् , विकारहेतौ सत्यविकृत चित्तत्वं वीर्यं । काश्या राजा- काशीराजः,सच । पुरुजित । कुन्तिभोजः-तन्नामकः कश्चन राजा। नरपुंगवः-पुमांश्चासौगौश्च – पुंगवः-ऋषभः; गौणवृत्त्याश्रेष्ठवाची पुंगवशब्दः; नरेषु पुंगवः-श्रेष्ठः। शैब्यश्च – शिबेरपत्यं पुमान् – शैब्यः, सच ॥ ५ ॥

विक्रान्तः – पराक्रमवान् । युधामन्युः- कश्चनराजा । वीर्यवान् – धीरः । उत्तमौजाः-तन्नामा कश्चिद्राजा । सुभद्राया अपत्यं पुमान् सौभद्रः – अभिमन्युः । द्रौपतेयाः – द्रुपदस्या पत्यं स्त्री-द्रौपदी, द्रौपद्या अपत्यानि पुमांसो द्रौपदेयाः - द्रौपद्यां युधिष्ठिरादिभ्यः पंचभ्योजाताः प्रतिविन्ध्यादयः पंच । अत्रसन्तीति पूर्वेणयोजनीयम् । तान्विशिनष्टि (सर्वइति) सर्वे - सात्यकि प्रमुखाः । महारथा एव । एतेष्वमहारथः कश्चिदपि नास्तीत्यर्थः । अत्र - "एकादशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्र शास्त्रप्रवीणश्च स महारथ उच्यते । अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः । रथेनैकेनयो योद्धा सन्यूनोर्धरथोत्तमः ।" इति महारथातिरथार्धरथानां लक्षणानि द्रष्टव्यानि ॥ ६ ॥

अस्माकन्तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमिते ॥ ७ ॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथवच ॥ ८ ॥

अन्येच बहव श्शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणा स्सर्वे युद्ध विशारदाः ॥ ९ ॥

एवं – पाण्डवसेनायां योधाग्रेसरानुक्त्वा स्वसेनायामपि योधाग्रेसरा न्वक्तुं प्रतिजानीते (अस्माकमिति) हे द्विजोत्तम-ब्राह्मणेषु श्रेष्ठ । अस्माकम् - अस्मन्मध्येतु । मम, सैन्यस्य - सेनायाः । नायकाः - नेतारः, सेनापतय इत्यर्थः । ये, विशिष्टाः – विलक्षणाः शूराः । सन्ति । तान् । ते – तव । संज्ञार्थम् – सम्यक् ज्ञानाय । ब्रवीमि - वदामि । तान् – विशिष्टान् । निबोध - बुद्ध्यस्व ॥ ७ ॥

तानेवाह " भवानि " त्यादिश्लोकाभ्याम् ।

भवान् - द्रोणाचार्य इत्यर्थः । भीष्मश्च । कर्णश्च । समितौ-युद्धे जयतीति समितिंजयः । कृपश्च – कृपाचार्य इत्यर्थः । अश्वत्थामा । विकर्णश्च । सोमदत्तस्या पत्यं पुमान् सौमदत्तिः ॥ ८ ॥

किमस्मत्सेनाया मेतावन्त एव शूरा इत्याशंक्याह (अन्येचेति)

अन्ये - पूर्वोक्तेभ्यो न्येपि । बहवः - भूयांसः । शूराः - शल्यादयः । सन्तीति शेषः । ते कीदृशाइत्यत्राह (मदर्थइति) सर्वे – पूर्वोक्ता श्शल्यप्रभृतयः । मदर्थे - शत्रुजयरूप मत्प्रयोजने निमित्ते । त्यक्तजीविताः - त्यक्तानि - त्यक्तु मध्यवसितानि, जीवितानि, यै स्ते - तथोक्ताः । नानाशस्त्रप्रहरणाः - शस्त्राण्याग्नेयादीनि, प्रहरणानि - खड्गादीनि, नानाविधानि शस्त्रप्रहरणानि येषां ते तथोक्ताः । युद्धे, विशारदाः - समर्थाः - युद्धविशारदाः ॥ ९ ॥

अपर्याप्त न्तद स्माकं बलं भीष्मा भिरक्षितम् ।
पर्याप्त न्त्विद मेतेषां बलं भीमा भिरक्षितम् ॥ १० ॥
अयनेषुच सर्वेषु यथाभाग मवस्थिताः ।
भीष्ममेवा भिरक्षन्तु भवन्त स्सर्व एवहि ॥ ११ ॥
तस्य संजयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥ १२ ॥

अस्त्वेवं परकीयस्वकीयसेनयो स्स्थितिः, ततः किमित्यत्राह (अपर्याप्तमिति)

तत्-तस्मात्-शूरपुरुषसंख्या न्यूनाधिक्यादिहेतो रित्यर्थः । अस्माकम् । बलं - सैन्यम् । भीष्माभि रक्षितं- भीष्मेणा भितो रक्ष्यमाणं सत् । अपर्याप्तम् - परबलविजयाय नालम् । भीष्मस्य, पाण्डुतनयसंरक्षण प्रवणत्वेन प्रतिपन्नत्वादिति भावः । इदम् । एतेषां - पाण्डवानां । बलन्तु । भीमाभिरक्षितं - भीमेन - भीमसेनेन, अभिरक्षितंसत् । पर्याप्तं - अस्मद्बलविजयायालम् । भीमस्य समस्तधार्तराष्ट्रवधदीक्षितत्वा त्दुचितबलसाहससहायादियुक्तत्वा च्चेति भावः ॥ १० ॥

तस्मा द्भवद्भि रेवं वर्तितव्य मित्याह (अयनेष्विति)

सर्वएव - सर्वेपि । भवन्तः - यूयम् । सर्वेषुच - समस्तेष्वपि । अयनेषु - व्यूहप्रवेशमार्गेषु । यथाभागं - भागाः - विभक्तस्वस्वयुद्धभूमयः,ताननतिक्रम्य । अवस्थिताः - वर्तमाना स्सन्तः । भीष्ममेव - सैन्याभिरक्षकं गांगेयमेव । अभिरक्षन्तु-यथा न्यै र्युध्यमानः पृष्ठतः कैश्चि न्नहन्येत तथा रक्षन्तु । भीष्मबलेनैवा स्माकं जीवनमिति भावः ॥ ११ ॥

एवं पाण्डवबलस्य पर्याप्ततां स्वबलस्या पर्याप्ततांच प्रतीयमाना माचार्याय निवेद्य विषण्णचित्तस्य दुर्योधनस्य स्वविषये बहुमानयुक्तं वाक्यं श्रुत्वा भीष्मः किंकृतवानित्यत्राह (तस्येति)

प्रतापो स्यास्तीति प्रतापवान् - प्रशस्तपराक्रमः । कुरुषु, वयसा ज्ञानेन पौरुषेणच वृद्धः - अधिकः, कुरुवृद्धः । पितामहः-भीष्मः ।

ततः शंखाश्च भेर्यश्च पणवानक गोमुखाः ।
सहसैवाभ्यहन्यन्त सशब्द स्तुमुलो भवत ॥ १३ ॥
ततः श्वेतै र्हयै र्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥
पाचजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥

तस्य - विषण्णस्य दुर्योधनस्य। हर्ष - सन्तोषं। सञ्जनयन् - सम्यग्जनयितुम्। उच्चैः - अधिकं। सिंहनादं - सिंहध्वनिम्। विनद्य - कृत्वा। यद्वा - सिंहनादं विनद्य - सिंहइव विनद्येत्यर्थः । शंखम्। दध्मौ - पूरयामास ॥ १२ ॥

तदेवं सेनापते र्भीष्मस्य युद्धोत्साह मालक्ष्य तदाज्ञया सैनिकानामपि युद्धोत्साहः प्रवृत्त इत्याह (ततइति)

ततः - भीष्मशंखध्मानानन्तरं । शंखाश्च, भेर्यश्च, पणवाः आनकाः गोमुखाश्च वाद्यविशेषाः। सहसा - तत्क्षणमेव। अभ्यहन्यन्त - वादिताः। सैनिकैरिति शेषः। सः - शंखादिजन्यः। शब्दः - ध्वनिः। तुमुलः - संकुलः। अभवत् - बभूव ॥ १३ ॥

ततः पाण्डवसैन्येप्रवृत्तं युद्धोत्साहमाह "तत" इत्यादिभिः पंचभिः श्लोकैः।

ततः - कुरुसैन्येवाद्यवादनानन्तरं । मायाः - लक्ष्म्याः, धवः - पतिः, माधवः - सारथीभूत श्रीकृष्णः। पाण्डो रपत्यं पुमान् पाण्डवः - रथिको र्जुनः । श्वेतैः - धवलैः । हयैः - अश्वैः युक्ते - योजिते । महति - उत्कृष्टे । स्यन्दने - रथे । स्थितौ । दिव्यौ -अप्राकृतौ । शंखौ। प्रदध्मतुः - पूरयामासतुः ॥ १४ ॥

ततः केशवार्जुनादीनां शंखपूरणं विभज्य दर्शयति (पांचजन्यमिति)

हृषीकाणां - इन्द्रियाणां, ईशः - नियन्ता, हृषीकेशः - श्रीकृष्णः । पांचजन्यम् - पांचजन्याख्यम् । महाशंखम् । दध्मौ। धनंजयः - अर्जुनः।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोष मणिपुष्पकौ ॥ १६ ॥
काश्यश्च परमेष्वासः शिखण्डीचमहारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् ॥ १८ ॥
सघोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च प्रथिवींचैव तुमुलो व्यनुनादयन् ॥ १९ ॥

देवदत्तम् - देवदत्तनामकं शंखम् । दध्मौ । भीमानि - शत्रुभयंकराणि, कर्माणि - व्यापाराः, यस्यसः भीमकर्मा । वृकोदरः-भीमसेनः । पौण्ड्रम् - पौण्ड्रनामकं महाशंखं । दध्मौ ॥ १५ ॥

कुन्तीपुत्रः । राजा । युधिष्ठिरः - धर्मराजः । अनन्तविजयं - तन्नामकं शंखं । दध्मौ । नकुलस्सहदेवश्च - माद्रीतनयौ । यथाक्रमं । सुघोषश्च मणिपुष्पकश्च सुघोषमणिपुष्पकौ - तन्नामकौ महाशंखौ । दध्मतुः ॥ १६ ॥

परमेष्वासः - परमः - उत्कृष्टः, इष्वासः - धनुः, यस्य सव-थोक्तः । काश्यः - काशीराजश्च । महारथः । शिखण्डीच - शिखण्डीनामकश्चित् । धृष्टद्युम्नः । विराटश्च । अपराजितः - युद्धे अपराभूतः । सात्यकिश्च । द्रुपदः । द्रौपदेयाः - प्रतिविन्ध्यादयश्च। महान्तौ बाहू यस्य स महाबाहुः - बलवान् । सौभद्रः - अभिमन्युश्च । सर्वशः - सर्वेपि । हे पृथिवीपते ? हे धृतराष्ट्र । पृथक् प्रथक् प्रत्येकम्प्रत्येकम् । शंखान् । दध्मुः - पूरयामासुः ॥ १७-१८ ॥

सः - पाण्डवसैनिक शंखध्मानादिजनितः । घोषः - ध्वनिः । तुमुलः - संकुलः । नभः - आकाशंच । पृथिवीं - भूमिंच । अनुनादयन्नपि - प्रतिध्वनिमत्यौ कुर्वन्नपि सन् । धार्तराष्ट्राणां - धृतराष्ट्रस्या पत्यानि पुमांसो - धार्तराष्ट्राः, तेषां - दुर्योधनादीनां

अथव्यवस्थिता न्दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शास्त्रसंपाते धनुरुद्यम्यपाण्डवः ॥ २० ॥
हृषीकेशं तदावाक्य मिदमाह महीपते ।

अर्जुनउवाच ॥

सेनयोरुभयोर्मध्ये रथं स्थापयमेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् ॥
कैर्मया सह योद्धव्य मास्मिन् रणसमुद्यमे ॥ २२ ॥

त्वत्पुत्राणामेव । हृदयानि - मनांसि । व्यदारयत् – बिभेद । अद्यैव नष्टं कुरुबल मिति यथा मन्येरं स्तथा करोदित्यर्थः ॥ १९ ॥

एतास्मिन् समये श्रीकृष्णं प्रत्यर्जुनस्य विज्ञापनमाह “ अथे-त्यादिभिः चतुर्भिश्लोकैः ।

अथ – सेनयो र्युद्धोत्साहानन्तरम् । हेमहीपते ? – धृतराष्ट्र ? कपिः - लंकादाहनो हनुमान् , ध्वजः – केतनम् , यस्य स – कपिध्वजः – पाण्डवो र्जुनः । शस्त्राणि संपतंत्य स्मि न्निति-शस्त्रसंपातः - युद्धम्, तस्मिन् । प्रवृत्तेसति । व्यवस्थितान् - युद्धस-न्नाहेनस्थितान् । धार्तराष्ट्रान् । दृष्ट्वा - निरीक्ष्य । धनुः – गाण्डीवम् । उद्यम्य – उध्दृत्य । तदा - तस्मिन्काले । हृषीकेशम् - श्रीकृष्णंप्रति । इदम् - वक्ष्यमाणं वाक्यम् । आह – अब्रवीत ॥

तदेव वाक्यमाह-(सेनयोरिति) आश्रितान्नच्यावयतीत्यच्युतः, तस्य सम्बुद्धिः हे अच्युत?-कृष्ण । उभयो स्सेनयोर्मध्ये - तन्निरीक्षणयोग्यस्थाने । मे - मम । रथम् - स्यन्दनम् ! स्थापय - निवेशय । कियत्पर्यन्तमि त्यत्राह (यावदिति) योद्धुं, कामः - इच्छा, येषांते - योद्धुं कामाः तान्योद्धुकामान् सतः । अवस्थितान् - पुरतोवर्तमानान् । एता-न् - धार्तराष्ट्रान् । यावत - यावत्पर्यन्तम् । निरीक्षे - पश्यामि । ता-वद स्थापयेति पूर्वेण सम्बन्धः ।

२

योत्स्यमाना नवेक्षेहं यएतेत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धे र्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

सञ्जय उवाच ।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयो रुभयो र्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेता न्कुरू निति ॥ २५ ॥

ननु – त्वं योद्धा ननु युद्धप्रेक्षक इत्यत्राह (कैरिति) अस्मिन् । रणसमुद्यमे – युद्धोद्योगे । मया । शूरैः कैः सह । योद्धव्यम् - युद्धं कर्तव्यम् । इति यावन्निरीक्ष इतिपूर्वेणान्वयः ॥ २२ ॥

नकेवलं धार्तराष्ट्रा एवद्रष्टव्याः, किन्तु तदर्थमागता अन्येपीत्याह (योत्स्यमानानिति) अहं । योत्स्यमानान् - अस्माभि स्सह युद्धं क- रिष्यमाणान् । अवेक्षे । यएते - पुरतो दृश्यमाना भीष्मद्रोणादयः । युद्धे । दुर्बुद्धेः- दुष्टबुद्धेः । धार्तराष्ट्रस्य - दुर्योधनस्य । प्रियचिकीर्ष- वः - प्रियंकर्तुमिच्छन्तस्सन्तः । अत्र - इहरणभूमौ । समागताः – सम्यग्जीवित त्यागनिश्चय पूर्वकमागताः । तानिति पूर्वेणान्वयः ॥ २३॥

एवमर्जुन विज्ञापनानन्तरं भगवता कृष्णेन किं कृतमित्यत्राह (ए- वमिति) भरतस्य कुलापत्यं पुमान् - भारतः तस्य सम्बुद्धिः हेभार त ? धृतराष्ट्र । हृषीकेशः - कृष्णः। गुडाकेशेन - गुडाका - निद्रा, त स्या ईशेन - नियंत्रा, जितनिद्रेणार्जुनेन । एवं - अनेनोक्त प्रकारेण। उक्तस्सन् । उभयोः - द्वयोः । सेनयोर्मध्ये । भीष्मद्रोण प्रमु- खतः -भीष्मद्रोणयोरग्रतः । सर्वेषां । महीक्षिताम् - महीपालानां। प्रमुखतः । भीष्मादिषु सर्वेषु पश्यत्स्वित्यर्थः । रथोत्तमं - रथ- श्रेष्ठम् । स्थापयित्वा - निवेश्य । पृथाया अपत्यं पुमान् पार्थः, तस्य सम्बुद्धिः हेपार्थ ! – हे अर्जुन । समवेतान् – युद्धेच्छ- या संमिळितान् । एतान् - दुर्योधनादीन् । पश्येत्युवाच ॥ २४ ॥ २५ ॥

तत्र पश्य स्थिता न्पार्थः पितॄनथ पितामहान् ।
आचार्या न्मातुला न्भ्रातन् पुत्रा न्पौत्रा न्सखीं स्तथा ॥ २६ ॥
श्वशुरा न्सुहृद श्चैव सेनयो रुभयो रपि ।
तान् समीक्ष्य सकौन्तेयः सर्वा न्बन्धू नवस्थितान् ॥ २७ ॥
कृपया परया विष्टो विषीद न्निद मब्रवीत् ।

अर्जुनः ।

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

ततः किं प्रवृत्तमित्यत्राह (तत्रेति) अथ - अनन्तरं । तत्र - सेनाद्वयमध्ये । पार्थः - अर्जुनः । उभयोरपि सेनयोःस्थितान् । पितॄन्- पितृव्यान् । पितामहान् - भीष्मादीन् । आचार्यान् - द्रोणादीन् । मातुलान् - मातृसहोदरान् । भ्रातॄन् - सोदरान् । पौत्रान् । तथा , सखीन् - मित्राणि । श्वशुरान् । सुहृदः - कृतोपकारांश्च । अपश्यत - ददर्श ।

ततः कि मर्जुनः कृतवानित्यत्राह (तानिति) सः । कुन्त्या- अपत्यं पुमान् कौन्तेयः - अर्जुनः । अवस्थितान् - युद्धसन्नाहेन स्थितान् । तान् - पूर्वोक्तान् सर्वान् । बन्धून् । समीक्ष्य - सम्यग्दृष्ट्वा । परया - उत्कृष्टया । कृपया - परदुःखासहिष्णुत्वरूपया दयया । आविष्टः - व्याप्तः । विषीदन् - दुःखितस्सन् । इदं - वक्ष्यमाणं वाक्यम् । अब्रवीत - उवाच ।

किमब्रवीदित्य पेक्षायां " दृष्ट्वेम" मित्यारभ्याष्टादशभिः श्लोकैराह ।

हेकृष्ण? युयुत्सुम्- योद्धुमिच्छुं सन्तम् । समुपस्थितम् - सम्यक्पुरतःस्थितम् । इमम् । स्वजनम् - बन्धुजनम् । दृष्ट्वा - विलोक्य । मम - मे । गात्राणि - करचरणाद्यवयवाः । सीदन्ति - कृशीभवन्ति । मुखं - वक्त्रंच । परिशुष्यति - परितो म्लायति । मे - मम ।

गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३०
निमित्तानि च पश्यामि विपरीतानि केशव ।
नच श्रेयो ऽनुपश्यामि हत्वा स्वजन माहवे ॥ ३१ ॥
न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगै र्जीवितेन वा ॥ ३२ ॥
येषा मर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ।
त इमे ऽवस्थिता युद्धे प्राणां स्त्यक्त्वा धनानि च ॥ ३३ ॥

शरीरे । वेपथुः - कम्पश्च । जायते । रोमहर्षः - रोमांचश्च । जायते । हस्तात - करात । गाण्डीवम् - तन्नामकं धनुः । स्रंसते - भ्रश्यति । त्वक् - चर्मच । परिदह्यते - परित स्तप्यते । किंच, अवस्थातुं - स्थितिदशया वर्तितुम् । नशक्नोमि - शक्तो नभवामि । मे - मम । मनश्च । भ्रमतीव - विघूर्णतीव । विपरीतानि - अरिष्टसूचकानि । निमित्तानि - शकुनानिच । पश्यामि - विलोकयामि । किंच । आहवे- युद्धे । स्वजनं - बन्धुजनम् । हत्वा - निहत्य । साध्यम् , श्रेयः - फलम् । नानुपश्यामि ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

ननु विजयादिरूपं फलं दृश्यत एवेत्यत्राह (नकांक्षइति)

हेकृष्ण? विजयम् शत्रुजयम् । नकांक्षे - नेच्छामि । राज्यंच नकांक्षे । सुखानिच नकांक्षे । एतदेव प्रपंचयति "किन्नो राज्येने" त्यादिसार्ध श्लोकद्वयेन । गाः विन्दतीति गोविन्द इति व्युत्पत्त्या, इन्द्रापादिताश्म वृष्टिविपत्तिसमये गोवर्धनोद्धारणापदानेनोपकृताभि र्गोभिः गोविन्दइति कृताभिषेकः उच्यते, तस्य सम्बुद्धिः गोविन्द? नः - अस्माकम् । राज्येन किंकार्यम् । भोगैः - स्रग्भूषणादिभिः । किंकार्यम् । जीवितेनवा किंकार्यम् । राज्यादिकं सर्वं व्यर्थमिति भावः ॥ ३२ ॥

वैय्यर्थ्यमेवोपपादयति(येषामिति) येषाम् - आचार्यादीनाम् । अर्थे - सुखरूपे प्रयोजने निमित्ते । नः - अस्माकम् । राज्यम् । कांक्षितम् - अपे-

आचार्याः पितरः पुत्रा स्तथैवच पितामहाः ।
मातुलाः श्वशुराः पौत्राः स्यालाः स्सम्बन्धिन स्तथा ॥ ३४ ॥
एता न्न हन्तु मिच्छामि घ्नतोपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥
निहत्य धार्तराष्ट्रा न्नः का प्रीतिः स्या ज्जनार्दन ।
पापमेवा श्रये दस्मान् हत्वैता नाततायिनः ॥ ३६ ॥

क्षितम् । भोगाः–भुज्यन्तइति भोगाः, भोग्यवस्तूनि । नः । कांक्षिताः । सुखानिच कांक्षितानि । तइमे । आचार्याः, पितरः, पुत्राः, तथा पितामहाः, मातुलाः, श्वशुराः, पौत्राः, स्यालाः- जाया सहोदराः, तथा सम्बन्धिनश्च । प्राणान् धनानिच त्यक्त्वा - प्रणधनानां त्याग मंगीकृत्य । युद्धे - निमित्ते । अवस्थिताः - सन्नद्धाः ॥ ३३ ॥ ३४ ॥

ननु कृपया त्वमेतान्नहनिष्यसि चेदप्येतेतु राज्यलोभेन त्वां हनिष्यन्त्येव, अत स्त्वमेवैतान् हत्वा राज्यं भुंक्ष्वेत्याशंक्याह " एतानि " ति सार्धश्लोकेन । मधुं सूदयति – हिनस्तीति मधुसूदनः, तस्य सम्बुद्धिः हेमधुसूदन ? घ्नतः – अस्मान् हिंसतोपि । एतान् – धार्तराष्ट्रान् । त्रैलोक्यराज्यस्यापि - त्रयो लोका स्त्रैलोक्यं, राज्ञां भावः राज्यम्, त्रैलोक्यस्य राज्यं - आधिपत्यं, तस्य - तथोक्तस्य, हेतुशब्दः प्रयोजनहेतुवाची, त्रैलोक्याधिपत्यरूप प्रयोजनार्थमपीत्यर्थः । हन्तुं – हिंसितुम् । नेच्छामि ! महीकृते – महीमात्रप्रयोजनायतु । किन्तु – किमु वक्तव्यम् । हेजनार्दन? धार्तराष्ट्रा न्निहत्य । नः – अस्माकम् । का प्रीति स्स्यात , नकापीत्यर्थः ॥ ३५ ॥

ननु – " अग्निदो गरदश्चैव शस्त्रपाणि र्धनापहः । क्षेत्रदारापहर्ताच षडेते आततायिनः ॥ " इति स्मरणा दग्निदत्वादिभि ष्षड्भि र्हेतुभि रेते आततायिनः, " आततायिन मायान्तं हन्यादेवाविचारयन् । नाततायि वधे दोषो हन्तु र्भवति कश्चन ॥ " इति वचनादाततायि वधो युक्तएवेत्याशंक्याह " पापमेवे " ति सार्धश्लोकेन । आततायिनो प्येतान् हत्वा । अस्मान् पाप माश्रयेदेव ।

तस्मा न्नार्हावयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥
यद्यप्येते न पश्यन्ति लोभोपहत चेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥
कथं न ज्ञेय मस्माभिः पापा दस्मा न्निवर्तितुम् ।
कुलक्षय कृतं दोषं प्रपश्यद्भि र्जनार्दन ॥ ३९ ॥
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्न मधर्मोऽभिभवत्युत ॥ ४० ॥

तस्मात् - कारणात् । वयम् । सबान्धवान् - बन्धुसहितान् । धार्तराष्ट्रान् । हन्तुमर्हाः । न - नभवामः । आततायि वधाभ्यनुज्ञान माचार्यादिव्यतिरिक्त विषयमिति भावः ॥ ३६ ॥

नन्वधर्ममपि चिकीर्षतः सुखेन भाव्यम्, नचेह तदस्तीत्याह (स्वजनंहीति) माधव ? स्वजनं - आचार्यादिकम् । हत्वा । कथं ? सुखिनः - सुखवन्तः । स्याम - भवेम ॥ ३७ ॥

ननुच - एतेषामपि बन्धुवधदोषे समाने सति यथा ते· बन्धुवधदोष मंगीकृत्यापि युद्धे प्रवर्तन्ते, तथैव भवानपि प्रवर्तताम्, किमनेन विषादेनेत्याशंक्याह " यद्यपी " त्यादिना श्लोकद्वयेन-

हेजनार्दन ? लोभोपहतचेतसः - लोभेन - राज्यलोभेन, उपहतम् - प्रणष्टविवेकम्, चेतो - येषान्ते तथोक्ताः । एते - धार्तराष्ट्राः । कुलक्षयेन कृतं पापम् । मित्रद्रोहे - मित्राणां - सुहृदां, द्रोहे-वधेसति । पातकम् - पापश्च । नपश्यन्ति - यद्यपि न जानन्त्येव । तथापि । कुलक्षयकृतं दोषम् । प्रपश्यद्भिः· सम्यग्जानद्भिः । अस्माभिः । अस्मात् - बन्धुवधरूपात् । पापात् । निवर्त्तितुं कथं नज्ञेयं । निवृत्तौ बुद्धिः कर्तव्येत्यर्थः ॥ ३८ ॥ ३९ ॥

कुलक्षयकृतं दोषमेव दर्शयति (कुलक्षय इति) कुलक्षये - सति । सनातनाः - शाश्वताः, पितृपितामहादिपरम्पराप्राप्ताइतियावत् । कुलधर्माः । प्रणश्यन्ति । न केवलं धर्मनाशमात्रमित्याह (धर्मइति)

अधर्माभिभवा त्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥
संकरो नरकायैव कुलघ्नानां कुलस्यच ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदक क्रियाः ॥ ४२ ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवती त्यनुशुश्रुम । ४४ ॥

धर्मे नष्टेसति । कृत्स्नम् - समस्तम् । कुलम् - नष्टावशिष्टं कुलं । अधर्म उत - अधर्मोपि । अभिभवति - व्याप्नोतीत्यर्थः ॥ ४० ॥

हेवार्ष्णेय - वृष्णिकुलोत्तंस । कृष्ण ? अधर्माभिभवात् - अधर्माभिव्याप्तिहेतोः । कुलस्त्रियः - कुलांगनाः । प्रदुष्यंति - प्रकर्षेणदुष्टाभन्ति । स्त्रीषु दुष्टासुसतीषु । वर्णसङ्करः - वर्णानाम् - ब्राह्मणक्षत्रियवैदिंजातीनाम्, संकरः - अव्यवस्था । जायते ॥ ४१ ॥

एवं सत्यनर्थमाह (संकरइति) संकरः-वर्णसांकर्यम् । कुलंघ्नन्तीति कुलघ्नाः - कुलक्षयकारिणः, तेषां । कुलस्यच । नरकायैवभवति । एषां- कुलघ्नानां । पितरः-ऊर्ध्वलोकनिवासाअपि । लुप्तपिण्डोदकक्रियाः- लुप्ताः-दातुरभावान्नष्टाः, पिण्डोदकानां , क्रियाः - अनुष्ठानानि, येषान्ते तथोक्ता स्सन्तः । पतन्ति - अधोगतिं प्राप्नुवन्ति ॥ ४२ ॥

कुलघ्नानाम् । वर्णसंकरकारकैः - जातिसांकर्यकरैः । एतैः - कुलक्षयकृतैः । दोषैः । शाश्वताः । जातिधर्माः - ब्राह्मणादिधर्माः । कुलधर्माः । चकारा दाश्रमधर्माश्च । उत्साद्यन्ते - लुप्यन्तएव । उत्सन्नाः- नष्टाः, कुलधर्माः ये स्ते उत्सन्नकुलधर्माः, इदमुत्सन्नजातिधर्मादीना मप्युपलक्षणम् , तादृशानाम् । मनुष्याणाम् । हेजनार्दन? नरके- कुम्भीपाकादौ । वासः । नियतं नित्यं यथातथा । भवति । इति-अनेन प्रकारेण । अनुशुश्रुमः- वयं श्रुतवन्तः । "प्रायश्चित्त मकुर्वाणाः पापेषु निरता नराः । अपश्चात्तापिनः कष्टा न्निरया न्यान्ति दारुणान् ॥" इत्यादिवचनदर्शनात् ॥ ४३ ॥ ४४ ॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
य द्राज्य सुखलोभेन हन्तुं स्वजन मुद्यताः ॥ ४५ ॥
यदि मामप्रतीकार मशस्त्रं शास्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्यु स्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

सञ्जय उवाच ।

एवमुक्त्वा ऽ र्जुनः स्संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

इति श्रीभगवद्गीतायां प्रथमोऽध्यायः ॥ १

युद्धे बन्धुवधाध्यवसाये परितप्यमान आह (अहो इति) वयम् । राज्यसुखलोभेन राज्यसुखेच्छया । स्वजनं - बन्धुजनम् । हन्तुम् । उद्यताः ऽभुक्ताइतियत् - तत् । महत् - अतिदारुणम् । पापम् । कर्तुम् । व्यवसिताः · व्यवसायं कृववन्तः । अहो - आश्चर्यम् । बत - कष्टमित्यर्थः ॥४५॥

एव मनुतापेन मृत्युमेवाकांक्षन्नाह (यदीति) रणे-युद्धे । अप्रतीकारं- अकृतः, प्रतीकारः-प्रतिक्रिया, येन तथोक्तम् । अशस्त्रं- आयुधरहितम् । माम् । शस्त्रं पाणौ येषांते शस्त्रपाणयः-आयुधहस्ताः । धार्तराष्ट्राः । हन्युर्यदि । तत् - हननमेव । मे - मम । क्षेमतरम् · अत्यन्तहितम् । भवेत् । स्वस्यपापप्रसंगाभावादितिभावः । ‘भवे’ दित्यनन्तरमितिशब्दः पूरणीयः ! इदं वीषीदन्नब्रवीदितिपूर्वेणान्वयः ॥ ४६॥

ततः किमर्जुनः कृतवानित्यपेक्षायाम् सञ्जयआह (एवमिति) एवं - अनेन प्रकारेण । उक्त्वा । सशरम् - बाणसहितम् । चापं - धनुः । विसृज्य-त्यक्त्वा । शोकसंविग्नमानसः-शोकेन-दुःखेन, संविग्नम्-अत्यन्तचलितम्, मानसं - युद्धाध्यवसायरूपमनोव्यापारः, यस्य तथोक्तस्सन् । संख्ये - युद्धे । रथोपस्थे - रथस्योपरि । उपाविशत् - उपविवेश ॥ ४८ ॥

इति श्रीवरवरमुनि विरचितायां बालबोधिन्य पराभिधानायाम्
श्रीगीतार्थ संग्रहदीपिकाख्यायां भगवद्गीताव्याख्यायाम्

॥ प्रथमोध्यायः ॥

श्रीरस्तु ।

अथ द्वितीयोध्यायः ।

सञ्जय उवाच ।

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्य मुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्ट मस्वर्ग्य मकीर्तिकर मर्जुन ॥ २ ॥
क्लैब्यं मास्मगमः पार्थ नैत त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

ततोभगवता कृष्णेन किंकृत मित्यपेक्षायामाह (तमिति) तथा-तेन प्रकारेण । कृपया - दयया । आविष्टं - व्याप्तं । अश्रुपूर्णाकुलेक्षणं - अश्रुभिः - बाष्पैः, पूर्णे, आकुले - चञ्चले, ईक्षणे - नेत्रे, यस्य तं तथोक्तं । विषीदन्तं - शोचन्तं । तं - अर्जुनंप्रति । मधुसूदनः - श्रीकृष्णः । इदं - वक्ष्यमाणं वाक्यं । उवाच ॥ १ ॥

तदेववाक्यमाह (कुतइति) अनार्यजुष्टं - अनार्यैः-अविद्वद्भिः, जुष्टं - सेवितं । अस्वर्ग्यं - स्वर्गायहितं स्वर्ग्यं, तन्नभवतीत्यस्वर्ग्यं - परलोकविरोधि । अकीर्तिकरं - अपकीर्तिहेतुः । इदं । कश्मलं - शोकः । विषमे - सङ्कटसमये । कुतः - कस्माद्धेतोः । त्वा - भवन्तं । समुपस्थितं - सम्प्राप्तम् ॥ २ ॥

हेपार्थ ? क्लीबस्यभावः क्लैब्यं - दैन्यं, तत् । मास्मगमः - नप्राप्नुहि । यतः । त्वयि - विषये । एतत्-क्लैब्यं । नोपपद्यते-नयुज्यते । अतः ।

अर्जुन उवाच ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥
गुरूनहत्वाहि महानुभावान् श्रेयो भोक्तुं भैक्षमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥
नचैतद्विद्मः कतरन्नो गरीयोयद्वा जयेम यदिवा नो जयेयुः ।
यानेव हत्वा नजिजीविषाम स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

हेपरन्तप - शत्रुतापन । क्षुद्रं - तुच्छं । हृदयदौर्बल्यं - मनोदैन्यं । त्यक्त्वा । उत्तिष्ठ । युद्धायेतिशेषः ॥ ३ ॥

पुनर प्यस्थानस्नेहकारुण्य धर्माधर्म भयाकुलतया भगवदुक्तं हेतुमजान न्नर्जुन आह (कथमिति) हे? अरिसूदन - आश्रितशत्रुनिरसन । मधुसूदन - हेकृष्ण ? अहं । संख्ये - युद्धे । पूजार्हौ - पूजायोग्यौ । भीष्मं - पितामहं । द्रोणं - आचार्यंच । उभौप्रति । इषुभिः -बाणैः । कथं । योत्स्यामि - युद्धंकरिष्यामि । योद्धुमनुचित मितिभावः ॥ ४ ॥

तर्हि तवदेहयात्रापि नस्यादित्याशंक्याह (गुरूनिति) महानुभावान् - बहुमन्तव्यान् । गुरून् - भीष्मद्रोणादीन् । अहत्वा -अनिहत्य । इहैवल्लोके । भैक्षं - भिक्षान्नं । भोक्तुमपि । श्रेयोहि - उचितं हि । अर्थं कामयन्त इत्यर्थकामास्तान् , भोगेष्वतिमात्रसक्तानित्यर्थः । गुरूंस्तुहत्वा । रुधिरप्रदिग्धान् - रुधिरेण - तेषां रक्तेन, प्रदिग्धान्-उपसिक्तान् । भोगान् - तैर्भुज्यमानानेवार्थान् । इहैव - तेषां स्थान एव । स्थित्वा । कथं । भुञ्जीय - अनुभवेयम् ॥ ५ ॥

ननु युद्धमारभ्यानिवृत्तव्यापारान् भवतोधार्तराष्ट्राः प्रसह्यहन्युः, अत स्तज्जयाय योद्धव्यमित्यतआह (नचैतदिति) किञ्च । यद्वा जयेम-वयंवातान् जेष्यामः । यदिवानोजयेयुः-नः- अस्मान् , तेवाजेष्यन्ति ।

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥
नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

अनयोर्द्वयोर्मध्ये । नः - अस्माकं । कतरत् - किंवा । गरीयः - श्रेष्ठं । एतत् । नविद्मः - नजानीमः । ननु तज्जयगरीयस्त्वेक स्संशयइत्यत्राह (वयमिति) वयं । यानेवहत्वा । नजिजीविषामः - जीवितुं नेच्छामः । ते । धार्तराष्ट्राएव । प्रमुखे - पुरतः । अवस्थिताः - युद्धार्थंस्थिताः । अतस्तज्जयोपि पराजयतुल्य एवेति भावः ॥ ६ ॥

तर्हि किमत्र मया कर्तव्य मित्यत्राह (कार्पण्येति) कार्पण्य दोषोपहतस्वभावः - एतान् हत्वा कथं जीविष्याम इति मनोदैन्यं कार्पण्यं, दोषः - कुलक्षयकृतः, ताभ्यां, उपहतः - अभिभूतः, स्व- भावः - धैर्यं, यस्य स तथोक्तः । धर्मे, सम्मूढ - सन्दिग्धं, चेतो यस्य सः - धर्मसम्मूढचेता सन् ; मम किं गुरुवधमपि कृत्वा राज्यसुखानुभवो धर्मः, किंवा गुरुवध मकृत्वा भैक्षाशनमपि धर्म इति धर्मसन्दिग्ध स्सन्नित्यर्थः । त्वा - त्वाम् । पृच्छामि । अत्र । यत । निश्चितम् । श्रेयः - श्रेयोयुक्तम् । स्यात । तत् । मे - मह्यम् । ब्रूहि - वद । अहम् । ते - तव । शिष्यः - शासनार्हः । त्वाम् । प्रपन्नं - शरणागतम् । माम् । शाधि - शिक्षय ॥ ७ ॥

त्वमेव विचार्य यद्युक्तं तदाचरे त्यत्राह (नहीति) इन्द्रि- याणां - चक्षुरादीनाम् । उच्छोषणं - अत्यन्तशोषकरम् । मम - मे । शोकं - बन्धुवधजनितं दुःखम् । यत - कर्म । अपनुद्यात - नि- वर्तयेत । तत्कर्म । अहम् । भूमौ । असपत्नं - नविद्यते, सपत्नः -

संजय उवाच ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविन्द मुक्त्वा तूष्णींबभूव हा ॥ ९ ॥
तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्त मिदं वचः ॥ १० ॥

शत्रुः, यस्य तत्तथोक्तम् । ऋद्धं - विविधभोग्यभोगोपकरणभोग स्थानसम्पन्नम् । राज्यं - राजत्वम् । सुराणां - देवानाम् । आधिपत्यमपिच - इन्द्रत्वमपीत्यर्थः । प्राप्यापि - लब्ध्वापि । नहि प्रपश्यामि - नोपलभे । अनेन युद्धेनेह भूमण्डलाधिपत्यलाभे परत्र स्वाराज्यलाभेपि वा बन्धुवधजनितो महान् शोको ऽनुवर्तिष्यत एवेति तदपनोदनोपायस्तु नकश्चिदपि प्रतिभातीति भावः ॥ ८ ॥

एव मुक्त्वा ऽर्जुनः किं कृतवा नित्यपेक्षायां सञ्जय आह (एवमिति) पर न्तपः । गुडाकेशः - निद्रालस्यनियन्ता - अर्जुनः । "निद्रालस्ये गुडाकास्या" दिति कोशकारः । हृषीकेशं - श्रीकृष्णंप्रति । एव मुक्त्वा । अहम् । नयोत्स्ये - युद्धं नकरिष्यामि । इति गोविन्दं प्रत्युक्त्वा । तूष्णीं बभूव - निरुद्योगो ऽभूदित्यर्थः । भगवच्चिकीर्षितभूभारावतरणे निमित्तभूतस्या र्जुनस्य कोय मस्थाने शोक स्संवृत्त इति सञ्जयो विषीदति हेति ॥ ९ ॥

ततः किं वृत्त मित्य त्राह (तमिति) हे भारत - धृतराष्ट्र । हृषीकेशः - कृष्णः । प्रहसन्निव - स्नेहकारुण्ययो र्विषयविभाग मजानन्तं तंप्रति किञ्चित्परिहासवाक्यं वदन्निवेत्यर्थः । उभयो स्सेनयो र्मध्ये - विषादानुचितदेशे । विषीदन्तं - शोचन्तम् । तम् - अर्जुनं प्रति । इदं - वक्ष्यमाणं - " अशोच्यानि " त्यारभ्य - " मोक्षयिष्यामिमाशुच " इत्यन्तम् । वचः - वाक्यम् । उवाच ॥ १० ॥

श्रीभगवानुवाच ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

अथशरणागतवत्सलोभगवान् श्रीकृष्णः – देहातिरिक्तात्मा ऽज्ञाननिमित्तको ऽस्यशोकस्तज्ज्ञानेनविना नशाम्यतीति मत्वा तज्ज्ञानं प्रथममुपदिशति (अशोच्यानिति) हे अर्जुन । त्वं । अशोच्यान् – शोचितुमनर्हान् बन्धून् प्रति । अन्वशोचः – शोचितवानसि । प्रज्ञावादांश्च – प्रज्ञया - देहातिरिक्तात्मज्ञानेन, येवादाः – " पतन्ति पितरोह्येषां लुप्तपिण्डोदकक्रिया " इत्यादयः, तान् । भाषसे । देहातिरिक्तात्मज्ञानवता मत्रनकिञ्चिदपि शोकनिमित्तमस्ती त्याह (गतेति) गताः, असवः - प्राणाः, येषांते - गतासवः – नश्वरादेहाः, तान् । अगता असवोयेषांते अगतासवः – नित्यात्मानः, तांश्चप्रति । पण्डिताः – देहात्मस्वरूप याथात्म्यज्ञानवन्तः । नानुशोचन्ति । नश्वराणां देहानां यदाकदाचिदपि नाशस्यावश्यकत्वा न्नित्यानांचात्मनां कदाचिदपि नाशाभावाच्चोभयत्रापि नशोकनिमित्तमितिभावः ॥ ११ ॥

प्रथमं तावदात्मनां स्वरूपमाह (नत्विति) अहं – सर्वेश्वरः । जातु - पूर्वस्मिन्काले कदाचिदपि । नासम् – नाभूवम् । इतिन, अपित्वासमेव । त्वं - जीवः । जातुनासीरितिन, किन्त्वासीरेव । इमे जनाधिपाः – राजानोजीवा अपि । जातुनासन्नितिन, अपित्वासन्नेव । सर्वे वयं – अहंच त्वञ्चेमेचेत्यर्थः । अतः – वर्तमानकालात् । परं – परस्मिन्काले । जातु । नभविष्यामश्चैवेतिन, किन्तु भविष्याम एव । यथाहंपरमात्मानित्यः, तथैवभवन्तोजीवा अपि नित्याएवेतिभावः ॥ १२ ॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीर स्तत्र न मुह्यति ॥ १३ ॥
मात्रा स्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

नन्वीश्वरस्य तवजन्मादिशून्यत्वं सत्यमेव, जीवानांतु जन्ममरणे प्रसिद्धे, तत्कथमात्मनां नित्यत्व मित्यत आह (देहिन इति) अस्मिन् देहे । वर्तमानस्य । देहिनः । कुमारस्यभावः कौमारं - शैशवावस्था । यूनोभावोयौवनं - युवत्वावस्था । जरा - वृद्धत्वावस्था- च । यथाभवन्ति । तथा । देहांतरप्राप्तिः - पूर्वदेहं विहायान्य देह- प्राप्तिरपि । भवति । तत्र - पूर्वदेहत्यागरूपे मरणे देहान्तरप्राप्तिरूपे जन्मनिच । धीरः - धियंराति गृह्णातीतिधीरः - बुद्धिमान् । नमुह्यति- नशोचति । कौमारादीनामिव जन्ममरणयोरपि देहधर्मत्वेना त्मधर्म- त्वाभावादिति भावः ॥ १३ ॥

ननु नाहं बन्धून् प्रतिशोचामि, किन्तु तत्संयोगवियोगरूप सुखदुःखभाज म्मांप्रत्येवेत्य त्राह (मात्रेति) हे कौन्तेय - अर्जुन । तुशब्दश्शंकानिरासार्थः । मात्रास्पर्शाः - मात्राणां - शब्दस्पर्शरूपरस- गन्धवतां मृदुपरुषादिभेदभिन्नानां पदार्थानां, स्पर्शाः - श्रोत्रादिभि- रिन्द्रियैर्ग्रहणानि, ते । शीतोष्णसुखदुःखदाः, शीतोष्णशब्दौ प्रिया प्रियमात्रपरौ, तदुद्भूतसुखदुःखप्रदा भवन्ति । आगमापायौ - उत्पत्ति- विनाशौ, तावेषां स्तइत्यागमापायिनः । अतएव । अनित्याश्च । हे भारत - भरतवंश्य । तान् - सुखदुःखदान्मात्रास्पर्शान् । तितिक्षस्व - क्षमस्व । नित्यस्या प्यनादिकर्मवश्यस्या त्मनस्तत्तत्कर्मकृतशरीरसम्ब- न्धेन विषयानुभवजनित सुखदुःखयोरवर्जनीयत्वादितिभावः ॥ १४ ॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोमृतत्वाय कल्पते ॥ १५ ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥
अविनाशितु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तु मर्हति ॥ १७ ॥

तत्क्षमाकिमर्थेत्यत आह (यंहीति) हे पुरुषर्षभ - पुरुषश्रेष्ठार्जुन । एते - मात्रास्पर्शाः । समदुःखसुखं - समे - तुल्ये, दुःखसुखे यस्य तं - अवर्जनीयं दुःखन्नपि कर्मक्षयहेतुतया ऽनुकूलत्वात्सुखमिव मन्यमानमित्यर्थः । धीरं - धैर्यवन्तम् । यं पुरुषं । नव्यथयन्ति - नपीडयन्ति । सः - पुरुषः । अमृतत्वाय - मोक्षाय । कल्पते - समर्थोभवति हि ॥ १५ ॥

आत्मनां देहानांचाशोच्यत्वनिमित्तभूतो नित्यत्वानित्यत्वरूपोय स्स्वभावउक्तः, तमुपपदायितुमारभते (नेति) असतः - देहस्य । भावः - सत्त्वम् । नविद्यते । सतश्च - आत्मनः । अभावः - असत्त्वं । नविद्यते । अनयोः - उपलभ्यमानयोरपि देहात्मनोः । अन्तः - अचेतनस्य देहस्यासत्त्वमेवस्वरूपं, नित्यस्यात्मन स्सत्त्वमेवस्वरूपमिति निर्णयस्तु । तत्त्वदर्शिभिः - तत्त्वज्ञैः । दृष्टः ॥ १६ ॥

आत्मनो विनाशित्वं कथ मुपगम्यत इत्याशंक्याह (अविनाशीति) तत्तु - आत्मवस्तु । अविनाशि - विनाशरहितम् । विद्धि । येन - आत्मवस्तुना चेतनेन । इदं सर्व - अचेतनजातम् । ततं - व्याप्तं - अतिसूक्ष्मतया ऽन्तरनुप्रविष्ट मित्यर्थः । अव्ययस्य । अस्य - आत्मनः । कश्चित् - तद्व्यतिरिक्तशस्त्रजलाग्न्यादिरूपः कश्चिदपि पदार्थः । विनाशम् । कर्तुम् । नार्हति - समर्थो नभवति । शस्त्रजलादिकंहि

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युद्धयस्व भारत ॥ १८ ॥
यएनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति नहन्यते ॥ १९ ॥

नाश्यं वस्तु व्याप्य नाशयति, आत्मातु न कस्यापि व्याप्य इति नाशकवस्त्वभावा दविनाश्ये वेति भावः ॥ १७ ॥

देहानान्तु विनाशित्वमेव स्वभाव इत्याह (अन्तवन्त इति) अन्तः – विनाशः, एषा मस्ती त्यन्तवन्तः – नाशस्वभावाः । इमे – परिदृश्यमानाः । देहाः - उपचयात्मकानि शरीराणि । दिह उपचय इतिहि धातुः । नित्यस्य - उत्पत्तिरहितस्य । अनाशिनः - नाशरहितस्य । अप्रमेयस्य - स्वयं प्रमातृतया प्रमेयविलक्षणस्य । शरीरिणः - आत्मनः । उक्ताः - कर्मफलभोगार्थतया - “ पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणे ” त्यादिशास्त्रैः प्रतिपादिता इत्यर्थः । तस्मात् - देहस्य नाशस्वभावत्वा दात्मनो नित्यत्वाच्च तव शोकनिमित्ताभावात् । हे भारत । युध्यस्व - क्षत्रियस्य तव परमधर्मभूत मनभिसंहितफलं मोक्षसाधनं युद्धाख्यं कर्म कुरुष्व ॥ १८ ॥

यः । एनं - उक्तस्वभाव मात्मानं प्रति । हन्तारं - अग्न्यादि रूप मन्यं हननकर्तारम् । वेत्ति - मन्यते । यश्च । एनं - आत्मानम् । हतं - हननक्रियाविषयम् । मन्यते । तावुभावपि । नविजानीतः – अविदितात्मस्वरूपा वित्यर्थः । कुत इत्यत आह (नायमिति) अयं - अग्न्यादिः । आत्मानम् । नहन्ति । आत्मा । नहन्यते – केनापि नहिंस्यतेच । उक्तप्रकारेणा त्मनो नित्यत्वादिति भावः ॥ १९ ॥

नजायते म्रियते वा कदाचिन्नायं भूत्वा भविताता न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥
वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥
वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥

अयं – आत्मा । कदाचिदपि । नजायते - नोत्पद्यते । नम्रियते वा – नविनश्यति चेत्यर्थः । एव मात्मनो नित्योत्पत्तिविनाशयो रभाव उक्तः । अथ नैमित्तिकोत्पत्तिविनाशयो रभाव माह (नाय मिति) अयम् । भूत्वा - कल्पादा वुत्पद्य । भूयः - कल्पान्ते । नभविता - मरिष्यमाणः । न । अतः । अयं - सर्वदेहगत आत्मा । अजः - उत्पत्तिरहितः । नित्यः - विनाशरहितः । शाश्वतः – प्रकृतिवदस्फुट सततपरिणामरहितः । पुराणः - पुरापि नवः , सर्वदाऽपूर्ववदनुभाव्यः , सतत मेकरूप इति यावत् । अतः । शरीरे । हन्यमाने सति । अयम् । नहन्यते ॥ २० ॥

यः – पुरुषः । एनं - आत्मानम् । अविनाशिन मज मव्ययं – नाशाद्यनर्हम् । अतएव । नित्यंच । वेद – जानाति । हेपार्थ । सः, पुरुषः । कं - कश्चिदात्मानम् । कथम् । घातयति - अन्येन-पुरुषेण नाशयति । कं - कंचित् । कथम् । हन्ति - स्वयं नाशयति । अतः – एतानहं हन्मि - अन्यैर्घातयामीत्यनुशोचनमात्म स्वरूपाज्ञानमूलक मेवेति भावः ॥ २१ ॥

ननु नित्यस्याप्यात्मनो रमणीयभोगसाधनभूतेषु शरीरेषु नश्यत्सुतद्वियोगरूपं शोकनिमित्तमस्त्येवेत्याशंक्याह (वासांसीति) नरः-मनुष्यः । यथा । जीर्णानि । वासांसि - वस्त्राणि । विहाय - त्यक्त्वा । अपराणि – अन्यानि । नवानि - कल्याणानि । वासांसि ।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥
अच्छेद्योय मदाह्योऽयमक्लेद्यो ऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥
अव्यक्तोय मचिन्त्योय मविकार्योऽय मुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितु मर्हसि ॥ २५ ॥

गृह्णाति - स्वीकरोति । तथा । देही - आत्मा । जीर्णानि - धर्मयुद्धादिन शिथिलानि । शरीराणि । विहाय । अन्यानि - इतराणि । नवानि - त्यक्तशरीरादपि रमणीयानि । संयाति - सम्यक्प्राप्नोति । धर्मयुद्धकृतशरीरत्यागः कल्याणतरस्वर्गशरीरप्राप्तिहेतुत्वेन हर्षहेतुरेव, न शोकनिमित्तमिति भावः ॥ २२ ॥

पूर्वोक्तमेवा विनाशित्वं द्रढयति (नैनमिति) शस्त्राणि - खड्गाद्यायुधानि । एनं - आत्मानम् । नच्छिन्दन्ति - नखण्डयन्ति । पावकः - अग्निः । एनं । नदहति - नभस्मीकरोति । आपः - जलानिच । एनं । नक्लेदयन्ति - मृदूकरणेन शिथिलं नकुर्वन्ति । मारुतः - वायुः । एनं । नशोषयति - शुष्कं नकरोति ॥ २३ ॥

अत्र हेतुंछेदनाद्यनौचित्यमाह " अच्छेद्योऽय " मित्यादि श्लोकद्वयेन । अयं - आत्मा । अच्छेद्यः - छेदनानर्हः । अदाह्यः - दहनानर्हः । किंच । अक्लेद्यः - शिथिलीकरणानर्हः । अशोष्यएव - शोषणानर्हएव । कुतइत्यत्राह (सर्वगत इति) सर्वं - स्वव्यतिरिक्तमचेतन जातम् , गतः - परमसूक्ष्मतया व्याप्यस्थितः । अतः । अयं - आत्मा । नित्यः । स्थाणुः - स्थिरस्वभावः । अचलः - अप्रकम्प्यः । सनातनः - पुरातनश्च ॥ २४ ॥

अयं - आत्मा । नव्यज्यत इत्यव्यक्तः - चक्षुराद्य विषयः । अयं । अचिन्त्यः - चिन्तयितुमशक्यः, मनसोप्यविषयः । अयं ।

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितु मर्हसि ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्यच ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितु मर्हसि ॥ २७ ॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र कापरिदेवना ॥ २८ ॥

अविकार्यः - विकारयितुमशक्यः, कर्मेन्द्रियाणामप्यविषय इत्यर्थः । उच्यते - कथ्यते । अभियुक्तैरिति शेषः । तस्मात् - हेतोः । एनं - आत्मानम् । एवं - उक्तप्रकारमविनाशिनम् । विदित्वा - ज्ञात्वा । तदर्थं । अनुशोचितुम् । नार्हसि ॥ २५ ॥

एवं देहातिरिक्तस्या त्मनो नित्यत्वेन शोकानर्हत्व मुक्त्वा जनन मरणस्वभावस्य देहस्यैवात्मत्वे प्यशोच्यत्व माह (अथ चेति) अथच - अथवा । एनं - आत्मानम् । नित्यजातं - प्रतिक्षण मुत्पन्नम् । नित्यं - प्रतिक्षणम् । मृतंवा - विनष्टंच, शरीर मित्यर्थः । तत् । मन्यसे - आत्मानं प्रतिक्षणोत्पत्तिविनाशशीलशरीराभिन्नमेव मन्यसे चेदित्यर्थः । तथापि । हे महाबाहो - अर्जुन । त्वम् । एवं - अनेन प्रकारेण । शोचितुं नार्हसि ॥ २६ ॥

तदेवोपपादयति (जातस्येति) जातस्य - उत्पन्नस्य । मृत्युः - विनाशः । ध्रुवः - अवर्जनीयः । मृतस्यच । जन्म । ध्रुवं - अवर्जनीयंहि । देहस्य सततपरिणामैकस्वभावत्वादिति भावः । तस्मात् - कारणात् । अपरिहार्ये - परिहर्तु मशक्ये । अर्थे - आत्मविनाशरूपे विषये । त्वम् । शोचितुं नार्हसि ॥ २७ ॥

हे भारत - अर्जुन । भूतानि - देवमनुष्यादिशरीराणि । अव्यक्तादीनि - अव्यक्तः - अनुपलब्धः, आदिः - पूर्वावस्था, येषां तानि

आश्चर्यव त्पश्यति कश्चिदेन माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥
देही नित्यमवध्योयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि नत्वं शोचितु मर्हसि ॥ ३० ॥

तथोक्तानि । व्यक्तमध्यानि - व्यक्तानि - उपलब्धानि, मध्यानि - जन्ममरणान्तराळगतदेवत्वमनुष्यत्वाद्यवस्थाः , येषां तानि तथोक्तानि । अव्यक्तनिधनानि - अव्यक्तं - अनुपलब्धं , निधनं - नाशरूपोत्तरावस्था , येषां तानि तथोक्तान्येव । भवन्ति । स्वेषु स्वभावेषु वर्तन्त इत्यर्थः । अतः । तत्र - तेषां स्वभावे नाशरूपे । परिदेवना - शोकः । का - किन्निमित्तेत्यर्थः ॥ २८ ॥

एवं देहात्मवादेपि न शोकनिमित्त मस्ती त्युक्त्वा , वस्तुतस्तु देहातिरिक्त एवात्मा , सचाश्चर्यस्वरूपः, तन्निर्णेतातु दुर्लभ इत्याह (आश्चर्यवदिति) आश्चर्यवत - स्वेतरसमस्तवस्तुविलक्षणतया ऽऽश्चर्यवदवस्थितम् । एनं - आत्मानम् । कश्चिदेव - सुकृती । पश्यति । तथा । आश्चर्यवदवस्थितम् । एनम् । अन्यः कश्चिदेव । परस्मै वदतिच आश्चर्यवदवस्थितम् । एनम् । अन्यः कश्चिदेव । शृणोतिच । किंच । एनं - आत्मानम् । अन्यः कश्चित् । श्रुत्वापि । नवेदेद - नजानात्येव ॥ २९ ॥

उक्त मात्मस्वरूपं संक्षेपेण वदन्नुपसंहरति (देहीति) सर्वस्य - देवमनुष्यादेः । देहे, विद्यमानः । अयं, देही - आत्मा । नित्यं - सर्वदा । अवध्यः - अवधार्हः । तस्मात - कारणात् । हेभारत । सर्वाणि - देवादिस्थावरान्तानि । भूतानि प्रति । त्वम् । शोचितुम् । नार्हसि । “ धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्य नविद्यत ” इति भावः ॥ ३० ॥

स्वधर्ममपि चावेक्ष्य न विकम्पितु मर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयो न्यत् क्षत्रियस्य न विद्यते ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥
अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

एवं शोकस्या नर्हता मुक्त्वा – 'वेपथुश्च शरीरे म'इत्याद्युक्त शरीरकंपस्याप्यनर्हत्व माह (स्वधर्ममिति) अपिच – किंच । इदं प्रारब्धं युद्धं प्राणिमरणरूपमप्यग्नीषोमीयपश्वालम्भमिव । स्वधर्मं - स्वस्यधर्मं , क्षत्रियस्य धर्मशास्त्रविहितमर्थम् । अवेक्ष्य - विज्ञाय। विकम्पितुं - प्रकम्पितुम् । नार्हसि । हि – यस्मात्कारणात् । क्षत्रियस्य । धर्म्यात् – धर्मादनपेतात् , न्यायतःप्रवृत्ता दित्यर्थः । युद्धात् । अन्यत - इतरत् । श्रेयः - श्रेयस्करम् । नविद्यते - नास्ति ॥ ३१ ॥

कम्पस्यानर्हतामेव युक्त्यन्तरेणाप्याह (यदृच्छयेति) किञ्च । हेपार्थ । यदृच्छया - स्वयमेव । उपपन्नं - प्राप्तम् । अपावृतं - आवृतं-आवरणं - प्रतिबन्धकं, अपगतमावृतं – यस्य तत्तथोक्तम् । स्वर्गद्वारं - स्वर्गस्य - निरतिशयसुखरूपमोक्षस्य, द्वारं - उपायभूतम् । ईदृशं - एवंरूपम् । युद्धम् । सुखिनः - भाग्यवन्तः । क्षत्रियाः । लभन्ते - प्राप्नुवन्ति । भवद्भाग्यवशादीदृशे महति श्रेयसि स्वयमेवोपगते सति कुतः प्रकम्पइति भावः ॥ ३२ ॥

एवं युद्धकरणेऽभ्युदयमुक्त्वा वदकरण आवरणरहितं दोषमाह “ अथे ” त्यादिश्लोकचतुष्टयेन ॥ अत्राथशब्दःपक्षान्तरद्योतकः त्वम् । धर्म्यं - न्याय्यं । इमम् - यदृच्छासम्प्राप्तम् । संग्रामं - युद्धम् । नकरिष्यसिचेत् । ततः – युद्धाकरणाद्धेतोः । स्वधर्मं - क्षत्रि-

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां ।
सम्भावितस्य चाकीर्ति र्मरणादतिरिच्यते ॥ ३४ ॥
भयाद्रणादुपरतं मन्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥
अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

यवर्णधर्मं । कीर्तिम् - यशश्च । हित्वा - विहाय । पापं - दुरितम् । भवाप्स्यसि ॥ ३३ ॥

किञ्च । भूतानि - सर्वप्राणिनः । ते - तव । अव्ययां - सर्वदेशकालव्यापिनीं । अकीर्तिं - पार्थो युद्धेपलायित इत्येवं रूपमयशोपि । कथयिष्यन्ति । भवत्वकीर्तिः किंततइत्यत्राह (सम्भावितस्येति) सम्भावितस्य - शौर्यादिगुणैरभिमतस्य पुरुषस्य । अकीर्तिः । मरणाच्च - मरणादपि । अतिरिच्यते - अधिकाभवति । एवंविधा कीर्तिश्रवणादपि मरणमेव तवश्रेय इति भावः ॥ ३४ ॥

बन्धुविषयस्नेहकारुण्याभ्यां युद्धान्निवृत्तस्य शूरस्य मम कथमकीर्तिरागमिष्यतीत्यत्राह (भयादिति) महारथाः - शूरादुर्योधनादयः । त्वां भवन्तम् । भयात - हेतोः । रणात् - युद्धात् । उपरतं - निवृत्तव्यापारम् । मन्यन्ते - मन्येरन्नित्यर्थः । येषां - महारथानांच । बहुमतः - बहुमानविषयः । भूत्वा । इदानीं । लाघवं - युद्धान्निवृत्ततया सुग्रहतां । यास्यसि - गमिष्यसि ॥ ३५ ॥

तव । अहिताः - शत्रवो दुर्योधनादयः । तव । सामर्थ्यं । निन्दन्तः - विगर्हमाणास्सन्तः । बहून् - अमितान् । अवाच्यवादान् - अवाच्याः - वक्तुमनुचिताः, वादाः - वचनानि , तांश्च । वदिष्यंति। ततः - अवाच्यवादश्रवणात् । दुःखतरम् । किंनु - किमस्ति । तदेवसर्वातिशयितं दुःखमिति भावः ॥ ३६ ॥

हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीं ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥
एषा ते भिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

एवं युद्धाकरणे बाधकमुक्त्वा –"यच्छ्रेयस्स्यान्निश्चितं ब्रूहि" त्यर्जुनेन पृष्टं निश्चितमर्थ माह (हतोवेति) हतोवा – धर्मयुद्धे शत्रुभिर्हतश्चेत । स्वर्गं - निरतिशय सुखलक्षणं मोक्षम् । प्राप्स्यसे । फलाभिसन्धिरहितस्य धर्मयुद्धस्य मोक्षोपायत्वादिति भावः । जित्वा-वा - परान् जित्वातु । महीं - भूमिम् । भोक्ष्यसे - अनुभविष्यसि । तस्मात - उभयथापि श्रेयस्साधनत्वात । हेकौन्तेय । कृतनिश्चयः - कृतः, निश्चयः - युद्धमुभयथापि श्रेयस्साधमित्येवं रूपनिर्णयः, येनसतथोक्तस्सन् । युद्धाय - युद्धं कर्तुं । उत्तिष्ठ ॥ ३७ ॥

मुमुक्षोर्युद्धानुष्ठान प्रकारमाह (सुखेति) सुखदुःखे - हर्षविषादौ । समे । कृत्वा । लाभालाभौ - तद्धेतुभूतार्थ प्राप्तयप्राप्ती । जयाजयौ - तद्धेतुभूतजयपराजयौच । समौकृत्वा । तैरविकृतबुद्धिस्स्वर्गादि फलाभिसन्धिरहितस्सान्नितियावत् । ततः - तदनन्तरम् । युद्धाय । युज्यस्व - सन्नद्धोभव । एवं - आत्मयाथात्म्य ज्ञानपूर्वकफलाभिसन्धिरहितयुद्धकरणे सति । पापं - दुःखरूपसंसारम् । नावाप्स्यसि - संसारान्मुक्तएव भविष्यसीत्यर्थः ॥ ३८ ॥

एवमात्मयाथात्म्यज्ञान मुपदिश्य तत्पूर्वकम्मोक्षसाधनभूतं कर्मयोगं वक्तुमुपक्रमते (एषेति) हेपार्थ । सांख्ये – संख्या - ज्ञानं, तस्या इदं सांख्यं - ज्ञातव्यमात्मतत्त्वं, तस्मिन् विषये । एषा । बुद्धिः - ज्ञानम् । ते – तव । अभिहिता – नत्वेवाहमित्यारभ्योपदिष्टा ।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

व्यवसायात्मिकाबुद्धि रेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

योगे - आत्मज्ञानपूर्वक मोक्षसाधनभूत कर्मविषयेतु । इमां - बुद्धिमभिधीयमानां । शृणु । यया । बुद्धया - कर्मयोगबुद्धया । युक्तः । त्वं । कर्मबन्धं-कर्मकृतसंसारबन्धम् । प्रहास्यसि-त्यक्ष्यसीत्यर्थः ॥३९॥

वक्ष्यमाणबुद्धियुक्तकर्मणो माहात्म्य माह (नेति) इह - वक्ष्यमाणस्वरूपे कर्मयोगे । अभिक्रमनाशः - अभिक्रमस्य - आरम्भमात्रस्यापि , नाशः - निष्फलत्वम् । नास्ति । आरब्धस्य विच्छेदेपि । प्रत्यवायः । न विद्यते । अस्य - कर्मयोगाख्यस्य । धर्मस्य । स्वल्पमपि – स्वल्पांशोपि । महतः - अधिकात । भयात् - संसारभयात । त्रायते - रक्षति । अन्यानि लौकिकानि वैदिकानिच फलसाधनकर्माणि विच्छेदे फलायनभवन्ति , प्रत्युत प्रत्यवायाय च भवन्ति , अयं तु कर्मयोगो वृथा नभवतीति भावः ॥ ४० ॥

काम्यकर्म विषयबुद्धयपेक्षया मोक्षसाधनभूत कर्मविषयां बुद्धिं विशिनष्टि (व्यवसायात्मिकेति) हेकुरुनन्दन - अर्जुन । इह - मुमुक्षूणामनुष्ठेये कर्मयोगे विषये । व्यवसायात्मिका – आत्मस्वरूप निश्चयरूपा । बुद्धिः । एका - मोक्षरूपैकफल विषयत्वादेकविधा । अव्यवसायिनां - आत्मस्वरूपयाथात्म्य निश्चयरहितानां । बुद्धयः - स्वानुष्ठीयमान काम्यकर्मविषयकाधियः । अनन्ताः – अनन्तप्रकाराः । स्वर्ग पुत्रपशुवृष्टयन्नादिप्रधानफलानामनन्तत्वादिति भावः । बहुशाखाः – एकस्मिन्नपि कर्मण्यवान्तरफलभेदा द्बहुप्रकाराश्च भवन्तीत्यर्थः । अतः काम्यकर्मापेक्षया मोक्षसाधनभूतः कर्मयोग्रोज्यायानिति भावः ॥ ४१ ॥

यामिमां पुष्पितां वाचं प्रवदन्त्य विपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानां तया पहृतचेतसां ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

अथ काम्यकर्माणि निन्दति "यामिमामि" त्यादिश्लोकत्रयेण । हे पार्थ । वेदवादरताः - वेदेषु, ये वादाः - स्वर्गादिफलवादाः, तेषु, रताः - आसक्ताः । कामात्मानः - कामे - कामपुरुषार्थे, आत्मा - मनः, येषां ते तथोक्ताः । स्वर्गपराः - स्वर्गपरायणाः । नान्यदस्तीति । वादिनः - वदन्तः । अविपश्चितः - अल्पज्ञानाः । भोगैश्वर्यगतिं प्रति - भोगः - स्वर्गाद्यनुभवः, सएवैश्वर्य, तस्य, गतिं- प्राप्तिंप्रति । वर्तमानां । पुष्पितां - पुष्पितमात्रां, आपातरमणीया मित्यर्थः । जन्मकर्मफलप्रदां - स्वर्गादिफलावसाने पुनः कर्मभूमौ जन्मरूपं यत्कर्मफलं, तत्प्रदाम् । क्रियाविशेषबहुलां - तत्त्वज्ञानविधुरतया क्रियाविशेषैः प्रचुराम् । यामिमाम् । वाचं - स्वर्गादिफलश्रुतिम् । प्रवदन्ति - प्रकर्षेण वदन्ति । तया - वाचा । अपहृतचेतसां - अपहृतं- अभिभूतं, चेतः - आत्मविषयंमनः, येषां तेषां, प्रतिहतात्मज्ञानाना मित्यर्थः । अत एव । भोगैश्वर्यप्रसक्तानां - भोगैश्वर्यें, प्रसक्तानां - प्रकर्षेण सक्तानां जनानां । समाधौ - समाधीयते - उत्पाद्यते अस्मिन्नात्मज्ञानमिति समाधिः - मनः, तस्मिन् । व्यवसायात्मिका । बुद्धिः - पूर्वोक्ता । नविधीयते - नोत्पद्यत इत्यर्थः । अतः काम्येषु कर्मसु मुमुक्षुणा संगो नकर्तव्य इति भावः ॥ ४२ ॥ ४३ ॥ ४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥
यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

नन्वेव मप्यल्पफलानि पुन र्जन्मप्रदानि कर्माण्यात्मोज्जीवन प्रवृत्ता वेदाः किमर्थं प्रतिपादयन्ति, तत्राह (त्रैगुण्येति) वेदाः ! त्रैगुण्यविषयाः - त्रयः , गुणाः - सत्त्वरजस्तमांस्येव त्रैगुण्यं, अत्र त्रैगुण्यवन्तः पुरुषा स्त्रैगुण्यशब्दे नोच्यन्ते , अत्र - त्रयो गुणा येषां ते त्रिगुणाः - त्रिगुणा एव त्रैगुण्या इति योजनान्तरं, तद्विषयाः - तेषां हितप्रतिपादका इत्यर्थः । यदि वेदेन त्रैगुण्यवतां पुरुषाणां तत्तदधिकारानुगुणं हितं नप्रतिपाद्येत तत स्ते वेदेष्वप्रामाण्य बुद्ध्या विनश्येयु रिति भावः । हे अर्जुन । त्वन्तु । निस्त्रैगुण्यः - गुणत्रयरहितः । भव । इदानीं विद्यमानं सत्त्वप्राचुर्यमेव वर्धय , नत्वन्योन्यसंकीर्णगुणत्रयप्रचुरो भवेत्यर्थः । निस्त्रैगुण्यताप्राप्त्युपायमाह (निर्द्वन्द्वइति) निर्द्वन्द्वः-सुखदुःखशीतोष्णलाभालाभादियुगळानि द्वन्द्वानि, तद्रहितः । भव - तानि सहस्वेत्यर्थः । नित्यसत्त्वस्थः - नित्यं - गुणद्वयरहिततया नित्यप्रवृद्धं, यत्सत्त्वं, तस्मिन् तिष्ठतीति तथोक्तः । कथ मित्यत्राह (निर्योगक्षेमइति) निर्योगक्षेमः-अप्राप्तस्वीकारो योगः, प्राप्तस्य परिपालनं क्षेमः, तद्रहित इत्यर्थः । आत्मवान् - आत्म स्वरूपान्वेषणपरश्च, भवेत्यर्थः । एवं वर्तमानस्य ते रजस्तमःप्रचुरता नश्यति, सत्त्वंच वर्धत इति भावः ॥ ४५ ॥

नच वेदोदितमित्येव सर्वं सर्वस्योपादेय मित्याह (यावानिति) यथा । सर्वतस्संप्लुतोदके - सर्वतः - समंतात , संप्लुतं - स-मग्रं , उदकं यस्मिन् तत्तथोक्तं , तस्मिन् । उदपाने - उदकंपी-यते ऽस्मिन्नित्युदपानं - सर्वार्थतया परिकल्पितं तटाकादिकं, त-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥ ४७ ॥

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

स्मिन् । पिपासोः । यावानर्थः - यावदेवप्रयोजनं । तावानेवार्थ उपादीयते । एवं । सर्वेषु वेदेष्वपि । ब्राह्मणस्य - वैदिकस्य । विजानतः - ज्ञानिनोमुमुक्षोः । यावानेवार्थः - मोक्षसाधनरूपः । तावानेवोपादेयः । नसर्वोपीत्यर्थः ॥ ४६ ॥

मुमुक्षूपादेयमेवदर्शयति (कर्मणीति) ते - तव मुमुक्षोः । कर्मण्येव - नित्यनैमित्तिकादि कर्मस्वरूपमात्रएव । अधिकारः - इच्छा । फलेषु - तत्साध्यतया ऽवगतेषु स्वर्गादिफलेषु । कदाचन कदाचिदपि । मा - अधिकारोमाभूदित्यर्थः । सफलस्य कर्मणो बंधहेतुत्वा त्फलरहितस्य केवलमदाराधन रूपस्य मोक्षहेतुत्वा च्चेति भावः । कर्मफलहेतुः - कर्मचफलंचकर्मफले, तयोः, हेतुः - कर्ता । माभूः - त्वया ऽनुष्ठीयमाने कर्मणि तत्फलेच तवा कर्तृत्वमप्यनुसंधेयं । अकर्मणि - नयोत्स्यामीतित्वदभिहिते कर्माननुष्ठाने । ते - तव । संगः - कामः । मास्तु । उक्तप्रकारेण युद्धादिकरणएव संगो ऽस्त्वित्यर्थः ॥४७॥

तदेवस्फुटीकरोति (योगस्थइति) हेधनंजय - अर्जुन । संगं - राज्यबंधुप्रभृतिष्वासक्तिं । त्यक्त्वा । सिद्ध्यसिद्ध्योः - जयादिसिद्ध्यसिद्ध्योः । समः - तुल्यः । भूत्वा । योगेतिष्ठतीतियोगस्थः - सन् । कर्माणि - नित्यनैमित्तिकादीनि । कुरु । योगशब्दार्थं स्वयमेवाह (समत्वमिति) समस्यभावस्समत्वं - सिद्ध्यसिद्ध्यो रविकृतचित्तत्वं । योगइत्युच्यते ॥४८॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

किमर्थमिद मसकृदुच्यत इत्यत्राह (दूरेणेति) हेधनंजय । बुद्धियोगात् - बुद्ध्यायोगोयस्य तद्बुद्धियोगं, तस्मात्, बुद्धिः - प्रधानफलत्यागविषयिणी - अवांतरफल सिद्ध्यसिद्धिसमत्व विषयिणी स्वधीः , तद्युक्तात्कर्मण इत्यर्थः । कर्म - काम्यकर्म । दूरेणावरंहि - अत्यंतनिकृष्टंहीत्यर्थः । बुद्धियुक्तंहि कर्मपरमपुरुषार्थ लक्षणम्मोक्षं प्रापयति , इतरत्त्वपरिमित दुःखरूपं संसारमिति महद्वैषम्यमुभयोरितिभावः ॥ अतःकर्मकुर्वाणः । बुद्धौ - उक्तरूपायां । शरणं - वासस्थानं । अन्विच्छ - तस्यामेव वर्तस्वेत्यर्थः । फलं, हेतुः - प्रवृत्तिकारणं , येषांतेफलहेतवः - फलसंगादिना कर्मकुर्वाणाइत्यर्थः । कृपणाः - संसारिणो भवेयुरित्यर्थः ॥४९॥

बुद्धियोगयुक्तस्तु श्रेष्ठइत्याह (बुद्धीति) बुद्धियुक्तः - कर्मणि क्रियमाणे सत्युक्तरूपया बुद्ध्यायुक्तःपुरुषः । इह - अस्मिन्नेवजन्मनि । उभे । सुकृतदुष्कृते - अनादिकालसंचिते संसारहेतुभूते पुण्यपाप रूपेकर्मणी । जहाति - त्यजति । तस्मात् - कारणात् । योगाय - उक्तरूपाय बुद्धियोगाय । युज्यस्व - यतस्व । कर्मसु - क्रियमाणेषु । योगः - बुद्धियोगः । कौशलं - सामर्थ्यम् , अति सामर्थ्यसाध्यइत्यर्थः ॥ ५० ॥

पूर्वोक्तमेव बुद्धियुक्तस्य श्रेष्ठ्यंविवृणोति (कर्मजमिति) मनीषिणः - देहातिरिक्तात्मज्ञानिनः । बुद्धियुक्ताः - उक्तरूपया बुद्ध्या युक्तास्सतः । कर्मजं - कर्मजन्यं । फलं - स्वर्गादिरूपं । त्य-

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धि स्तदा योगमवाप्स्यसि ॥ ५३ ॥

कत्वा । कर्मकुर्वतइत्यर्थसिद्धं । जन्मबंधविनिर्मुक्ताः - जन्मरूपेणबंधेन, विनिर्मुक्ताः - सवासनंनिर्मुक्तास्संतः । अनामयं - न विद्यंते, आमयाः - व्याधयः, यस्मिन्तत - निरुपद्रवमित्यर्थः । पदं - स्थानं । गच्छंति - प्राप्नुवंति । अस्यार्थस्य सर्वोपनिष त्प्रसिद्धत्वं द्योतयतिहिशब्दः ॥५१॥

कर्मयोगानुष्ठानेन वक्ष्यमाण योगोपयुक्तं चित्तशुद्ध्यादिकमाह (यदेति) यदा - यस्मिन्काले । ते - उक्तप्रकारेण कर्मकुर्वतस्तव । बुद्धिः - चित्तं । मोहकलिलं - देहात्माभिमान रूपंकलुषं । व्यतितरिष्यति - विशेषेणातिक्रामति । तदा - तस्मिन्काले । श्रुतस्य - इतःपूर्वं मत्सकाशात्तचाश्येतया श्रुतस्यफलादेः । श्रोतव्यस्य - इतःपरंश्रोष्यमाणस्य चार्थस्य । कुतइतिशेषः । निर्वेदं - निष्फलत्वबुद्धिं, विराममितियावत् । गंतासि - स्वयमेवगमिष्यसि ॥५२॥

उक्तस्य कर्मयोगस्य लक्ष्यभुतं योगाख्यं फल माह (श्रुतीति) श्रुतिविप्रतिपन्ना - श्रुत्या - मत्तः श्रवणेन, विप्रतिपन्ना - विशेषेण प्रतिपन्ना, अचिद्विलक्षणात्मस्वरूपयाथात्म्यविषया । अचला - एकरूपा । ते - तव । बुद्धिः - प्रज्ञा । समाधौ - अनभिसंहितफल युद्धादिकर्मानुष्ठाननिर्मलीकृते मनसि । यदा । निश्चला - अप्रकम्प्यासती । स्थास्यति - स्थिरा भविष्यति । तदा । योगं - आत्मावलोकनम । अवाप्स्यसि - प्राप्स्यसि । शास्त्रजन्यात्मज्ञानपूर्वकः

अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥ ५४ ॥

श्रीभगवानुवाच ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

कर्मयोगः स्थितप्रज्ञतारूपज्ञाननिष्ठां सम्पाद्यात्मावलोकनरूपं योगं सम्पादयतीति भावः ॥ ५३ ॥

एवं भगवतोक्तेपार्थः कर्मयोगसाध्यस्थितप्रज्ञताया स्स्वरूपं स्थितप्रज्ञस्या नुष्ठानप्रकारंच पृच्छति (स्थितेति) हे केशव । समाधिस्थस्य - समाधौ – शीतोष्णादिद्वंन्द्वे रविकृतचित्ततारूपे समत्वे, तिष्ठतीति तथोक्तस्य । स्थितप्रज्ञस्य - स्थिता - निश्चला, प्रज्ञा यस्य - तथोक्तस्य । भाषा का - स्वरूपवाचक शब्दः क इत्यर्थः । स्थिता - धीः - प्रज्ञा, यस्य सः स्थितधीः । किं प्रभाषेत - किं भाषणादिकं कुर्यात । किमासीत - किमासनादिकं कुर्यात् । किं व्रजेत - किं गमनं कुर्यात ॥ ५४ ॥

स्थित प्रज्ञस्य वृत्तिविशेषकथनेन स्वरूप मप्युक्तं भवतीति वृत्तिविशेष माह (प्रजहातीति) हे पार्थ । आत्मना - आत्मैकावलम्बनेन मनसा । आत्मन्येव - आनन्दरूपे स्वात्मन्येव । तुष्टः - सन्तुष्टस्सन् । मनोगतान् । सर्वान् । कामान् - मनोरथान् । यदा । प्रजहाति - प्रकर्षेण त्यजति । तदा । स्थितप्रज्ञ उच्यते । इयं ज्ञाननिष्ठा काष्ठा ॥ ५५ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥
यः सर्वत्रानभिस्नेह स्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥
यदा संहरते चायं कूर्मोंगानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्य स्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

अथ ज्ञाननिष्ठस्य सन्निहित मवस्थान्तर माह (दुःखेष्विति) दुःखेषु – प्रियवस्तुविश्लेषादिदुःखनिमित्तेषु - प्राप्तेष्वपि । अनुद्विग्नमनाः - अनुद्विग्नं - अदुःखितं, मनो यस्य स तथोक्तः । सुखेषु - सुखसाधनेषु । सन्निहितेष्वपि । विगतस्पृहः – विगता – स्पृहा यस्य स तथोक्तः । अनागतेषु स्पृहा रागः । प्रियवस्तु विश्लेषादिहेतुदर्शनजन्यदुःखं भयम् । प्रियविश्लेषादिहेतुपरदुःखापादक स्वमनोविकारः क्रोधः । वीता रागभयक्रोधा यस्य स तथोक्तः, एवंभूतः । मुनिः - आत्ममननशीलः । स्थितधीः - स्थितप्रज्ञः । उच्यते ॥ ५६ ॥

अथ तत्पूर्वावस्था माह (य इति) यः । सर्वत्र - सर्वेषु प्रिय वस्तुषु । अनभिस्नेहः - स्नेहशून्यः, उदासीन इत्यर्थः । तत्तत् । शुभाशुभं - शुभं - अनुकूलं, अशुभं - प्रतिकूलं, तदुभयम् । प्राप्य । नाभिनन्दति - शुभं न प्रशंसति । नद्वेष्टि - अशुभं न निन्दति । किन्तु । केवल मुदासीन एव भाषते । तस्य – पुरुषस्य । प्रज्ञा प्रतिष्ठिता भवति – सोपि स्थितप्रज्ञ इत्यर्थः ॥ ५७ ॥

ततोपि पूर्वावस्थामाह (यदेति) यदा । अयं - योगी । इन्द्रियाणि - विषयान् कृष्टुमुद्युक्तानि चक्षुरादीनि । कूर्मः । अंगानि-करचरणाद्यवयवानिव । सर्वशः – सर्वेभ्यः । इन्द्रियार्थेभ्यः – इन्द्रियाणामर्थाः- विषयाः शब्दादयः, तेभ्यः । संहरते – प्रत्याहरति । तस्य प्रज्ञाप्रतिष्ठिता भवति, सोपि स्थितप्रज्ञ इत्यर्थः ॥ ५८ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशेहि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

एवं चतुर्विधा ज्ञाननिष्ठाप्रदर्शिता । इदानीं ज्ञाननिष्ठायादुष्प्रापतां तत्प्राप्त्युपायंचाह (विषया इति) आहाराः – इन्द्रियाणां भोग्यभूताश्शब्दादि विषयाः, निष्क्रान्त आहारेभ्यो निराहारः, विषयेभ्यः प्रत्याहृतेन्द्रिय इत्यर्थः, तादृशस्य । देहिनः । विषयाः । रसः - रागः, तद्वर्जं यथातथा । विनिवर्तन्ते । रसस्तु ननिवर्तत इत्यर्थः । रसोपि । अस्य-ज्ञानिनः । परं - विषयेभ्य स्सुखरूपतयोत्कृष्टमात्मस्वरूपम् । दृष्ट्वा – विलोक्य । निवर्तते । उत्तरोत्तरविलक्षणविषयदर्शनेनाहि पूर्वपूर्वविषयरागोनिवर्तत इति भावः ॥ ५९ ॥

आत्मावलोकनेनविना विषयरागो ननिवर्तत इत्युक्तं प्राक् । एवं सति । हे कौन्तेय । यततोपि – आत्मावलोकनाय यत्नं कुर्वतोऽपि । विपश्चितः - शास्त्रजन्यहेयोपादेय विवेकज्ञानवतः । पुरुषस्य । प्रमाथीनि - बलवन्ति । इन्द्रियाणि । मनः - विषयासक्तं चेतः । प्रसभं - बलात्कृत्य । हरन्ति - कर्षन्ति, विषयेषु बध्नन्तीत्यर्थः । अतो मनोजयात्मदर्शनयो रन्योन्यसापेक्षत्वा ज्ज्ञाननिष्ठा दुष्प्रापेति भावः ॥ ६० ॥

तानि - विषयानुरागयुक्ततया दुर्जयानि । सर्वाणि - इन्द्रियाणि । संयम्य - विषयेभ्यः प्रत्याहृत्य । मत्परः - अहमेव, परः - मनसोविषयः, यस्य स मत्परः, शुभाश्रयभूते मयि निवेशितचित्त इत्यर्थः । युक्तस्सन् - मत्स्वरूपयोगवान् सन् । आसीत -

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ ६३ ॥

वसेदित्यर्थः । तथाच अहमेव तस्य हृदये स्थित्वा मनो निर्मलीकृत्येन्द्रियाणि तद्वशीकरोमीति भावः । ततः कि मित्यत्राह (वशइति) यस्य – योगिनः । इन्द्रियाणि – मनःप्रभृतीनि । वशे । वर्तन्ते । तस्य । प्रज्ञा । प्रतिष्ठिता । भवतिहि । एवं स्थितप्रज्ञतायां जातायां सत्या मात्मावलोकनरूपो योग स्सुलभो भवतीति भावः ॥ ६१ ॥

अनेन – किमासीतेत्यस्योत्तर मुक्त्वा स्वयत्नगौरवेणैवेन्द्रियजये प्रवृत्तस्तु नश्येदित्याह " ध्यायत " इत्यादिश्लोकद्वयेन । विषयान् – शब्दादीनेव । ध्यायतः – अनादिवासनया ऽनुचिन्तयतः । पुंसः – मय्यनिवेशितचित्तस्य पुरुषस्य । तेषु - विषयेषु । संगः – रागः । उपजायते - प्रवृद्धो भवति । संगात् - विषयानुरागात् । कामः । सञ्जायते । कामो नाम संगस्य परिपाकावस्था , यस्मिन् सति पुरुषो विषयानभुक्त्वा स्थातुं नशक्नोति । कामात् । क्रोधः । अभिजायते । कामे सति विषयस्यालाभे सन्निहितजनं प्रति – अनेन मदिष्टं प्रतिहतमिति क्रोधो भवति ॥ ६२ ॥

क्रोधात् । सम्मोहः – कृत्याकृत्यविवेकशून्यता । भवति । यया पुरुष स्सर्वं कुर्यात् । सम्मोहात् । स्मृतिविभ्रमः - स्मृतेः – आरब्धेन्द्रियजयादिप्रयत्नविषयायाः, विभ्रमः – भ्रंशः । भवति । स्मृतिभ्रंशात् । बुद्धिनाशः – बुद्धेः – आत्मज्ञानगोचरव्यवसायात्मिकायाः, नाशः । भवति । बुद्धिनाशात् - हेतोः । प्रणश्यति । पुन रपि संसारे मग्नो भवतीति भावः ॥ ६३ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यै र्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

रागद्वेषवियुक्तैः - हृदयस्थितमत्प्रसादवशा दपगतरागद्वेषैः । **आत्मवश्यैः** - आत्मनः, **वश्यैः** - अधीनैः । **इन्द्रियैः** । **विषयान्** - शब्दादीन् प्रति । **चरन्** । **विधेयात्मा** - विधेयः, आत्मा - मनः, यस्य स तथोक्तः पुरुषस्तु । **प्रसादं** - मनोनैर्मल्यम् । **अधिगच्छति** - प्राप्नोति । अनेन व्रजेत किमित्यस्योत्तर मुक्तं भवति ॥ ६४ ॥

अस्य - पुरुषस्य । **प्रसादे** - मनोनैर्मल्ये सति । **सर्वदुःखानां** - प्रकृतिसम्बन्धकृतानां । **हानिः** - नाशः । **उपजायते** । **प्रसन्नं** - आत्मावलोकनविरोधिदोषरहितं , चेतो यस्य तस्य - **प्रसन्नचेतसः** । **आशु** - शीघ्रम् । **बुद्धिः** - देहविविक्तात्मविषया प्रज्ञा । **पर्यवतिष्ठते** - प्रतिष्ठिता भवतीहि ॥ ६५ ॥

सर्वेश्वरे स्वस्मिन्ननिवेशितचित्तस्याभीष्टासिद्धिमेवाह (नास्तीति) **अयुक्तस्य** - मय्यनिवेशितचित्तस्य । **बुद्धिः** - विविक्तात्मविषयाप्रज्ञा । **नास्ति** - कदाचिदपि नसिद्ध्यति । अतएव । **अयुक्तस्य** । **भावना** - विविक्तात्मविषयकध्यानरूपचिन्ताच । **नास्ति** । **अभावयतः** - आत्मानमचिन्तयतः । **शान्तिः** - विषयस्पृहानिवृत्तिश्च । **नास्ति** । **अशान्तस्य**- विषयस्पृहावतः । **सुखं**- नित्यनिरतिशयसुखप्राप्तिः । **कुतः** ॥ ६६॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्य स्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

पुनरपि स्वोक्तप्रकारेणेन्द्रियनियमनमकुर्वतो ऽ नर्थमाह (इन्द्रियाणामिति) चरतां- अनिगृहीततया स्वस्वविषयेषु यथेष्टं संचरताम् इन्द्रियाणाम् । यन्मनः । अनुविधीयते – अनुसारीक्रियते । तत मनः । अस्य - पुरुषस्य । प्रज्ञां - विविक्तात्मप्रवणाम् । वायुः प्रतिकूलवातः । अम्भसि । नीयमानाम् । नावमिव । हरतिहि विषयप्रवणां करोतीत्यर्थः ॥ ६७ ॥

इन्द्रियनिग्रहस्य स्थितप्रज्ञतासाधनत्व मुपसंहरति (तस्मादिति) तस्माद् - इन्द्रियनिग्रहाभावे ऽ नर्थस्योक्तत्वात् । हेमहाबाहो । यस्य - पुरुषस्य । सर्वशः – सर्वाणि । इन्द्रियाणि । इन्द्रियार्थेभ्यः । निगृहीतानि – उक्तप्रकारेण शुभाश्रयेमयिमनो निवेश्य नियमितानि । तस्य । प्रज्ञा । प्रतिष्ठिता भवति - आत्मनि स्थिताभवतीत्यर्थः ॥६८॥

एवं निगृहीतेन्द्रियस्य प्रसन्नमनस स्सिद्धिमाह (यानिशेति) या - आत्मविषयाबुद्धिः । सर्वभूतानाम् । निशा - रात्रिः, निशवा प्रकाशाभवति । तस्यां – आत्मविषयायां बुद्धौ । संयमी – नियमितेन्द्रियो योगी । जागर्ति – आत्मानमवलोकयन् प्रबुद्धोवर्तत इत्यर्थः । यस्यां - शब्दादिविषयायां बुद्धौ । भूतानि - सर्वाणि । जाग्रति - प्रबुद्धानिभवन्ति । सा– शब्दादिविषया बुद्धिः । पश्यतः-आत्मान मवलोकयतः । मुनेः –आत्ममननशीलस्य । निशा - निशेवाप्रकाशाभवति॥६९॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥
विहाय कामान्यः सर्वान्पुमांश्चरति निस्स्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छति ॥ ७२ ॥

इति श्रीभगवद्गीतायां द्वितीयोऽध्यायः ॥

यद्वत - यथा । आपूर्यमाणं – स्वेनैवपूर्णं सन्तम् । अचलप्रतिष्ठं - अचला - एकरूपा, प्रतिष्ठा – स्थितिः, यस्यतं तथोक्तम् । आपः - नदीजलानि । प्रविशन्ति । तद्वत - तथा । सर्वे । कामाः - शब्दादिविषयाः । यम् - संयमिनम् । प्रविशन्ति – इन्द्रियगोचरतां गच्छन्ति । सएव संयमी । शान्तिम् । आप्नोति । कामान् – शब्दादिविषयान्, कामयत इति कामकामी - शब्दादिभि र्विकृतचित्तः । नशान्तिमाप्नोति । यस्यसंयमिनोऽवर्जनीयशब्दादिविषयस्पर्शः ससमुद्रस्य नदीजलप्रवेश इव नकश्चिदपि विकारमावहति, सएव शान्तिमान् भवति, नान्य इति भावः ॥ ७० ॥

यः । पुमान् । सर्वान् । कामान् - शब्दादिविषयान् । विहाय - त्यक्त्वा । त्यागशब्दार्थमेवाह (निस्स्पृह इति) तेषु स्पृहा रहित इत्यर्थः । निर्ममः - अनात्मीयेषु देहानुबन्धिष्वात्मीयत्वाभिमान रूपममतारहितः । निरहंकारः – अनात्मनि देह आत्मत्वाभिमानरूपा हंकाररहितश्च सन् । चरति – स्वच्छन्दं चरति । सः । शान्ति मधिगच्छति - आत्मावलोकनं लब्ध्वा समस्तदुःखहानिं प्राप्नोतीत्यर्थः ॥ ७१ ॥

उक्तां ज्ञानकाष्ठां स्तुवन्नुपसंहरति (एषेति) हे पार्थ । एषा – नित्यात्मज्ञानपूर्विका । ब्राह्मी - ब्रह्मप्रापका । स्थितिः - ज्ञानकाष्ठा ।

एनां - ईदृशीं स्थितिम् । प्राप्य । पुमान् । नमुह्यति - पुन स्संसा-
रं नप्राप्नोतीत्यर्थः । अस्यां - स्थित्याम् । अन्तकालेपि । स्थित्वा ।
निर्वाणं - सुखरूपं । ब्रह्म - स्वात्मानं । ऋच्छति - प्राप्नोति ॥ ७२ ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवरमुनि
विरचितायां बालबोधिन्य पराभिधानायां
गीतार्थसंग्रह दीपिकायां

द्वितीयो ऽध्यायः ॥ २ ॥

श्रीः ।

अथ तृतीयोऽध्यायः ।

अर्जुन उवाच ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥
व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

एवं भगवत्प्राप्त्युपायभूत वक्ष्यमाणभक्त्यंग मात्मनित्यताज्ञान पूर्वक कर्मयोगनिष्पाद्यज्ञानयोगसाध्य मात्मावलोकन मुक्तम् । इतः पर मध्यायचतुष्टयेनेदमेव प्रत्यगात्मदर्शनसाधनं प्रपंच्यते । तत्र पूर्वाध्यायान्ते – "एषा ब्राह्मीस्थिति" रिति प्रशंसापूर्वकं ज्ञाननिष्ठाया उपसंहारा द्बुद्धिकर्मणो र्मध्ये बुद्धेरेव श्रैष्ठ्यं भगवतोऽभिमतं मत्वाऽर्जुनः पृच्छति (ज्यायसीति) हे जनार्दन । कर्मणः – कर्मापेक्षया। बुद्धिः – ज्ञाननिष्ठा । ज्यायसी – श्रेष्ठा । ते - तव । मता – सम्मता चेत् । तत् – तर्हि । हे केशव - कृष्ण । घोरे - हिंसात्मकतयाऽतिक्रूरे । कर्मणि - युद्धादिरूपे । किम् – किमर्थम् । माम् । नियोजयसि - प्रवर्तयसि ॥ १ ॥

हेकृष्ण । व्यामिश्रेण - क्वचित्कर्मप्रशंसा - क्वचिज्ज्ञानप्रशंसा चेत्येवं परस्परंविरुद्धेनैव । वाक्येन । मे - मम । बुद्धिं - मनः । मोहयसीव - भ्रमयन्निवप्रतिभासि । तत् – तस्मात्कारणात् । एकं - परस्पराविरुद्धार्थवाक्यं । वद । येन - वाक्येन । अहं । निश्चित्य - अनुष्ठेयमर्थं निर्णीय । श्रेयः – परमपुरुषार्थं । आप्नुयाम् – प्राप्स्यामि॥२॥

श्रीभगवानुवाच ।

लोके ऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम ॥ ३ ॥
न कर्मणा मनारम्भा न्नैष्कर्म्यं पुरुषो ऽश्नुते ।
नच संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥
नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्भकृत ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजै र्गुणैः ॥ ५ ॥

हे अनघ - विषयासंगजनकपापरहित । अस्मिन् - विचित्रा-धिकारिपूर्णे । लोके । मया - परमकारुणि केनाप्तमेनमया । द्वि-विधा - द्विप्रकारा । निष्ठा - स्थितिः । पुरा - पूर्वं । प्रोक्ता-प्रकर्षेणाभिहिता , यथाधिकार मसंकीर्णतयैवोक्तेत्यर्थः । तत्त्वयासम्य गनवधृतमितिभावः ॥ तदेवनिष्ठाद्वयमाह (ज्ञानेति) संख्या - विषयै रनुपहता आत्मैकविषयाबुद्धिः, तस्यास्सम्बन्धिन स्सांख्याः । योगिनः - विषयोपहतबुद्धयः कर्मयोगाधिकारिणः । तत्र सांख्यानां ज्ञानयोगेन योगिनां कर्मयोगेन चेतिद्विविधानिष्ठेति पूर्वेणान्वयः । अतो नकिं-चिदिहविरुद्धम्मया ऽभिहितमिति भावः ॥ ३ ॥

सर्वस्य लौकिकस्य पुरुषस्य मोक्षेच्छायां जातायां सहसैव ज्ञान योगो दुष्कर इत्याह (नेति) पुरुषः । कर्मणां - शास्त्रचोदित नित्य नैमित्तिकादीनाम् । अनारम्भात् - अनुपक्रमादेव । नैष्कर्म्यं - ज्ञान निष्ठाम् । नाश्नुते - नप्राप्नोति । सन्न्यसनादेव - आरब्धानां तेषां त्यागादेवच । सिद्धिं - ज्ञाननिष्ठारूपाम् । नसमधिगच्छति - नलभते । अनभिसंहितफलस्य परमपुरुषाराधनरूपस्य कर्मणः फलभूता ज्ञाननिष्ठा तेनविना विषयव्याकुलेन्द्रियैर्दुस्साधेति भावः ॥ ४ ॥

तदेवोपपादयति (नहीति) कश्चित् - पुरुषः । जातु - कदा-चित । क्षणमपि । अकर्मकृत् - कर्माकुर्वाणः । नहितिष्ठति - नाव

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्था न्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभते ऽर्जुन ।
कर्मेन्द्रियैः कर्मयोग मसक्तः स विशिष्यते ॥ ७ ॥

तिष्ठते । हि - यस्मात्कारणात । सर्वोपि - नकिंचिदपि करोमीति व्यवसितोपि समस्तःपुरुषः । प्रकृतिजैः - प्रकृतिसंभवैः । गुणैः - प्राचीनकर्म वासनानुगुणं प्रवृद्धैस्सत्त्वरजस्तमोभिः । कर्म - स्वानुरूपं कृत्यंप्रति । अवशः - स्ववशरहितएव । कार्यते - प्रवर्त्यते । अतोवासनाहेतुं प्राचीनं कर्मनाशयित्वा सत्त्वादिगुणांश्चवशीकृत्य ज्ञानयोगस्संपाद्यइतिभावः ॥५॥

असंगकर्माकरणे ज्ञानयोगायप्रवृत्तो मिथ्याचारोभवतीत्याह (कर्मेन्द्रियाणीति) यः - ज्ञाननिष्ठः । कर्मेन्द्रियाणि- वाक्पाण्यादीनि । संयम्य - सम्यङ्निगृह्य , कर्मयोगमकुर्वन्नित्यर्थः । विमूढात्मा - अविदितात्मस्वरूप याथात्म्यः , अनादिपापवासनाविवशः । मनसा । इन्द्रियार्थान् - शब्दादीन् । स्मरन् - ध्यायन् । आस्ते - तिष्ठति । सः । मिथ्याचारइत्युच्यते । अन्यथा संकल्प्यान्यथा ऽऽचरणादिति भावः॥६॥

हे अर्जुन । यस्तु - पुरुषः । मनसा - आत्मावलोकनप्रवृत्तेन चेतसा । इन्द्रियाणि - वाक्पाण्यादीनि । नियम्य - पूर्वाभ्यस्त विषयसजातीय शास्त्रीयकर्मविषयतया संयम्य । कर्मेन्द्रियैः - स्वतएव कर्मप्रवणै र्वाक्पाण्यादिभिः । असक्तः - फलाभिलाषरहितस्सन् । कर्मयोगम् । आरभते । सः । विशिष्यते - ज्ञाननिष्ठादप्यतिरिच्यत इत्यर्थः ॥ ५ ॥

नियतं कुरु कर्म त्वं कर्मज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥
यज्ञार्था त्कर्मणो न्यत्र लोकोयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्व मेष वो स्त्विष्टकामधुक् ॥ १० ॥

नियतं - अनादिकालाभ्यस्तम् । कर्म - नित्यनैमित्तिकादिकम् । त्वम् । कुरु - आचर । हि - यस्मात्कारणात् । अकर्मणः - ज्ञान निष्ठायाअपि । कर्मैव । ज्यायः - श्रेष्ठम् । सर्वकर्मत्यागेहि ज्ञाननिष्ठैव दुर्लभेत्याह (शरीरेति) अकर्मणः - कर्माण्यनाचरतः । ते - ज्ञान निष्ठस्य तव । शरीरयात्रापि - ज्ञाननिष्ठोपयोगि देहधारणमपि । न प्रसिद्ध्येत् - नसेत्स्यति । ज्ञाननिष्पत्तिपर्यन्तं हि शरीरधारण मावश्यकम् , शरीरधारणंच न्यायार्जित धनेन महायज्ञादिकं कृत्वा तच्छेषाशनेनैव कर्तव्यमिति भावः ॥ ८ ॥

नन्वेवं द्रव्यार्जनादेः कर्मणस्सर्वेन्द्रियव्याकुलता गर्भत्वेना स्य पुरुषस्य पुनःकर्मबन्धनमेव स्यादित्या शंक्याह (यज्ञार्थादिति) यज्ञार्थात् - शास्त्रीयकर्मविशेषशेषभूतात् । कर्मणः - द्रव्यार्जनादि रूपात् । अन्यत्र - अन्यस्मिन् स्वप्रयोजनशेषभूते कर्मणि । क्रियमाणे सतीति शेषः । अयंलोकः । कर्मबन्धनः - कर्मबद्धः । भवति । अतः । हेकौन्तेय । तदर्थं - यज्ञविशेषभूतम् । कर्म - द्रव्यार्जनादि कम् । मुक्तसंगः - मुक्तः - त्यक्तः , संगः - आत्मार्थत्व रूपः , येन तथोक्तस्सन् । समाचर - कुरुष्व ॥ ९ ॥

सकलपुरुषार्थसाधननिष्ठानां यज्ञशिष्टेनैव शरीरधारणस्य कर्तव्यतामाह (सहेति) प्रजापतिः - सर्वेश्वरः परमात्मा । पुरा -

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥
इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्ता न प्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

सर्गकाले । सहयज्ञाः – स्वाराधनभूतमद्यायज्ञैस्सहिताः । प्रजाः । सृष्ट्वा । उवाच – उक्तवान् । किमित्यत्राह (अनेनेति) हेप्रजाः । अनेन- यज्ञेन । प्रसविष्यध्वं – प्रसूयध्वम् । प्रसवोवृद्धिः , उत्तरोत्तराभि वृद्धिं लभध्वमित्यर्थः । अत्र हेतुमाह (एषइति) एषः– यज्ञः । वः - युष्मा- कम् । इष्टकामधुक् - इष्टं - परमपुरुषार्थलक्षणमोक्षं, कामान् – तदनुगुणपुरुषार्थांश्च, दोग्धि – पूरयतीति तथोक्तः । अस्तु · भू- यात् । इत्युवाचेति पूर्वेणान्वयः ॥ १० ॥

हेप्रजाः । अनेन – यज्ञेन । देवान् – मच्छरीर भूतान् मदात्म- कान् । भावयत – आराधयत । तेदेवाः – मदात्मकादेवाः । वः– युष्मान् । भावयन्तु - स्वाराधनापेक्षितान्नपानादिकै र्वर्धयन्तु । एवं । परस्परं · अन्योन्यम् । भावयन्तः - वर्धयन्तः । परं । श्रेयः - मो- क्षाख्यम् । अवाप्स्यथ ॥ ११ ॥

यज्ञभाविताः - यज्ञैराराधिताः । मदात्मकाः । देवाः । वः – युष्माकम् । इष्टान् – उत्तरोत्तरस्वाराधनापेक्षितान् । भोगान् । दा- स्यन्ते - वितरिष्यन्ति । तैः - देवैः । दत्तान् - स्वाराधनार्थं वितीर्णान् । भोगान् । एभ्यः - देवेभ्यः । अप्रदाय – अदत्वा । तैस्तदाराधनरूपं कर्माकृत्वेति यावत् । यः - पुरुषः । भुङ्क्ते - आत्मपोषणं करोति । सः । स्तेनः - चोरएव । अतोऽस्य न परमपुरुषार्थानर्हता मात्रम् , किन्तु निरयगामित्वंचेति भावः ॥ १२ ॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥
अन्ना द्भवन्ति भूतानि पर्जन्या दन्नसम्भवः ।
यज्ञा द्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मा त्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

एतदेव विवृणोति (यज्ञेति) यज्ञस्य - देवान्तर्यामि परमपुरुषाराधनरूप महायज्ञस्य, शिष्टं-शेषभूतमन्नादिकं,अश्नन्ति-भुञ्जते, ज्ञाननिष्ठोपयोगि शरीरयात्रां कुर्वन्तीति यज्ञशिष्टाशिनः । सन्तः- सत्पुरुषाः। सर्वकिल्बिषैः आत्मयाथात्म्यावलोकनविरोधि समस्तपापैः । मुच्यन्ते मुक्ताभवन्ति । येतु- पुरुषाः । आत्मकारणात् - आत्मनोहेतोः, केवलमात्मार्थमितियावत् । पचन्ति । ते । पापाः पापात्मानः । अघं - पापमेव - भुंजते ॥ १३ ॥

पुनरपि यज्ञानुवर्तनस्या वश्यकता मननुवर्तने दोषं चाह "अन्नादि" त्यादिश्लोकत्रयेण । अन्नात् । भूतानि - देवमनुष्यादिसमस्तभूतानि । भवन्ति - जायन्ते । अन्नसम्भवः - अन्नोत्पत्तिः । पर्जन्यात् । भवति । पर्जन्यः- वृष्टिः । यज्ञात् । भवति । यज्ञः । कर्मसमुद्भवः कर्मणः - द्रव्यार्जनादि रूपात्, समुद्भवः - उत्पत्तिः, यस्य तथोक्तः । भवति ॥ १४ ॥

कर्म । ब्रह्मोद्भवं - ब्रह्म प्रकृतिः, तत्परिणामरूपं शरीर मित्यर्थः - तदुद्भवम् । विद्धि - जानीहि । ब्रह्म - शरीरम् । अक्षरसमुद्भवं । अक्षरः - जीवः, तत्समुद्भवम् । जीवाधिष्ठितंहि शरीरं कर्मणे भवतीति भावः । तस्मात् । सर्वगतं । समस्तपुरुषार्थसाधन अधिकृतम् । ब्रह्म । शरीरम् । नित्यं - सततम् । यज्ञे प्रतिष्ठितम् । यज्ञमूलकमित्यर्थः ॥ १५ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायु रिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥
यस्त्वात्मरति रेव स्या दात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्ट स्तस्य कार्यं न विद्यते ॥१७॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चि दर्थव्यपाश्रयः ॥ १८ ॥

हे पार्थ । एवं - अनेन प्रकारेण । परमपुरुषेण । प्रवर्तितम् । चक्रम् । इह - लोके । यः । नानुवर्तयति - नप्रवर्तयति । सः । अघायुः - अघस्वरूपायुः । अत एव । इन्द्रियारामः - विषयभोगैक रति स्सन् । मोघं । व्यर्थमेव । जीवति ॥ १६ ॥

मुक्तस्यैव महायज्ञादिवर्णाश्रमोचितकर्मानारम्भ इत्याह (यस्त्विति) यस्तु । मानवः - मनुष्यः । अत्र मनुष्यस्य तुशब्देन ज्ञानयोगकर्म योगनिरपेक्षात्मदर्शनवत्त्वरूपवैलक्षण्यं द्योत्यते । आत्मरतिः - आत्म न्येव, रतिः -आभिमुख्यं , यस्य स तथोक्त एव स्यात् । आत्मतृप्तः- अन्नपानादिभि र्विना आत्मनैव , तृप्तः - निर्वृतः । आत्मन्येव- स्रक्चन्दनोद्यानादिभि र्विना , आत्मस्वरूपमात्रविषये । सन्तुष्टश्च । स्यात् । तस्य । कार्यं - कर्तव्यं कर्म । नविद्यते ॥ १७ ॥

तत्र हेतु माह (नेति) तस्य - पुरुषस्य । कृतेन - कर्मणा । अर्थः - प्रयोजनम् । नैवास्ते । अकृतेन – कर्माकरणेन । कश्चन- कश्चिदप्यनर्थः । इह । न । अस्य । सर्वभूतेषु - सर्वेषु , भूतेषु । प्रकृतिपरिणामविशेषेषु सकार्येष्वाकाशादिभूतेषु । अर्थव्यपाश्रयः । अर्थः – प्रयोजनभूतः , व्यपाश्रयः - व्यपाश्रयणीयः । कश्चिच्च - कश्चिदपि पदार्थः । नविद्यते ॥ १८ ॥

तस्मा दसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः [म् । ॥ १९ ॥
कर्मणैव हि संसिद्धि मास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तु मर्हसि ॥ २० ॥
यद्यदाचरति श्रेष्ठ स्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोक स्तदनुवर्तते ॥ २१ ॥

तस्मात् - कारणात्। असक्तः - संगरहितस्सन्। सततं - यावदात्मप्राप्ति। कार्य-अवश्यकर्तव्यम्। कर्म-महायज्ञादिरूपं कर्म योगं। समाचरं - अवश्यकर्तव्यमिति बुद्ध्यासमाचरेत्यर्थः। असक्तः। कर्म। आचरन्। पूरुषः। परं - आत्मानं। आप्नोति ॥ १९ ॥

अस्मिन्नर्थे सदाचारं प्रमाणयति (कर्मणैवेति) जनकादयः जनकप्रभृतयो ज्ञानिनामग्रेसरा राजर्षयः। कर्मणैव - कर्मयोगेनैव। संसिद्धिं - कर्ममोक्षं, आत्मप्राप्तिलक्षणं ज्ञानयोगफलमिति यावत्। आस्थिताः - प्राप्तवन्तः। इतिप्रसिद्धौ ॥

पूर्वं कर्मयोगाधिकारिणइव ज्ञानयोगाधिकारिणोपि कर्मयोगएवश्रेया नित्युक्तम्। इदानीं व्यपदिष्टस्य सर्वथा कर्मयोगएव कार्यइत्याह " लोकसंग्रह " मित्यादिना सार्धश्लोकेन। लोकसंग्रहं लोकानां - लौकिकजनानां, संग्रहं - स्वानुष्ठानप्रदर्शनेन तत्तद्धर्मप्रवर्तनं। संपश्यन्- प्रयोजनत्वेनपश्यन्नपि। कर्म। कर्तुमेव। अर्हसि, नत्यक्तुमित्यर्थः ॥ २० ॥

तत्र हेतुमाह (यद्यदिति) श्रेष्ठः - ज्ञानानुष्ठानाभ्यां प्रथितः पुरुषः। यद्यत् - कर्म। आचरति। इतरः - अकृत्स्नवित ज नोपि। तत्तदेव। आचरति। सः-श्रेष्ठः। अनुष्ठीयमानमपिकर्म। यत्प्रमाणं- यत्, प्रमाणं - परिमाणं, यस्यतत यत्प्रमाणं - यावदंगयुक्तं। कुरुते अनुतिष्ठति। लोकः। तदेव - तावदङ्गयुक्तमेव। अनुवर्तते -अनुतिष्ठति।

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्त मवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥
उत्सीदेयु रिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्या मुपहन्या मिमाः प्रजाः ॥ २४ ॥

अतोलोकरक्षणार्थं शिष्टैःसतासकलं कर्मसर्वदाऽनुष्ठेयं, अन्यथा लोक नाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेदितिभावः ॥ २१ ॥

अहमेवास्मिन्नर्थे निदर्शनमिति " नमेपार्थे " त्यादिश्लोकत्रयेणाह । हेपार्थ । मे-सर्वेश्वरस्य मम । कर्तव्यं-अनुष्ठेयंकर्म । नास्ति । कुतइत्यत्राह (त्रिष्विति) त्रिषु लोकेषु । अनवाप्तं-इतःपूर्वमप्राप्तं । अवाप्तव्यं-कर्मणाप्राप्तव्यं । किञ्चन-किंञ्चिदपि । नविद्यते । चकारोऽप्यर्थः । तथापि । कर्मणि - वर्णाश्रमोचित नित्यनैमित्तिकादौ । वर्तएव-प्रर्वतेएव । कर्मकरोम्येवेत्यर्थः ॥ २२ ॥

स्वस्य कर्माकरणे लोकस्य हानिं दर्शयति (यदीति) हे पार्थ । अहं - शिष्टाग्रेसरवसुदेवकुले वतीर्णः । जातु - कदाचित् । अतन्द्रितः - अनलसस्सन् । कर्मणिनवर्तेयंयदि - कर्मनानुतिष्ठेयंचेत् । सर्वशः - सर्वे । मनुष्याः - अकृत्स्नविदः - कर्माधिकारिणः । मम - श्रेष्ठतमस्य । वर्त्म - निवृत्तिमार्गम् । अनुवर्तन्ते - अयमेव धर्म इत्यनुसरेयुः । हिःप्रसिद्धौ ॥ २३ ॥

अहम् । कर्म - कुलोचितम् । नकुर्यांचेत् । इमे । लोकाः - अकृत्स्नविदशिष्टाजनाः । उत्सीदेयुः - शास्त्रीयकर्माकरणजनित प्रत्यवायेन नष्टाभवेयुः । संकरस्य - अव्यवस्थायाः । कर्ताच । स्यां - भवेयम् । अतएव । इमाः । प्रजाः । उपहन्यां - निरयपातिनीः

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्या द्विद्वां स्तथा सक्त श्चिकीर्षु र्लोकसंग्रहम् ॥ २५ ॥
न बुद्धिभेदं जनये दज्ञानां कर्मसंगिनाम् ।
जोषये त्सर्वकर्माणि विद्वा न्युक्त स्समाचरन् ॥ २६ ॥
प्रकृतेः क्रियमाणानि गुणैःकर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमितिमन्यते ॥ २७ ॥

कुर्यामित्यर्थः । अतो मद्व्यपदिष्टेन त्वयापि कर्मण्येव वर्तितव्यमिति भावः ॥ २४ ॥

आत्मविदोपि लोकसंग्रहार्थं कर्मकर्तव्यमित्युक्त मुपपाद्यते (सक्तइति) कर्मणि । सक्ताः अवर्जनीयसम्बन्धाः । अविद्वांसः - अकृत्स्नात्मविदो जनाः । यथा - येनप्रकारेण । कुर्वन्ति - कर्माचरन्ति । तथा - तेनप्रकारेण । विद्वान् - कृत्स्नात्मविज्ञनोपि । असक्तः - संगरहितः । लोकसंग्रहम् - लोकसंरक्षणम् । चिकीर्षुः - कर्तुमिच्छुस्सन् । कुर्यात् - कर्मयोगमेवाचरेत् ॥ २५ ॥

अज्ञानां – आत्मन्य कृत्स्नविदाम् । कर्मसंगिनां - कर्मयोगाधिकारिणा म्मुमुक्षाणाम् । बुद्धिभेदं - कर्मयोगादन्यदात्मावलोकन साधनमस्तीत्येवं बुद्ध्यन्तरम् । नजनयेत् । किन्तु । विद्वान् - आत्मनिकृत्स्नविदपि । युक्तः । कर्मयोगएव ज्ञानयोगनिरपेक्ष आत्मावलोकन साधनमिति बुद्ध्यायुक्तस्सन् । सर्वकर्माणि । समाचरन् – सम्यगाचरन् । जोषयेत् – प्रीतिजनयेत्, कर्मसंगिनामित्यनुषंगः ॥ २६ ॥

कर्मयोगापेक्षित मात्मनो ऽ कर्तृत्वानुसन्धान प्रकारमुपदिशति (प्रकृतेरिति) अहंकारविमूढात्मा– अहंकारेण - अनात्मन्यात्माभिमानेन, विमूढः - अविदितः, आत्मायेन सतथोक्तः । पुरुषः । प्रकृतेः, सम्बन्धिभिः । गुणैः - सत्वरजस्तमोभिः कर्तृभिः । स्वानुरूपम्,

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणागुणेषु वर्तत इति मत्वा न सज्जते ॥ २८ ॥
प्रकृतेर्गुणसंमूढाः सज्जंतेगुणकर्मसु ।
तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

क्रियमाणानि । सर्वशः - सर्वाणि । कर्माणिप्रति । अहंकर्तेति ॥ मन्यते - भ्रमतीत्यर्थः ॥ २७ ॥

हेमहाबाहो । गुणकर्मविभागयोः - गुणाः - सत्त्वरजस्तमांसि , कर्माणिच - तत्कृतानि, तेषां यौ, विभागौ- विवेकौ, तयोः । तत्त्ववित्- तत्त्वज्ञो विद्वांस्तु । गुणाः - सत्त्वादयः । गुणेषु - स्वकार्येषु । वर्तन्ते - प्रवर्तन्ते । इति - अनेन प्रकारेण । मत्वा । नसज्जते - कर्मस्वहंकर्तेत्येवं रूपं संगं नप्राप्नोति ॥ २८ ॥

" नबुद्धिभेद " मित्युक्त मुपसंहरति (प्रकृतेर्गुणसम्मूढा इति) प्रकृतेः - शरीराकारेणपरिणतस्य भूतसूक्ष्मस्य , गुणसम्मूढाः -गुणैः - सत्त्वरजस्तमोभिः , सम्मूढाः - अविदितात्मस्वरूपा आत्मावलोकनाय प्रवृत्ताजनाः । गुणकर्मसु- गुणैः क्रियमाणासुक्रियास्वेव । सज्जन्ते- सक्ताभवन्ति , नतु गुणकर्मविविक्तात्मस्वरूप इत्यर्थः । तथाच - तेषां ज्ञानयोगानधिकारात्कर्मयोग एवाधिकार इति भावः ॥ अतः । अकृत्स्नविदः - कात्स्र्न्येनाविदितात्मस्वरूपाः, तान् । मन्दान् - मन्दमतीन् । कृत्स्नवित् - कात्स्र्न्येनविदितात्मस्वरूपः पुरुषः । नविचालयेत - स्वयमननुष्ठानेन कर्मयोगान्नच्यावयेदित्यर्थः । प्रकृतिविविक्तात्मस्वरूपज्ञानेन ममेदं कर्तृत्वं नस्वरूपप्रयुक्तम् , किन्तु गुणसम्पर्क कृतमिति गुणेषु कर्तृत्वारोपणमेव स्वस्या कर्तृत्वानुसन्धानमित्युक्तं भवति ॥ २९ ॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

ये मे मतमिदं नित्य मनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

एवं गुणेषु कर्तृत्व मारोप्य कर्मानुष्ठानप्रकार उक्तः । इदानीं स्वस्य भगवदेकनियाम्यताज्ञानेन भगवति गुणकृतंच कर्तृत्व मारोप्य कर्मानुष्ठान माह (मयीति) अध्यात्मचेतसा - आत्मैकविषयेण मनसा । सर्वाणि - गुणसंसर्गकारितानि । कर्माणि । मयि - सर्वात्मभूते । सन्न्यस्य - त्यक्त्वा, सर्वेश्वर स्स्वयमेव कर्माणि कारयती त्यनुसन्धायेत्यर्थः । निराशीः - क्रियमाणकर्मफले निष्कामः । निर्ममः - तेषु कर्मसु ममकाररहितः । विगतज्वरः - विगतः, ज्वरः - अनादिकालप्रवृत्तानन्तपापसंचयेन कथ महं भविष्यामीति सन्तापः, यस्य स तथोक्तः; परमपुरुष एव कर्मभि राराधित स्सर्वेभ्यः पापेभ्यो मां मोक्षयतीति निर्भर स्सन्नित्यर्थः । युध्यस्व - युद्धरूपं कर्मयोगं कुर्वित्यर्थः ॥ ३० ॥

अयं मेव साक्षा दुपनिषत्सारभूतो ऽर्थ इत्याह (येम इति) । मानवाः - शास्त्राधिकारिणः । मे - मम । इदम् । मतं - सिद्धान्तम् । नित्यम् । अनुतिष्ठन्ति - आचरन्ति । येपि । श्रद्धावन्तः - अननुतिष्ठन्तो प्यस्मि न्नर्थे आस्तिक्यबुद्धिमन्तः । येपि । अनसूयन्तः - श्रद्धारहिता अपि एवं शास्त्रार्थो न सम्भवतीत्यस्मि न्महागुणे शास्त्रार्थे दोष मनाविष्कुर्वन्तो भवन्ति । तेपि । कर्मभिः - संसारहेतुभि स्सर्वैः कर्मभिः । मुच्यन्ते - मुक्ता भवन्ति ॥ ३१ ॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥
सदृशं चेष्टते स्वस्याः प्रकृते र्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

उक्तं स्वाभिमत मर्थ मननुतिष्ठता मश्रद्धधानाना मभ्यसूयतां च दोष माह (येत्वेतदिति) येतु - पुरुषाः । एतत् । मे - मम । मतं - अभिमत मर्थम् । नानुतिष्ठन्ति - उक्तरीत्या ऽकर्तृत्वानुसन्धानपूर्वकं सर्वाणि कर्माणि न कुर्वन्तीत्यर्थः । येच । अभ्यसूयन्तः । वर्तन्ते । न श्रद्दधत इति चार्थसिद्धम् । तान् । सर्वज्ञान विमूढान् - सर्वेषु ज्ञानेषु विशेषेण मूढान् - चिदचिदीश्वरतत्त्वहित पुरुषार्थज्ञानेषु केनापि ज्ञानेन विहीनानित्यर्थः । अत एव । नष्टान् - सत्ताशून्यान् । ज्ञानेन हि सत्तालाभ इति भावः । अचेतसः - न विद्यते , चेतः - मनः, येषां ते तथोक्ताः, तान् - वस्तुयाथात्म्य ज्ञानरूपकार्याभावा दमनस्कप्रायानित्यर्थः । विद्धि - जानीहि ॥ ३२ ॥

ज्ञानयोगाधिकारिणः कर्मयोगाधिकारिणश्च कर्मयोग एव कर्तव्यः, व्यपदिष्टस्यतु विशिष्य स एव कर्तव्य इत्युक्तम् । अतः परमध्यायशेषेण ज्ञानयोगस्य दुष्करतया सप्रमादतोच्यते ।

ज्ञानवान् - प्रकृतिविविक्तात्मस्वरूपं जानन्नपि । स्वस्याः-स्वकीयायाः । प्रकृतेः - प्राचीनवासनायाः । सदृशं - अनुगुणमेव । चेष्टते - प्रकृतिविषयेष्वेवव्याप्रियतइत्यर्थः । कुतइत्यत्राह (प्रकृतिमिति) भूतानि - अचित्संसृष्टजन्तवः । प्रकृतिं - अनादि कालप्रवृत्तवासनामेव । यान्ति - अनुवर्तन्ते । निग्रहः - शास्त्र जन्यज्ञानरूपः । तानिभूतानि । किंकरिष्यति - किंकर्तुंसमर्थः । बलीयसीह्यनादिवासनेतिभावः ॥३३॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयो र्न वशमागच्छे त्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥
श्रेयान् स्वधर्मो विगुणः परधर्मा त्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

भूतानां प्रकृत्यनुवर्तनप्रकारमेवाह (इन्द्रियस्येति) इन्द्रियस्य - श्रोत्रादेर्ज्ञानेन्द्रियस्य । इन्द्रियस्य - वागादिकर्मेन्द्रियस्य । अर्थे - शब्दादिरूपे वचनादि रूपेचविषये । रागद्वेषौ - रागः - तदनुभवेच्छा, द्वेषः - तदनुभवप्रतिहतौ सत्यांक्रोधः । व्यवस्थितौ - अवर्जनीयौ । तथाच तावेवज्ञानयोगाय यतमानंनियमित सर्वेन्द्रियं पुरुषं स्ववशीकृत्यप्रसह्य विषयैस्संघटयतः, ततश्चायमात्मानुभव विमुखोविनष्टोभवेदितिभावः । अतः । तयोः - रागद्वेषयोः । वशं - अधीनतां। नागच्छेत् । सहसैवज्ञानयोगारम्भेहि तत्पारवश्य मनिवार्यमितिभावः ॥ तत्रहेतुमाह (ताविति) हि - यस्मात्कारणात । अस्य - ज्ञानयोगिनोमुमुक्षोः । तौ - रागद्वेषौ । परिपन्थिनौ - दुर्जयौप्रतिपक्षावित्यर्थः ॥३४॥

ननु युद्धादिरूपः कर्मयोगोपि दुःखरूपत्वा द्यथावत्कर्तुमशक्य इत्यत्राह (श्रेयानिति) स्वधर्मः - प्रकृतिसंसृष्टपुरुषस्य पूर्वाभ्यस्त सजातीयतया स्वतएवप्राप्तत्वा त्स्वधर्मभूतः कर्मयोगइत्यर्थः । विगुणोपि - अंगविकलोपि । स्वनुष्ठितात् - सांगमनुष्ठितात । परधर्मात् - पूर्वमनभ्यस्ततया स्वतोऽप्राप्तत्वेन परधर्मभूताज्ज्ञानयोगादपि । श्रेयान्-श्रेष्ठः । स्वधर्मे - स्वधर्मभूते कर्मयोगे । वर्तमानस्येतिशेषः । निधनं - तस्मिन्जन्मनि फलमप्राप्यैव मरणमपि । श्रेयः - श्रेष्ठं । अनन्तर जन्मन्य प्रतिहतकर्मयोगारम्भ सम्भवादितिभावः । परधर्मः - ज्ञानयोगस्तु । भयावहः - सप्रमादत्वा द्भयंकरः ॥३५॥

अर्जुन उवाच।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

श्रीभगवानुवाच।

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥
धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

हेवार्ष्णेय ? अथेतिप्रश्ने । अयं - ज्ञानयोगायप्रवृत्तः । पूरुषः । अनिच्छन्नपि - विषयानुभव मनाकांक्षन्नपि । केन - हेतुना । प्रयुक्तः - प्रेरितः । बलान्नियोजितइव - बलात्कारेण नियुक्तइव । पापं - विषयानुभवरूप मनर्थम् । चरति प्राप्नोति ॥ ३६ ॥

एषः - त्वया पृष्टो हेतुः । रजोगुणसमुद्भवः - रजोगुणजनितः । काम एष - शब्दादिविषयको राग एव । एषः - काम एव । क्रोधः । काम एवहि प्रतिहतगति स्सन् प्रतिहतिहेतुभूतचेतनान्प्रतिक्रोधात्मना परिणमति । किंच । महाशनः - महत , अशनं, यस्य स तथोक्तः । सकृद्विषयानुभवदानेन समाधातु मशक्यो दुष्पूर इत्यर्थः । विषये ष्वेव सर्वदा पुरुषं प्रवर्तयतीति स, महा पाप्मा - क्रोधाकारेण परिणतो ऽतिक्रूर इत्यर्थः । परहिंसादौ प्रवर्तकत्वादिति भावः । अतः । एनं - रजोगुणसमुद्भवं काममेव । इह - ज्ञानयोगे । वैरिणं - विरोधिनम् । विद्धि जानीहि ॥ ३७ ॥

कामस्य वैरित्वमेव दर्शयति (धूमेनेति) यथा । वह्निः - अग्निः । धूमेन । आव्रियते - आवृतो भवति । यथाच । आदर्शः - मुकुरः । मलेन - मालिन्येन । आव्रियते । यथावा । गर्भः ।

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

इन्द्रियाणि मनो बुद्धि रस्याधिष्ठान मुच्यते ।
एतै र्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

तस्मा त्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहीह्येनं ज्ञानविज्ञान नाशनम् ॥ ४१ ॥

उल्बेन - जरायुणा । आवृतः - आच्छादितः । तथा - तेन प्रकारेण । इदं - जन्तुजातं । तेन - कामेन । अवृतं ॥ ३८ ॥

आवरणप्रकारमेवाह (आवृतमिति) हे कौन्तेय ! ज्ञानिनः - ज्ञानगुणकस्य जन्तोः । ज्ञानं - आत्मविषयं ज्ञानं । दुष्पूरेण - स्वरूपविरुद्धतया प्राप्त्यनर्हविषयेण । अनलेन - पर्याप्तिरहितेनच । कामरूपेण । एतेन । नित्यवैरिणा - सन्ततविरोधिना । आवृतं - आच्छादितम् ॥ ३९॥

कैरुपकरणैरयं कामआत्मानमधितिष्ठतीत्यत्राह (इन्द्रियाणीति) अस्य - कामस्य । इन्द्रियाणि - चक्षुरादीनि । मनः - अन्तःकरणं । बुद्धिः - अध्यवसायश्च । अधिष्ठानं - आत्माधिष्ठानोपकरणं । एषः - कामः । एतैः - इन्द्रियादिभिरुपकरणैः । ज्ञानं - आत्मस्वरूपयाथात्म्यविषयं । आवृत्य - आच्छाद्य । देहिनं - शरीरिणं । विमोहयति - विविधंमोहयति । आत्मानुभवविमुखं विषयानुभव प्रवणंचकरोतीतिभावः ॥४०॥

हेभरतर्षभ । तस्मात् - कारणात् । त्वं - प्रकृतिसंसृष्टतयेन्द्रिय व्यापार प्रवणोभवान् । आदौ - मोक्षोपायारम्भ समयएव । इन्द्रियाणि - श्रोत्रादीनि । नियम्य - तद्व्यापारानुगुण कर्मयोग वियतया संयम्य । ज्ञानविज्ञाननाशनं - ज्ञानं - शरीरातिरिक्तात्मस्वरूपविषयकं, विज्ञानं - तद्विवेकविषयकं , तयोः, नाशनं -

इन्द्रियाणि पराण्याहु रिन्द्रियेभ्यः परं मनः ।
मनसस्तु पराबुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीभगवद्गीतायां तृतीयोध्यायः ॥ ३ ॥

नाशकरं । एनं - कामरूपं । पाप्मानं - वैरिणं । प्रजहीहि - प्रकर्षेणत्यज , नाशयेत्यर्थः ॥४१॥

इन्द्रियाणि - श्रोत्रादीनिदश । पराणि - ज्ञानविरोधिषु प्रधानानि । आहुः । शास्त्राणीतिशेषः । यतइन्द्रियेषु विषयव्यापृतेष्वात्मविषयं ज्ञानंनजायते । इन्द्रियेभ्योपि । मनः । परं - प्रधानं । इन्द्रियेषूपरतेष्वपि मनसिविषयप्रवणे ह्यात्मज्ञानंनजायते । मनसस्तु । बुद्धिः - अध्यवसायः । परा - प्रधानभूता । मनसि वृत्त्यन्तर विमुखेपि विपरीताध्यवसाय प्रवृत्ता वात्मज्ञानंनजायते । सतु - कामस्तु । यः । बुद्धेरपि । परतः - प्रधानभूतः । सः - सर्वज्ञानविरोधि विलक्षणइत्यर्थः । सएवहि सर्वाणीन्द्रियादीनि विषयेषुवर्तयित्वा ऽऽत्मज्ञानंनिरुणद्धीतिभावः ॥४२॥

उक्तमर्थमुपसंहरति (एवमिति) हेमहाबाहो । एवं - उक्तप्रकारेण । बुद्धेरपि । परं - कामं । बुध्वा - ज्ञात्वा । आत्मानं मनः । आत्मना - अध्यवसायरूपयाबुद्ध्या । संस्तभ्य - कर्मयोगेव्यवस्थाप्य । दुरासदं - मत्परेभ्यो ऽन्यैर्दुर्जयं । कामरूपं । शत्रुं - ज्ञानयोगवैरिणं । जहि - नाशय ॥४३॥

इतिश्रीभगवद्गीता भाष्यार्थसंग्रह तात्पर्यदीपे श्रीवरवरमुनि विरचितायां बालबोधिन्य पराभिधानायां गीताविवृतौ गीतार्थसंग्रहदीपिकायां

तृतीयो ऽध्यायः ॥ ६ ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीमते वरवरमुनयेनमः ।

अथ चतुर्थो ऽध्यायः ।

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानह मव्ययम् ।
विवस्वा न्मनवे प्राह मनु रिक्ष्वाकवेऽब्रवीत् ॥ १ ॥
एवं परम्पराप्राप्त मिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

एवं मध्यायद्वयेन कर्मयोगस्य मोक्षसाधनत्व मुक्त्वा तमेव प्रपंचयिष्यन् प्रथमं स्वत्सम्प्रदायप्राप्तत्वेन तमेव प्रशंसति " इम " मित्यादिश्लोकत्रयेण ।

अहम् । अव्ययं - अपायरहितम् । इमम् - पूर्वोक्तम् । योगं - कर्मयोगम् । विवस्वते - सूर्याय । प्रोक्तवान् - उपदिष्टवान् । विवस्वान् - सूर्यः । मनवे - वैवस्वताय । प्राह । मनुः - वैवस्वतः । इक्ष्वाकवे - स्वपुत्राय । अब्रवीत ॥ १ ॥

हे परन्तप । एवं - उक्तप्रकारेण । परम्पराप्राप्तं - सम्प्रदायागतम् । इमं - कर्मयोगम् । राजान श्च ते ऋषयश्च - राजर्षयः - जनकादयः । विदुः । ननु युद्धप्रोत्साहनायेदानीमेव मया प्रोक्त इति भावः । सः - कर्मयोगः । इह - लोके । महता - दीर्घेण । कालेन । नष्टः - विच्छिन्नः ॥२ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

अर्जुन उवाच ।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथ मेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

श्रीभगवानुवाच ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि नत्वं वेत्थ परन्तप ॥ ५ ॥

स एव - विवस्वदाद्युपदिष्टप्रकार एव, अस्खलितरूप इति यावत । अत एव । पुरातनः । अयम् । योगः - कर्मयोगः । मे - मम । भक्तः - भक्तिमान् । सखा - मित्रंच । असि - भवसि । इति - हेतोः । ते - प्रपन्नाय तुभ्यम् । अद्य - अधुना, तव युद्ध निवृत्तिसमये । मया - दुष्टनिग्रहायावतीर्णेन मया । प्रोक्तः - प्रकर्षेणोक्तः, सविस्तर मुक्त इत्यर्थः । एतत । उत्तमं - परमम् । रहस्यं - गुह्यं हि ॥ ३ ॥

अस्मिन् प्रसंगे भगवदवतारयाथात्म्यं यथावज्ज्ञातु मर्जुनः पृच्छति (अपरमिति) हे कृष्ण । भवतः - तव । जन्म । अपरं - सन्निकृष्टम्, अस्मज्जन्मसमकालम् । विवस्वतः - सूर्यस्य । जन्मतु । परं - विप्रकृष्टम् । अष्टाविंशतियुगकालव्यवहित मित्यर्थः । त्व मेव । आदौ - पूर्वम् । प्रोक्तवानिति - सूर्याय प्रोक्तवानिति । एतत - असम्भावनीय मिम मर्थम् । कथं - केन प्रकारेण । विजानीयां - यथार्थं जानीयाम् ॥ ४ ॥

हे अर्जुन ! तवच - तवेव । मे - मम । बहूनि - असंख्येयानि । जन्मानि - अवताराः । व्यतीतानि - अतिक्रान्तानि । हे परन्तप !

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थान मधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

तानि - त्वदीयानि मदीयानिच सर्वाणि । अहं - सर्वज्ञः । वेद - जानामि । त्वं - कर्मवशेन संकुचितज्ञानोभवांस्तु । नवेत्थ-नजानासि ॥५॥

ननूत्पत्तिविनाशरहितस्य सर्वेश्वरतयाऽकर्मवश्यस्यतवकथं जीववज्जन्मेत्यतआह (अजइति) अजः - कर्मणोत्पत्तिरहितोपिसन् । अव्ययः - कर्मणानाशरहितः, आत्मा - स्वरूपं, यस्यसोऽव्ययात्मा सन्नपि । भूतानां - जन्तूनां । ईश्वरः - नियन्तासन्नपि । स्वां - स्वकीयां, पारमेश्वरीं । प्रकृतिं । अधिष्ठाय - अत्यजन्नेव । आत्ममायया - आत्मनः - स्वस्य, मायया - संकल्परूपज्ञानेन । सम्भवामि - देवमनुष्यादि सजातीयतयाऽवतरामि ॥ " अजायमानो बहुधाविजायत " इति श्रुतेरितिभावः ॥६॥

जन्मकालमाह (यदेति) हेभारत । यदायदा - यस्मिन्यस्मिन्काले । धर्मस्य - वर्णाश्रमोचितस्य वेदोक्तस्य श्रेयस्साधनस्य कर्तव्यस्यार्थस्य । ग्लानिः - उत्सादः । भवति । यदायदा । अधर्मस्य । अभ्युत्थानं - उद्रेकश्च । भवति । तदा । अहं । आत्मानं - मां । सृजामि - स्वसंकल्पेनैवावतारयामि । जीववज्जन्मजन्मकालनियमोनास्तीत्यर्थः ॥७॥

जन्मनःप्रयोजनमाह (परित्राणायेति) साधूनां - परमवैदिकधर्मानुष्ठानशीलानां वैष्णवाग्रेसराणाम्मदाश्रितानां । परित्राणाय -

जन्म कर्म च मे दिव्य मेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोर्जुन ॥ ९ ॥
वीतराग भयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भाव मागताः ॥ १० ॥

तदभीष्टप्रदानेन संरक्षणाय । दुष्कृतां - तद्विरोधिनां । विनाशाय - विनाशंकर्तुंच । धर्मसंस्थापनार्थाय – धर्मस्य - क्षीणस्यवैदिकधर्मस्य, संस्थापनार्थाय - सम्यक् स्थापनंचकर्तुं । युगेयुगे । सम्भवामि - अवतरामि ॥८॥

उक्तरूपाणा मीश्वरजन्मकर्मणां ज्ञानेफलमाह (जन्मेति) एवं - उक्तरूपस्य कर्ममूलजन्मचेष्टाराहितस्य । मे – मम । दिव्यं - अप्राकृतम् । जन्म - देवमनुष्यादिरूपेणजननम् । कर्म - तत्तज्जन्मानुगुणचेष्टितंच । तत्वतः - यथार्तः, परानुग्रहार्थत्वेनेतियावत । यः - पुरुषः । वेत्ति - जानाति । हे अर्जुन । सः – पुरुषः । देहं - वर्तमानशरीरं । त्यक्त्वा - विहाय । पुनः - भूयोपि । जन्म - देहान्तरपरिग्रहरूपं । नैति – नप्राप्नोति । किंतु, मामेव । एति – प्राप्नोति ॥९॥

कथं त्वदीयजन्मकर्मज्ञानेन त्वत्प्राप्ति स्स्या दित्यत्राह (वीतरागेति) ज्ञानतपसा – ज्ञानं - मदवताररहस्यविषयकं परिज्ञानं, तदेव तपः, तेन । पूताः - निरस्तमत्समाश्रयणविरोधिपापाः । बहवः – पुरुषाः । मां - सर्वेश्वर माश्रितवात्सल्यैकजलधिम् । उपाश्रिताः – संश्रिताः । अत एव । वीतरागभयक्रोधाः – रागः – अलब्धविषयस्पृहा, भयं - लब्धविषयविश्लेषभीतिः, क्रोधः - तद्विश्लेषहेतुषु द्वेषः, वीताः – नष्टाः, रागादयः – येषां ते तथोक्ताः । मन्मयाः – मदेकचित्ताश्च सन्तः । मद्भावं - मत्साधर्म्यम् । गताः – प्राप्ताः ॥ १० ॥

ये यथा मां प्रपद्यन्ते तां स्तथैव भजाम्यहम् ।
मम वर्त्मा नुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥
कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषेलोके सिद्धि र्भवति कर्मजा ॥ १२ ॥
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपिमां विद्ध्यकर्तार मव्ययम् ॥ १३ ॥

न केवल मुक्तसाधुपरित्राणमेव मदवतारप्रयोजन मित्याह (ये यथेति) ये - मत्समाश्रयणपराः पुरुषाः । यथा - येन स्वापेक्षितेन प्रकारेण । माम् । संकल्प्य, प्रपद्यन्ते - समाश्रयन्ते । तान् । अहम् । तथैव - तदपेक्षितेनैव प्रकारेण मां दर्शयित्वा । भजामि- अनुगृह्णामि । हे पार्थ । तस्मात । मनुष्याः - मदनुवर्तनैकपरा मानवाः । मम । वर्त्म - मार्गं, हेयप्रत्यनीककल्याणैकतानस्वरूप गुणविभूतिकत्वरूपं स्वभाव मिति यावत । सर्वशः - स्वापेक्षित सर्वप्रकारै रपि । अनुवर्तन्ते - अनुभविष्यन्तीत्यर्थः ॥ ११ ॥

एवं प्रसक्तानुप्रसक्त मर्थं परिसमाप्य प्रकृतकर्मयोगे ऽधिकारि दौर्लभ्य माह (कांक्षन्त इति) इह - लोके । सर्वे पुरुषाः । कर्मणाम् । सिद्धिं - फलम् । कांक्षन्तः - कामयमाना स्सन्तः । देवताः - इन्द्रादिदेवतान्तराण्येव । यजन्ते - कर्मभि राराधयन्ति, नतु सर्वदेवतान्तर्यामिणं सकलकर्माराध्यं मां यजन्तीत्यर्थः । हि- यस्मा त्कारणात । मानुषे । लोके । कर्मजा - कर्मजन्या । सिद्धिः - पुत्रपश्वन्नादिरूपं फलम् । क्षिप्रं - शीघ्रमेव । भवति । अत्र मानुष लोकशब्द स्स्वर्गादे रप्युपलक्षणार्थः । सर्वेपि क्रियाफलकांक्षिण स्सन्तो देवतान्तराराधनपरा एव, न कश्चिदपि मुमुक्षु स्सन्मदाराधनैकरूपं कर्मयोग मारभत इति भावः ॥ १२ ॥

यथोक्तकर्मयोगारम्भविरोधि पापक्षयहेतु माह श्लोकद्वयेन । चत्वारो वर्णा श्चातुर्वर्ण्यं, चातुर्वर्ण्यप्रमुखं कृत्स्नं जग दित्यर्थः ।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभि र्न सबद्ध्यते ॥ १४ ॥
एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

गुणकर्मविभागशः – गुणाः – सत्त्वादयः, कर्माणि – तदनुगुणशमदमादीनि, तेषां, विभागशः - विभागेन; सत्त्वप्रधानो ब्राह्मणवर्णः - तस्य शमदमादीनि कर्माणि, रजःप्रधानः क्षत्रियवर्णः - तस्य कर्माणि युद्धादीनि, रजस्तमः प्रधानो वैश्यवर्णः - तस्य कृषिवाणिज्यादीनि कर्माणि, तमःप्रधान शूद्रवर्णः - तस्य पूर्ववर्णशुश्रूषादीनि कर्माणी त्येवंरूपविभागेन सहेत्यर्थः । मया – सर्वेश्वरेण । सृष्टम् । इदं स्थितिसंहारयो रप्युपलक्षणम् । तस्य - विचित्रजगत्सृष्ट्यादेः । कर्तारमपि । अव्ययं - कर्मकृतोत्पत्तिविनाशरहितम् । अत एव । अकर्तारं – फलतः कर्तृत्वरहितमेव । माम् । विद्धि – जानीहि ॥ १३ ॥

कुतइत्यत्राह (नमामिति) कर्माणि - सृष्ट्यादीनि । मां । नलिंपन्ति नबध्नन्ति । किंतु - क्षेत्रज्ञपुण्यपापमूलकत्वेन तानेवलिंपन्तीत्यर्थः । मे – अवाप्तसमस्तकामस्यमम । कर्मफले - सृष्ट्यादिकर्मफलेच । स्पृहा - इच्छा । नास्ति, किन्तु – क्षेत्रज्ञानामेवेतिभावः । इति अनेनप्रकारेण । यः । मां । अभिजानाति । सः । कर्मभिः –कर्मयोगारंभविरोधि पुण्य पाप रूपैः । नबध्यते, किन्तु मुच्यतइत्यर्थः ॥ १४ ॥

कर्मयोगमेव प्रपंचयितुं तस्य कर्तव्यतां स्मारयति (एवं ज्ञात्वेति) एवं – उक्तप्रकारेण । ज्ञात्वा – मदीयावताररहस्यं बुद्ध्वा । पूर्वैः – प्राचीनैः । मुमुक्षुभिः – विवस्वदादिभि रपि । कर्म – कर्मयोगः । कृतं - आचरितम् । तस्मात – कारणात । त्वम् । पूर्वैः । कृतम् । अत एव । पूर्वतरं – पुरातनम् । कर्म - उक्त वक्ष्यमाणप्रकार कर्मयोगमेव । कुरु - समाचर ॥ १५ ॥

किं कर्म किमकर्मेति कवयो ऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे ऽशुभात ॥ १६ ॥
कर्मणो ह्यपि बोद्धव्यं बोद्धव्यंच विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥
कर्मण्यकर्म यः पश्ये दकर्मणिच कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

वक्ष्यमाणप्रकारस्य कर्मयोगस्य दुर्ज्ञानता माह (किं कर्मेति) कर्म - मुमुक्षुभि रनुष्ठेयम् । किं - किं रूपम् । अकर्मच । किम् । अत्राकर्मशब्देन कर्मयोगाङ्गभूतं तदन्तर्गतं कर्तु रात्मनो याथात्म्य ज्ञानं विवक्षितम् । तच्च किंरूप मित्यर्थः । इति - अनेन प्रकारेण । अत्र - अस्मि न्नर्थे । कवयः - विद्वांसोपि । मोहिताः - संजात मोहाः । यथाव न्न जानन्तीत्यर्थः । तत - ज्ञानगर्भं मदाराधनात्मकम् । कर्म । ते - तव । प्रवक्ष्यामि । यत - कर्म । ज्ञात्वा - ज्ञानपूर्वक मनुष्ठाय । अशुभात - संसारबन्धरूपा दनर्थात् । मोक्ष्यसे - मुक्तो भविष्यसि ॥ १६ ॥

कुतो ऽस्य दुर्ज्ञानतेत्यत्राह (कर्मण इति) हि - यस्मा त्कारणात् । कर्मणः - मोक्षसाधनभूतस्य कर्मयोगस्यापि । बोद्धव्यं - ज्ञातव्यं स्वरूपम् । अस्ति । विकर्मणः - नित्यनैमित्तिकादिरूपेण तत्साधनद्रव्यार्जनाद्याकारेणच विविधं कर्म विकर्म, तस्यच । बोद्धव्यम् । अस्ति । अकर्मणः - आत्मयाथात्म्यज्ञानस्यच । बोद्धव्यम् । अस्ति । अतः । कर्मणः - मुमुक्षुभि रनुष्ठेयस्य कर्मयोगस्य । गतिः - प्रकारः । गहना - दुर्बोधा॥ १७ ॥

कर्माकर्मणो र्बोद्धव्य माह (कर्मणीति) यः - पुरुषः । कर्मणि - कर्मयोगे । अकर्म - आत्मयाथात्म्यज्ञानं । पश्येत् - ज्ञानगर्भतया ज्ञानाकारतां पश्येदित्यर्थः । यः । अकर्मणि - आत्मयाथात्म्यज्ञाने ।

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोपि नैव किंचि त्करोतिसः ॥ २० ॥

कर्मच । पश्येत् – ज्ञानस्य कर्मान्तर्गततया कर्माकारतांच पश्येदि त्यर्थः । सएव । कृत्स्नकर्मकृत् – कृत्स्नं - सर्वं, कर्म- शास्त्रार्थं, क रोतीति तथोक्तः ॥ १८ ॥

ननु प्रवृत्तिरूपस्य कर्मणो ज्ञानाकारता कथ मित्यत्राह (यस्येति) यस्य - मुमुक्षोः । सर्वे – समस्ताः, द्रव्यार्जनादि लौकिक कर्मपूर्वकाः । सम्यगारभ्यन्त इति समारम्भाः - कर्माणि । कामसंकल्पवर्जिताः - कामः - फलसंगः, एकीकृत्य कल्पनं संकल्पः - प्रकृति तद्गुणात्मैक्यभ्रमः, ताभ्यां वर्जिताः । भवन्ति - फलसंगवर्जिताः प्रकृतिवियुक्तात्मा नुसन्धानयुक्ताश्चेति यावत् । तं - कामसंकल्पवर्जितं कर्म कुर्वाणं । पण्डितं - विद्वांसम् । ज्ञानाग्निदग्धकर्माणं – ज्ञानेन – कर्मान्तर्गतात्म याथात्म्यज्ञानरूपेण , अग्निना , दग्धानि, कर्माणि- मोक्षविरोधिपापानि, यस्य तं तथोक्तम् । बुधाः - तत्त्वज्ञाः । आहुः – वदन्ति । प्रवृत्तिरूपस्यापि कर्मणोऽन्तर्गतात्मयाथात्म्य ज्ञानतया ज्ञानाकारत्व मुपपद्यतइति भावः ॥ १९ ॥

एतदेवविवृणोति (त्यक्त्वेति) यः । कर्मफलासंगं – कर्मणि - अनुष्ठीयमाने, फलासंगं - फलासक्तिं । त्यक्त्वा । नित्यतृप्तः - नित्ये - स्वात्मन्येव, तृप्तः - तृप्तिंगतः । निराश्रयः - अस्थिरायां प्रकृतावाश्रयबुद्धिरहितश्च । भवति । सः । कर्मणि । अभिप्रवृत्तोपि - आभिमुख्येनप्रवृत्तोपि । किंचिदपि - कर्म । नकरोत्येव - कर्मानुष्ठानव्याजेन ज्ञानाभ्यासमेव करोतीत्यर्थः । अतः कर्मणो ज्ञानाकारत्वमुपपन्नमितिभावः ॥ २० ॥

निराशी र्यत चित्तात्मा त्यक्तसर्व परिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥
यदृच्छालाभ सन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौच कृत्वापि न निबध्यते ॥ २२ ॥
गत संगस्य मुक्तस्य ज्ञानावस्थित चेतसः ।
यज्ञाया चरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

पुनरपिकर्मणो ज्ञानाकारत्वमेव विशोध्यते "निराशी" रित्यादिना । निर्गताः, आशिषः - फलकामनाः , यस्मात्सनिराशीः । यताचित्तात्मा - चित्तं - मनः , आत्मा - शरीरं, यतौ - नियतौ , चित्तात्मानौ यस्यसतथोक्तः । त्यक्तसर्वपरिग्रहः - त्यक्ताः - परित्यक्ताः, सर्वे, परिग्रहाः - प्रकृतिप्राकृतवस्तुषुममकाराः, येन सतथोक्तः; आत्मैकप्रयोजनइतियावत् । केवलं - ज्ञाननिष्ठारहितं । शारीरं - शरीरमात्रसाध्यं । कर्म । कुर्वन्नपि । किल्बिषं - संसारं । नाप्नोति । ज्ञाननिष्ठां विनाप्यंतर्गतात्म ज्ञानत्वमात्रेणात्मावलोकनरूप ज्ञाननिष्ठाकार्यकरत्वेन ज्ञानाकारत्वं कर्मण इतिभावः ॥ २१ ॥

यदृच्छालाभसन्तुष्टः- यदृच्छया-अयत्नेनैव, योलाभः-शरीरधारणहेतु द्रव्यादि प्राप्तिः, तेन सन्तुष्टः। द्वंद्वातीतः-द्वंद्वानि-अवर्जनीयशीतोष्णादीनि, अतीतः; तत्सहिष्णुरित्यर्थः। विमत्सरः ~ अनिष्टागमेस्वकर्महेतुकत्वज्ञानेन परेषु विगतमत्सरः । सिद्धौ-असिद्धौच -युद्धादिकर्मसुजयादि सिद्ध्य सिद्ध्योः। समः-तुल्यः, निर्विकार इति यावत्। एतादृशः। कृत्वापि- केवलं कर्मकृत्वापि। ननिबध्यते। ज्ञाननिष्ठांविनापि संसारंनप्राप्नोतीत्यर्थः॥२२॥

ज्ञानावस्थितचेतसः - ज्ञाने - देहातिरिक्तात्मविषयके , अवस्थितं - नियतं , चेतोयस्यतथोक्तस्य । अतएव । गतसंगस्य - गतः - नष्टः , संगः - आत्मेतरविषयासक्तिः, यस्यतथोक्तस्य ।

ब्रह्मार्पणं ब्रह्म हवि र्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥ २४ ॥
दैवमेवा परे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्ना वपरे यज्ञं यज्ञेनै वोपजुह्वति ॥ २५ ॥

अतएव । मुक्तस्य - निखिलपरिग्रह निर्मुक्तस्य । यज्ञाय - यज्ञादिकर्मनिष्पत्तये । आचरतः - वर्तमानस्य पुरुषस्य । कर्म - बन्धहेतुभूतं प्राचीनपुण्यपापरूपंकर्म । समग्रं - निश्शेषं । प्रविलीयते॥२३॥

एवं प्रकृतिवियुक्तात्म ज्ञानगर्भतयाकर्मयोगस्य ज्ञानाकारत्वमुक्तं । इदानीं ब्रह्मात्मकत्वानुसन्धानयुक्ततया ज्ञानाकारत्वमाह (ब्रह्मार्पणमिति) ब्रह्मार्पणं –अर्प्यते ऽ नेनहविरित्यर्पणंस्रुक्स्रुवादिकं, ब्रह्म – ब्रह्मात्मकं, अर्पणं यस्यतत्तथोक्तं । ब्रह्महविः – ब्रह्म - ब्रह्मात्मकं, हविः - पुरोडाशादिकं होमद्रव्यं । ब्रह्मणा - ब्रह्मात्मकेनकर्त्रा । ब्रह्माग्नौ - ब्रह्मात्मक आहवनीयाद्यग्नौ । हुतम् – त्यक्तम् । इति शब्दो ऽ ध्याहर्तव्यः । इति - अनेनप्रकारेण । ब्रह्मकर्मसमाधिना - ब्रह्मात्मकेकर्मणि, समाधिः - अनुसन्धानं, यस्यतेनतथोक्तेन । तेन - कर्त्रा । ब्रह्म - ब्रह्मात्मकतया ब्रह्मभूत मात्मस्वरूपमेव । गन्तव्यं - प्राप्यं । मुमुक्षुणाक्रियमाणं कर्मब्रह्मात्मकत्वानुसन्धानयुक्ततया ज्ञानाकारं ज्ञाननिष्ठांविनैवात्मावलोकन साधनमितिभावः ॥ २४ ॥

कर्मणां ज्ञानाकारत्वमुक्त्वा कर्मयोगभेदानाह (दैवमिति) दैवं - इन्द्रादि देवतार्चनरूपमेवयज्ञं । अपरेयोगिनः – केचित्कर्मयोगिनः । पर्युपासते – सेवन्ते, तत्रैवनिष्ठांकुर्वन्तीत्यर्थः । अपरे – अन्ये-कर्मयोगिनः । यज्ञं - यज्ञसाधनंहविः । यज्ञेनैव – यज्ञोपकरण स्रुगादिनैव । ब्रह्माग्नौ । उपजुह्वति ॥ २५ ॥

श्रोत्रादीनी न्द्रिया ण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादी न्विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

सर्वाणी न्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्म संयम योगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

द्रव्ययज्ञा स्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्याय ज्ञान यज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

अन्ये कर्मयोगिनः । श्रोत्रादीनि - श्रोत्रप्रभृतीनि । इन्द्रियाणि । संयमाग्निषु - संयमाः - नियमाएव , अग्नयः , तेषु । जुह्वति ; इन्द्रियनियमनएव प्रयतन्तइत्यर्थः । अन्ये - योगिनः । इन्द्रियाण्येवाग्नयः - तेषु । शब्दादीन् । विषयान् । जुह्वति । यादृच्छिकान् विषयाननुभवन्तोपि तत्रानासक्तास्सन्तो ऽग्नित्वेनभाविते ष्विन्द्रियेषु हविष्ट्वेनभावितान् शब्दादीन्प्रक्षिपन्तीत्यर्थः ॥२६॥

अपरे - योगिनः । सर्वाणि - समस्तानि । इन्द्रियकर्माणि इन्द्रियाणां - श्रोत्रादीनां , कर्माणि - श्रवणादीनि । प्राणकर्माणि - प्राणानां - पंचानां , कर्माणि - बहिर्गमनादीनिच । ज्ञानदीपिते । आत्मसंयमयोगाग्नौ - आत्मनः - मनसः , संयमः - नियमनरूपः , यो योगः, सएवाग्निः , तस्मिन्नेव । जुह्वति - प्रक्षिपन्ति । मनसइन्द्रियव्यापार प्रवणता निराकरणे प्रयतन्त इति भावः ॥ २७ ॥

संशितव्रताः - दृढसंकल्पाः । यतयः - यतनशीलाः । केचित्कर्मयोगिनः । द्रव्ययज्ञाः - द्रव्येण - न्यायार्जितधनेन, यज्ञः - देवार्चन यागदानहोमरूपः , येषान्ते तथोक्ताः । भवन्ति । केचित । तपो यज्ञाः - तपांसि - कृच्छ्रचान्द्रायणादीन्येव , यज्ञो येषान्ते तथोक्ताः । अन्ये । योगयज्ञाः - योगः - पुण्यक्षेत्रपुण्यतीर्थादिप्राप्तिरेव, यज्ञो येषान्ते तथोक्ताः । तथा । अपरे । स्वाध्यायज्ञानयज्ञाः-

अपाने जुह्वति प्राणं प्राणे ऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायाम परायणाः ॥ २९ ॥
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ।

स्वाध्यायः - वेदाभ्यासः, ज्ञानं - तदर्थविचाररूपं, तएव यज्ञो येषां ते तथोक्ताः । केचित्स्वाध्याययज्ञाः केचि त्तदर्थज्ञानयज्ञा इत्यर्थः ॥२८॥

अथ पूरकरेचककुम्भकभेदेन त्रिविधप्राणायाम रूपं कर्मयोगं सार्धश्लोकेनाह (अपान इत्यादि) प्राणायामपरायणाः - प्राणायामः - "आतमितोः प्राणमायच्छे" दित्यापस्तम्बोक्तरीत्या शरीर ग्लानिपर्यन्तं प्राणानां नियमनरूपः , परायणं - प्रधानं , येषान्ते तथोक्ताः ; प्राणायामनिष्ठा इत्यर्थः । नियताहाराः - नियतः-" द्वौ-भागौ पूरये दन्नै स्तोयेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं चतुर्थमव शेषयेत ॥ " इत्युक्तरीत्या संकुचितः, आहारः- उदरभरणं, येषान्ते तथोक्ताः । अपरे - केचित्कर्मयोगिनः । अपाने प्राणं जुह्वति - एकीकुर्वन्ति ; अपानवायुना प्राणवायो रेकीकरणरूपं पूरकं कुर्वन्ति । तदानींचापानमग्नितया तत्रैकीभवन्तं प्राणमाहुतितया तदेकीकरणं होमतयाच भावयन्ती त्यर्थः । तथा अपरे - केचि त्तथा-विधाः कर्मयोगिनः । प्राणे ऽपानं जुह्वति - प्राणवायुना ऽपानवायो रेकीकरणरूपं रेचकं कुर्वन्ति । तदानीं प्राणमग्नितया ऽपान-माहुतितया तदेकीकरणं होमतयाच भावयन्तीत्यर्थः । अपरे - तथाविधाः कर्मयोगिनः । प्राणापानगती - प्राणस्योर्ध्वगति मपानस्या धोगतिंच । रुध्वा - निरुध्य । प्राणेष्वेव प्राणान् जुह्वति - सर्वेषां प्राणाना मेकीकरणरूपं कुम्भकं कुर्वन्ति । तदानीं प्राणान-ग्नितया तेष्वेकीभवत स्तानेवाहुतितया तदेकीकरणं होमतया च भावयन्तीत्यर्थः ॥ २९ ॥

सर्वेऽप्येते यज्ञविदो यज्ञक्षपित कल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोको ऽस्त्ययज्ञस्य कुतो न्यः कुरुसत्तम ॥ ३१ ॥
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वा नेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवमुक्तानां द्वादशानां यज्ञविदां फलमाह (सर्वेइति) एते-पूर्वोक्ता द्रव्ययज्ञादि प्राणायामपर्यन्तकर्मयोगेषु प्रवृत्ताः । सर्वेपि - पुरुषाः । यज्ञान् - महायज्ञपूर्वक नित्यनैमित्तिकादिरूपान्, विन्दन्ति - लभन्त इति यज्ञविदः ; तन्निष्ठा इत्यर्थः । अतएव । यज्ञक्षपितकल्मषाः- यज्ञैः - पूर्वोक्तकर्मयोगरूपैः, क्षपितानि - नाशितानि, कल्मषाणि - परमपुरुषार्थप्रतिबन्धकंपापानि, येषान्ते तथोक्ताः ॥ ३० ॥

यज्ञशिष्टामृतभुजः - यज्ञशिष्टं यदन्नादि, तदेवामृतं, तद्भुंजत इति तथोक्ताः ; तेनैव शरीरधारणं कुर्वन्त इत्यर्थः । एवम्भूता स्सन्तएव । सनातनं - शाश्वतम् । ब्रह्म । यान्ति - प्राप्नुवन्ति । हेकुरुसत्तम - अर्जुन । अयज्ञस्य - महायज्ञपूर्वक नित्यनैमित्तिक कर्मरहितस्य । अयं - धर्मार्थकामरूपः । लोकः - पुरुषार्थः । नास्ति । अन्यः - एतद्विलक्षणमोक्षरूप पुरुषार्थः । कुतः- कस्माद्धेतोः सिध्यति ॥ ३१ ॥

उक्तान् कर्मयोगानुपसंहरति (एवमिति) एवं - उक्तरीत्या । बहुविधाः - बहुप्रकाराः । यज्ञाः - कर्मयोगाः । ब्रह्मणः - वेदस्य । मुखे - वेदान्ते । वितताः - विस्तृताः ; आत्मयाथात्म्य प्राप्तिसाधनतया विस्तरेण प्रतिपादिता इत्यर्थः । तान् - उक्तप्रकारान् । सर्वान् कर्मयोगान् । कर्मजान् - अहरहरनुष्ठीयमान नित्यनैमित्तिकादि कर्मजनितान् । विद्धि - जानीहि । एवं - उक्तप्रकारेण । ज्ञात्वा - ज्ञानपूर्वक मनुष्ठाय । विमोक्ष्यसे - संसारा द्विमुक्तोभविष्यसि ॥ ३२ ॥

श्रेयान्द्रव्यमया द्यज्ञा ज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिन स्तत्वदर्शिनः ॥ ३४ ॥
यज्ज्ञात्वा न पुनर्मोह मेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

एव मात्मयाथात्म्य ज्ञानगर्भतया कर्मणो ज्ञानाकारत्व मुक्तं । ततो ज्ञानगर्भकर्मणि ज्ञानांशस्यैव प्राधान्यमाह (श्रेयानिति) हेपरन्तप । ज्ञानक्रियोभयरूपे कर्मणि । द्रव्यमयात् - द्रव्यत्यागरूप-क्रियाप्रचुरात् । यज्ञात् - कर्मांशात । ज्ञानयज्ञः - ज्ञानरूपो यज्ञः - ज्ञानांशः । श्रेयान् - श्रेष्ठः । तत्र - हेतुमाह (सर्वमिति) हे पार्थ । सर्वं - सर्वप्रकारम् । अखिलं · अविकलम् । कर्म - क्रियारूपों ऽशः । ज्ञाने - आत्मयाथात्म्य ज्ञानेसाध्यभूते । परिसमाप्यते - पर्यवस्यतीति यावत् । " कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत " इत्युक्त-रीत्या कर्मणः फलभूतं ज्ञानमेव हि कर्मान्तर्गततया कर्माभ्यासेना भ्यस्यमानं क्रमेण प्राप्यदशां प्रतिपद्यत इति भावः ॥ ३३ ॥

एवंभूतात्म ज्ञानवैशद्यमाह (तद्विद्धीति) तत् - " अविनाशितु तद्विद्धी " त्यादिना मयोपदिष्टमात्मविषयकं ज्ञानम् । प्रणिपातेन -नमस्कारेण । परिप्रश्नेन - जिज्ञासित सकलप्रकारक प्रश्नेन । सेवया - शुश्रूषयाच । विद्धि - प्रत्यक्षवद्विशदाकारं जानीहि । ज्ञानिभ्यइत्यनुषंगः । तत्त्वं - आत्मस्वरूप याथात्म्यं, पश्यन्तीति तत्त्वदर्शिनः - ज्ञानिनः पण्डिताः । ते - प्रणिपातादिभिः प्रसादयत स्तव । ज्ञानम् । उपदेक्ष्यन्ति - उपदेशेन प्रत्यक्षव द्विशदीकरिष्यन्तीत्यर्थः ॥ ३४ ॥

आत्मयाथात्म्यविषयक प्रत्यक्षरूपज्ञानस्य लक्षणमाह (यदिति) हे पाण्डव । यत् - ज्ञानम् । ज्ञात्वा । पुनः - भूयोपि । एवम् - इत्थ-

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥
नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

भूतं । मोहं - देहात्मैक्यभ्रमं । न यास्यसि । येन - ज्ञातेन ज्ञानेन । सर्वाणि । भूतानि - देवमनुष्याद्याकारेणा नुसंहितान्यात्मवस्तूनि । अशेषेण - कात्स्र्न्येन । आत्मन्येव - स्वात्मन्येव । द्रक्ष्यसि - प्रत्यक्षीकरिष्यसीति यावत् । ज्ञानैकाकारतया स्वात्मसमतयैव प्रत्यक्षीकरिष्यसी त्यर्थः । अथो - अनन्तरम् । सर्वाणि भूतानि । मयिद्रक्ष्यसि - मत्समानाकारतया प्रत्यक्षीकरिष्यसि । प्रकृतिविनिर्मुक्तं ह्यात्म वस्तु परस्परंसर्वेश्वरेण च सममिति भावः ॥ ३५ ॥

उक्तरूपस्य ज्ञानस्य माहात्म्यमाह (अपिचेदिति) त्वं । सर्वेभ्यः । पापेभ्यः - पापकृद्भ्यः । पापकृत्तमः - अतिशयेन पापकृदपि । असिचेत् - भवसियदि । सर्वं । वृजिनं - पापसमुद्रम् । ज्ञानप्लवेनैव - ज्ञानं आत्मयाथात्म्यप्रत्यक्षं, तदेवप्लवः - पोतः, तेन । सन्तरिष्यसि - सम्यक्तरिष्यसि ॥ ३६ ॥

हे अर्जुन । यथा । समिद्धः - प्रज्वलितः । अग्निः । एधांसि - इन्धनानि । भस्मसात्कुरुते - कात्स्र्न्येनभस्मीभूतानिकरोति । तथा । ज्ञानाग्निः - अग्निवत्प्रकाशरूपं ज्ञानं । सर्वकर्माणि - अनारब्धकार्याणि पुण्यपापरूपाणि सर्वाणि कर्माणि । भस्मसात्कुरुते - साकल्येन नाशयतीत्यर्थः ॥ ३७ ॥

अत्रहेतुमाह (नहीति) हि - यस्मात्कारणात् । इह - जगति । ज्ञानेन - आत्मयाथात्म्य विषयकेण । सदृशं - समानं ।

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्ति मचिरेणाधि गच्छति ॥ ३९ ॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

पवित्रं - शुद्धिकरंवस्तु । न विद्यते - नास्ति । अतोज्ञानं सर्वं पापं नाशयतीतिभावः । तत - पवित्रंज्ञानं । योगसंसिद्धः - योगेन - अहरहरनुष्ठीयमानेन कर्मयोगेन, संसिद्धः निर्मलान्तःकरणःपुरुषः । कालेन - बहुकालेन । आत्मनि - स्वात्मनिविषये । स्वयमेव । अनायासेन । विन्दति - लभते ॥ ३८ ॥

तदेव स्पष्टमाह (श्रद्धावानिति) श्रद्धावान् - गुरूपदिष्टेऽर्थेविश्वासशाली । तत्परः - तस्मिन्नर्थेनियतमनाः । संयतेन्द्रियः - तदितरविषय विमुखेन्द्रियः । पुरुषः । ज्ञानं - प्रत्यक्षवद्विशदतममात्मविषयं ज्ञानं । लभते । तथाविधं । ज्ञानं । लब्ध्वा । परां- निरतिशयाम् । शान्तिं - मोक्षरूपां निर्वृतिं । अचिरेण - शीघ्रमेव । अधिगच्छति- प्राप्नोति ॥ ३९ ॥

एवं ज्ञानाधिकारिणमुक्त्वा तद्विपरीत मधिकारिणमाह (अज्ञश्चेति) अज्ञः - उक्तरीत्या गुरूपदेशलब्धज्ञानरहितः । अश्रद्धधानश्च - गुरूपदिष्टज्ञानविवृद्धौत्वरारहितइत्यर्थः । संशयात्मा - गुरूपदिष्टज्ञान इदमित्थमन्यधावेति संशयाकुलः, आत्मा - मनः, यस्य तथोक्तश्च । विनश्यति - नष्टोभवति । एषु त्रिष्वपि संशयात्मा सर्वधा नश्यतीत्याह (नायमिति) संशयात्मनः । अयं । लोकः । नास्ति । परः - परलोकोपि । नास्ति । सुखं - मोक्षसुखमपि । नास्ति । देहातिरिक्तात्म याथात्म्यज्ञानपूर्वक शास्त्रीयकर्मसिद्धिरूपत्वा त्सर्वपुरुषार्थानां ज्ञानराहितस्य कथं पुरुषार्थलाभस्स्या दितिभावः ॥ ४० ॥

योगसंन्यस्त कर्माणं ज्ञानसंछिन्न संशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥
तस्मा दज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्वैनं संशयं योग मातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्री भगवद्गीतायां चतुर्थोऽध्यायः ॥ ४ ॥

योगसन्नयस्तकर्माणं - योगः - आत्मयाथात्म्यानुसन्धानेन सहकृतस्यकर्मणः परब्रह्मात्मकत्वानुसन्धानेनच युक्तत्वं, तेन, सन्नयस्तानि· सन्त्यक्तानि, कर्माणि यस्यतं - तथोक्तं । "कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोतिस" इत्युक्तरीत्या ज्ञानाकारतापन्न कर्माणमित्यर्थः । ज्ञानसंछिन्न संशयं - ज्ञानेन - गुरूपदेशलब्धवैशद्येनात्मज्ञानेन, संछिन्नः - सम्यक्छिन्नः, संशयः - आत्मस्वरूपगोचर सन्देहः, यस्य तं तथोक्तम् । आत्मवन्तं - प्रशान्तमनसं, उपदिष्टेऽर्थे दृढ़ावस्थितमनस मित्यर्थः । एवं विधं । हे धनञ्जय - अर्जुन । कर्माणि - अनादिकालार्जितबन्धहेतुकर्माणि । ननिबध्नन्ति - बद्धं नकुर्वन्ति । किन्तु नश्यन्तीत्यर्थः ॥४१॥

अध्यायार्थ मुपसंहरति (तस्मादिति) हे भारत । तस्मात् - प्रधानभूतात्मयाथात्म्यज्ञानगर्भकर्मयोगेन विना पुंसः पुरुषार्थयोग्यताविरहाद्धेतोः । अज्ञानसम्भूतम् - देहातिरिक्तात्माज्ञानबीजसमुत्पन्नं । हृत्स्थं- हृदयालवालस्थितं । एनं - पूर्वोक्तम् । आत्मनस्संशयम् - आत्मविषयकं सन्देहम् । ज्ञानासिना - मदुपदिष्टज्ञानखड्गेन । छित्वा - खण्डयित्वा । योगं - मदुपदिष्टं कर्मयोगं । आतिष्ठ - अनुतिष्ठ । तदर्थम् उत्तिष्ठ॥ ४२ ॥

इतिश्रीभगवद्गीता भाष्यार्थसंग्रह तात्पर्यदीपे श्रीवरवरमुनि
विरचितायां बालबोधिन्य पराभिधानायां गीतार्थसंग्रहदीपिकायां

चतुर्थो ऽध्यायः ॥ ४ ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीमते वरवरमुनयेनमः ।

अथ पञ्चमो ऽध्यायः ।

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

श्रीभगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयो स्तु कर्मसंन्यासा कर्मयोगो विशिष्यते ॥ २ ॥

इत्थं च्चतुर्थेध्याये कर्मयोगस्य ज्ञानयोगगर्भत्वं तत्स्वरूपभेदो ज्ञानांशस्य प्राधान्यंचोक्तम् । इदानीं कर्मयोगस्या त्मप्राप्तिसाधन ज्ञाननिष्ठापेक्षया शैघ्र्यं कर्मयोगान्तर्गता कर्तृत्वानुसन्धानं च्चाह ॥

हेकृष्ण । पुनः – भूयोपि । ' यच्छ्रेयस्स्या न्निश्चितं ब्रूही ' ति प्रश्ना नन्तरमपीत्यर्थः । कर्मणां । सन्न्यासं – त्यागं, ज्ञानयोगं । योगं – कर्मयोगंच । शंससि –" सर्वं कर्माखिलं पार्थज्ञाने परिसमाप्यते । नहि ज्ञानेन सदृशं पवित्र मिह विद्यते ॥ " इत्यादिना ज्ञानयोगं, "न कर्मणा मनारम्भात " " कर्मज्यायोह्यकर्मणः " इत्यादिना कर्मयोगंच, प्रशंससि । एतयोः – ज्ञानयोगकर्मयोगयो र्मध्ये । श्रेयः – आत्मप्राप्तिसाधनत्वे सौकर्येण शैघ्र्येणच्च श्रेष्ठम् । यत । एकम् । अस्ति । तत – श्रेष्ठ मेकम् । मे – मम । सुनिश्चितं – सम्यङ्निश्चितं यथा भवति तथा । ब्रूहि ॥ १ ॥

एव मर्जुनेन पृष्टे भगवा नुत्तरमाह (सन्न्यासइति) सन्न्यासः – कर्मसन्न्यासः, ज्ञानयोगः । कर्मयोगश्च । उभौ – द्वावपि । निश्श्रेयसकरौ-मोक्षहेतू । तयोः –ज्ञानयोगकर्मयोगयोर्मध्येतु । कर्मसन्न्यासात – ज्ञानयोगात । कर्मयोगएव । विशिष्यते-अतिशेते ॥२॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥ ३ ॥
सांख्ययोगौ पृथ ग्बालाः प्रवदन्ति न पण्डिताः ।
एक मप्यास्थितः सम्य गुभयो र्विन्दते फलम् ॥ ४ ॥
य त्सांख्यैः प्राप्यते स्थानं त द्योगै रपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

तत्र हेतुमाह (ज्ञेयइति) हेमहाबाहो । यः - कर्मयोगी । न- कांक्षति - कर्मयोगान्तर्गतात्मानुभवतृप्ततया तद्व्यतिरिक्तमनुकूलंनेच्छ- ति । नद्वेष्टि - प्रतिकूले द्वेषं न करोति । अतएव । निर्द्वन्द्वः - शी- तोष्णादिद्वन्द्वसहश्चभवति । सः । नित्यसन्न्यासी - नित्यं ज्ञाननिष्ठः। ज्ञेयः । सहि । सुखं - पूर्वाभ्यस्तसजातीयसुकरकर्मयोगनिष्ठतया ऽना यासेन । बन्धात् - संसारात् । प्रमुच्यते - विमुच्यते ॥ ३ ॥

ज्ञानयोगकर्मयोगयो रात्मप्राप्तिसाधनयो रन्योन्यनिरपेक्षत्वमाह (सांख्येति) न पण्डिताः - पण्डिता ये न भवन्ति तथाभूताः - अकृ त्स्नविदः । बालाः - अनिष्पन्नज्ञानाः । सांख्ययोगौ ज्ञानयोगकर्मयो- गौ । पृथक् कर्मयोगोज्ञानयोगमेवसाधयति, ज्ञानयोगस्त्वेक एवा त्मावलोकनं साधयतीति फलभेदेन पृथग्भूतौ । प्रवदन्ति । उभ योः - द्वयोर्मध्ये । एकं । आस्थितोपि - अनुतिष्ठन्नपि । सम्यक् - समीचीनं । फलं - आत्मावलोकनरूपं । विन्दते लभते । उभयोर प्यात्मावलोकनरूपैक फलसाधनत्वादितिभावः ॥४॥

एतदेवविवृणोति (यदिति) सांख्यैः-ज्ञानयोगिभिः । यत् । स्थानं - आत्मावलोकनरूपंफलं । प्राप्यते । तत् - फलं । योगैरपि - कर्मयोगिभिरपि । गम्यते - प्राप्यते । सांख्यंच । योगंच । एकं - आत्मावलोकनरूप फलैक्यादभिन्नं । यः । पश्यति - जानाति । सः । पश्यति, पण्डितइत्यर्थः ॥ ५ ॥

संन्यास स्तु महाबाहो दुःख माप्तु मयोगतः ।
योगयुक्तो मुनि र्ब्रह्म न चिरेणा धिगच्छति ॥ ६ ॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

तर्हि किं कर्मयोगेनेत्यत आह (सन्न्यास स्त्विति) सन्न्यासः - ज्ञानयोगस्तु । अयोगतः - कर्मयोगं विना । आप्तुं - साधयितुं । दुःखं - अशक्यमित्यर्थः । योगयुक्तः - कर्मयोगयुक्तस्तु । मुनिः - अन्तर्गतज्ञानेन स्वयमेवात्ममननशीलः । अतः । न चिरेण - अल्पकालेन । ब्रह्म - आत्मानम् । अधिगच्छति - सुखेन कर्मयोगसाधनद्वारा प्राप्नोती त्यर्थः । केवलज्ञानयोगयुक्तस्तु महता दुःखेनात्मा वलोकनं साधयित्वा चिरेणात्मावलोकनं प्राप्नोति । अत स्सौकर्याच्छैघ्र्याच्च ज्ञानयोगात् कर्मयोगएव श्रेयानिति भावः ॥ ६ ॥

एतदेव विवृणोति (योगेति) योगयुक्तः - योगेन - परमपुरुषाराधनैकवेषेण शुद्धेन शास्त्रीयेण कर्मणा, युक्तः । विशुद्धात्मा - विशुद्धः - निर्मलः, आत्मा - मनः, यस्यस तथोक्तः । विजितात्मा - विजितः - स्वाभ्यस्तकर्मव्यापृततया सुखेन जितः, आत्मा - मनः, यस्य स तथोक्तः । अतएव । जितेन्द्रियः - निर्जितबाह्येन्द्रियः । सर्वभूतात्मभूतात्मा - सर्वेषां, भूतानां - देवमनुष्यादीनां, आत्मभूतः - आत्मभिस्समानाकारतया ऽभिन्नत्वेनानुसन्धीयमानः, आत्मा स्वात्मा, यस्य स तथोक्तः । प्रकृतिवियुक्तास्सर्वे ह्यात्मानोज्ञानाकारतयातुल्याः, देवत्व मनुष्यत्वादीनां शरीरधर्मत्वादितिभावः । एवं भूतः । कुर्वन्नपि - कर्माचरन्नपि । नलिप्यते - अनात्मन्यात्माभिमानादिना न बध्यते । फलाभिसन्धिपूर्वक मनुष्ठितंहि कर्मरुचिवासनादिद्वारादेहात्माभिमानादिबन्धहेतुर्भवतीतिभावः । अतो ऽचिरेणात्मानं प्राप्नोतीत्यभिप्रायः ॥ ७ ॥

नैव किंचि त्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्व न्स्पृश ञ्जिघ्र न्नश्न न्गच्छ न्स्वप न्श्वसन् ॥ ८ ॥
प्रलप न्विसृज न्गृह्ण न्नुन्मिष न्निमिष न्नपि ।
इन्द्रियाणी न्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥
ब्रह्म ण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्र मिवा म्भसा ॥ १० ॥

एवं श्रेष्ठस्यकर्मयोगस्यापेक्षितमाह "नैवे "त्यादिश्लोकद्वयेन । तत्त्व वित आत्मयाथात्म्यवित । युक्तः-उक्तलक्षणकर्मयोगनिष्ठः । पश्यन्-रूप सन्दर्शनंकुर्वन्नपि । शृण्वन्-शब्दश्रवणंकुर्वन्नपि । स्पृशन् - स्पर्शसाक्षात्कारं कुर्वन्नपि । जिघ्रन् - गन्धाघ्राणंकुर्वन्नपि । अश्नन्-रससाक्षात्कारं कुर्वन्नपि । गच्छन् - गमनंकुर्वन्नपि । स्वपन् - निद्रांकुर्वन्नपि । श्वसन् - श्वासंकुर्वन्नपि ॥८॥ प्रलपन् - सम्भाषणंकुर्वन्नपि । विसृजन् - मूत्र-पुरीषविसर्गंकुर्वन्नपि । गृह्णन् आदानंकुर्वन्नपि । उन्मिषन् - उन्मीलनंकुर्वन्नपि । निमिषन्-निमीलनंकुर्वन्नपि । इन्द्रियार्थेषु-शब्दादिविषयेषु । इन्द्रियाण्येववर्तन्ते, दर्शनश्रवणादि कर्माणीन्द्रियाण्येव कुर्वन्तीत्यर्थः । इति-अनेनप्रकारेण । धारयन्-बुद्ध्यानिश्चिन्वन्सन् । अहं । किंचिदपि-कर्म । नैवकरोमीति । मन्येत अनुसन्दधीत । इन्द्रियेषुकर्तृत्वमारोप्य स्व स्मिन्नकर्तृत्वानु सन्धानं कर्तव्यमितिभावः ॥९॥ (अत्राश्नन्नित्यन्तेन बाह्येन्द्रियव्यापारउक्तः । गच्छन्नितिपादव्यापारः । स्वपन्नितिबुद्धिव्यापारः । श्वसन्नितिप्राणव्यापारः । प्रलपन्नितिवागिन्द्रियस्य । विसृजन्निति पायूपस्थयोः । गृह्णन्नितिपाण्योः । उन्मिषन्निमिषन्नित्यपि प्राणस्यैतिबोद्धव्यं ॥)

एवं मकर्तृत्वानुसन्धानस्य फलमाह (ब्रह्मणीति) यः । कर्माणि । ब्रह्मणि - ब्रह्म - प्रकृतिः, तस्मिन् - प्रकृतिपरिणाम विशेषरूपेन्द्रियवर्गे । आधाय - पश्यन्नित्यादिप्रकारेण सन्न्यस्य, तथैव कर्तृ-

कायेन मनसा बुद्ध्या केवलै रिन्द्रियै रपि ।
योगिनः कर्म कुर्वन्ति संगं त्यक्त्वा त्मशुद्धये ॥ ११ ॥
युक्तः कर्मफलं त्यक्त्वा शान्ति माप्नोति नैष्ठिकीम् ।
अयुक्तःकामकारेण फले सक्तो निबद्ध्यते ॥ १२ ॥
सर्वकर्माणि मनसा संन्यस्या स्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्व न्नकारयन् ॥ १३ ॥

त्व मारोप्ये त्यर्थः । संगं - फलासक्तिं । त्यक्त्वा । करोति - अहं न किंचित्करोमी त्यनुसन्धानपूर्वकं कर्माचरति । सः । अम्भसा - उदकेन । पद्मपत्रमिव पद्मपलाशमिव । पापेन - देहाद्यात्माभिमान रूपेण बन्धहेतुना । नलिप्यते - न बध्यते ॥ १० ॥

योगिनः कर्मयोगनिष्ठाः । संगं - स्वर्गादिफलासंगम् । त्यक्त्वा । आत्मशुद्धये - प्राचीनकर्मबन्धनाशाय । कायेन - शरीरेण । मनसा - चित्तेन । बुद्ध्या-अध्यवसायात्मिकया । केवलैः - अभिनिवेशरहितैः । इन्द्रियैरपि - श्रोत्रादिवागादिभिश्च । कर्म । कुर्वन्ति ॥ ११ ॥

युक्तः - आत्मैकप्रवणतया ऽऽ त्मव्यतिरिक्तफलेष्वचपलः । कर्मफलं । त्यक्त्वा । कर्मानुतिष्ठन्निति शेषः । नैष्ठिकीं - स्थिरां । शान्ति - आत्मानुभवरूपांनिर्वृतिं । आप्नोति - प्राप्नोति । अयुक्तः - आत्मानुभवविमुखतया ऽ त्मव्यतिरिक्तफलेषुचपलः । कामकारेण - कामतः प्रवृत्त्या । फले - स्वर्गादिरूपे । सक्तः - आसक्तः । कर्म कुर्वन्नित्यनुषंगः । निबध्यते - नित्यसंसारीभवति ॥१२॥

अथदेहाकारेण परिणतायां प्रकृतौकर्तृत्वसन्न्यासउच्यते (सर्वेति) वशी जितेन्द्रियः । देही । मनसा - आत्मनःकर्मकर्तृत्वं नस्वरूपप्रयुक्तं, अपितु - कर्ममूलदेह सम्बन्धप्रयुक्तमिति विवेकविषयेणमनसा । कर्माणि - स्वयमनुष्ठीयमानानि । नवद्वारे - नेत्रनासिके

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभाव स्तु प्रवर्तते ॥ १४ ॥

नादत्ते कस्यचि त्पापं न चैव सुकृतं विभुः ।
अज्ञानेना वृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

श्रोत्रे मुखं पायूपस्थौचेत्येवंरूपैर्नवभिर्द्वारैर्युक्ते । पुरे - नगरे, शरीर इत्यर्थः । सन्न्यस्य - त्यक्त्वा । नैवकुर्वन् – देहसम्बन्धप्रयुक्तं किमप्य कुर्वन्नेव । नकारयन् - अन्येनापि किंचिदकारयन्नेव । सुखंयथा तथा । आस्ते - वसति ॥ १३॥

साक्षादात्मनस्स्वाभाविकं रूपमाह (नेति) प्रभुः - अकर्मवश्यः स्वाभाविकरूपेणावस्थित आत्मा । लोकस्य - देवमनुष्यादिप्रकृतिसंसृष्टतया वर्तमानस्य जनस्य । कर्तृत्वम् । नसृजति – देवाद्यसाधारणं कर्तृत्वं नोत्पादयति । कर्माणि - तत्तदसाधारणकर्माणि । न सृजति । कर्मफलसंयोगं - तत्तत्कर्मजन्य देवादिभावरूप फलसंयोगश्च । नसृजति । कस्तर्हि ? सृजतीत्यत आह (स्वभावइति) स्वभावः – पूर्वपूर्वजन्मजनित देवाद्याकार प्रकृतिसंसर्गकृत प्रकृतिवासनारूपः । प्रवर्तते – प्रवृत्तिं करोति ; कर्तृत्वादिकं सर्वमनादिप्रकृतिवासना प्रयुक्तं नस्वरूपप्रयुक्तमित्यर्थः ॥ १४ ॥

विभुः - प्रकृतिवियुक्तस्वरूपआत्मा । कस्यचित् – स्वसम्बन्धितया ऽभिमतस्य पुत्रादेः । पापं - दुःखम् । नादत्ते – न परिहरति । कस्यचित् - प्रतिकूलतयाभिमतस्य कस्यापि । सुकृतम् - सुखञ्च । नैवादत्ते – नपरिहरति । अयं कस्यचिदपि नानुकूलो न प्रतिकूलश्चेत्यर्थः । अनुकूलत्वाभिमानादिकन्तु वासनाकृतमिति भावः । नन्वीदृशस्वभावस्य कथमियं वासनोत्पद्यत इत्यत्राह (अज्ञानेनेति) अज्ञानेन – ज्ञानविरोधिप्राचीनकर्मणा । ज्ञानं – जन्तूनामात्मयाथा-

ज्ञानेन तु तदज्ञानं येषां नाशित मात्मनः ।
तेषा मादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥
तद्बुद्धय स्तदात्मान स्तन्निष्ठा स्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

त्म्य विषयकं ज्ञानम् । आवृतं - स्वस्वरूपानुभव योग्यत्वायाच्छादितम् , संकुचितमित्यर्थः । तेन - ज्ञानावरणेन । जन्तवः - जीवाः । मुह्यन्ति - देहात्माभिमानादिरूपं मोहं प्राप्नुवन्तीत्यर्थः । अतोऽस्य विपरीतवासनाचोपपद्यत इति भावः ॥ १५ ॥

नन्वीदृशमज्ञानं केन निवर्तत इत्याकांक्षायां " सर्वं ज्ञानप्लवेन" "ज्ञानाग्निस्सर्वकर्माणि" इत्यादिना पूर्वोक्तमेव स्मारयति (ज्ञानेनेति) येषां - आत्मनां । ज्ञानेन - आत्मयाथात्म्यविषयकज्ञानेनतु । तत - ज्ञानावरणभूतं । अज्ञानं - प्राचीनकर्मसंचयरूपम् । नाशितं । ध्वंसितम् । तेषां । तत् - स्वाभाविकम् । परं - अपरिच्छिन्नं ज्ञानम् । आदित्यवत - सूर्यइव । प्रकाशयति - सर्वं यथावस्थितं प्रत्यक्षीकरोति ॥ १६ ॥

प्रकृतिविमुक्तात्मस्वरूपोपासकानां फलमाह (तद्बुद्धय इति) तद्बुद्धयः - तस्मिन् - अज्ञाननाशके प्रकृतिविमुक्तात्म स्वरूपदर्शनरूपे ज्ञाने, बुद्धिः - अध्यवसायः, येषां ते तथोक्ताः । तदात्मानः - तद्विषयमानसाः । तन्निष्ठाः - तस्मिन् - आत्मज्ञाने, निष्ठा - स्थैर्यं, येषान्ते तथोक्ताः , तज्ज्ञानाभ्यासपरा इत्यर्थः । तत्परायणाः - तदेव , परायणं - परमप्रयोजनं , येषान्ते तथोक्ताः । अतएव । ज्ञाननिर्धूतकल्मषाः - ज्ञानेन - अनवरताभ्यस्तज्ञानेन , निर्धूतानि - विनाशितानि, कल्मषाणि - प्राचीनकर्माणि, येषान्ते तथोक्ताः । एवं

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिता स्समदर्शिनः ॥ १८ ॥
इहैव तै र्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्मा द्ब्रह्मणि ते स्थिताः ॥ १९ ॥

विधाः पुरुषाः । अपुनरावृत्ति-पुनरावृत्तिरहितावस्थापन्नमात्मानम् । गच्छन्ति - प्राप्नुवन्ति ॥ १७ ॥

प्रकृतिविनिर्मुक्त मात्मस्वरूप माह (विद्येति) पण्डिताः - आत्मस्वरूपयाथात्म्यविदः । विद्याविनयसम्पन्ने - विद्या - ज्ञानं, विनयः - तत्कार्यभूतो ऽनौद्धत्यगुणः, ताभ्यां, सम्पन्ने पुंसि । ब्राह्मणे - ततो निकृष्टे केवलब्राह्मणे । गवि - धेनौ । हस्तिनि - ततो महति गजे । शुनि - शुनकेच । श्वपाकेच - श्वमांसभक्षकेच । विद्यमाने प्रकृष्टनिकृष्टशरीरगत आत्मस्वरूप इति शेषः । समदर्शिन एव - समं - ज्ञानैकाकारतया समानं यथा तथा, पश्यन्तीति तथोक्ताः । ब्राह्मणाद्याकारवैषम्यं प्रकृतेरेव, नात्मनः, आत्मातु सर्वत्र ज्ञानैकाकारतया सम इत्येव पश्यन्तीत्यर्थः ॥ १८ ॥

साम्यदर्शनस्य माहात्म्य माह (इहेति) तैः - पुरुषैः । इहैव - साधनानुष्ठानदशायामेव । सर्गः - सृष्टिः, संसारः । जितः - नाशितः । येषां - पुरुषाणाम् । मनः । साम्ये - सर्वे ष्वात्मसु ज्ञानैकाकारतया समत्वे । स्थितं - निष्ठितम् । तत्र हेतु माह । हि - यस्मा त्कारणात् । निर्दोषं - प्रकृतिसंसर्गदोषविनिर्मुक्तम् । समं - ज्ञानैकाकारतया समान मात्मवस्तु । ब्रह्म । तस्मात् । ते - साम्यनिष्ठाः । ब्रह्मणि । स्थिता एव । अत आत्मसु ज्ञानैकाकारतया-साम्य मनुसन्दधाना मुक्ता एवेत्यर्थः ॥ १९ ॥

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धि रसम्मूढो ब्रह्मवि द्ब्रह्मणि स्थितः ॥ २० ॥
बाह्यस्पर्शे ष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुख मक्षय्य मश्नुते ॥ २१ ॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

येना कारेणा वस्थितस्य कर्मयोगिन स्समदर्शनरूपज्ञान विपाको भवति तमेव प्रकार मुपदिशति (नेति) पुमान् । प्रियं - अनुकूलम् । प्राप्य । नप्रहृष्येत् - प्रहर्ष न प्राप्नुयात । अप्रियं - प्रतिकूलंच । प्राप्य । नोद्विजेत - भयं न प्राप्नुयात् । तत्र हेतु माह (स्थिरबुद्धिरिति) स्थिरबुद्धिः - स्थिरे - आत्मनि, बुद्धि र्यस्य स तथोक्तः । असम्मूढः - अस्थिरेण शरीरेणा त्मान मेकीकृत्य मोहः - सम्मोहः, तद्वान् सम्मूढः, स नभवती त्यस म्मूढः । तत्र हेतु माह (ब्रह्मविदिति) ब्रह्मवित् - उपदेशेन लब्ध ब्रह्मज्ञानः । ब्रह्मणि - विषये । स्थितः - अभ्यासयुक्तश्च । भवे दिति शेषः ॥ २० ॥

यः - पुमान् । बाह्यस्पर्शेषु - शब्दादिबहिर्विषयानुभवेषु । असक्तात्मा - आसक्तिरहितमनाः । आत्मन्येव । सुखम् । वि न्दति - लभते । सः । ब्रह्मयोगयुक्तात्मा - ब्रह्मयोगे - ब्रह्मा भ्यासे, युक्तः, आत्मा - मनः, यस्य स तथोक्त स्सन् । अक्षयम् । सुखं - मोक्षरूपम् । अश्नुते ॥ २१ ॥

प्राकृतभोगस्य सुत्यजतामाह (येहीति) संस्पर्शजाः - सं स्पर्शेन - विषयेन्द्रियसन्निकर्षेण, जाताः । ये । भोगाः - विषयानु भवाः । आद्यन्तवन्तः - आद्यन्तौ - उत्पत्तिविनाशौ, एषां स्त

शक्नोतीहैव य स्सोढुं प्राक्छरीर विमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्त स्स सुखीनरः ॥ २३ ॥
यो ऽ न्तःसुखो ऽ न्तराराम स्तथांतर्ज्योति रेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतो ऽ धिगच्छति ॥ २४ ॥
लभन्ते ब्रह्मनिर्वाण मृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

इत्याद्यन्तवन्तः - अल्पकालवर्तिन इत्यर्थः । ते - भोगाः । दुःखयोनयः - दुःखस्य, योनयः - कारणान्येव हि । हे कौन्तेय ! तेषु - भोगेषु । बुधः - विषयस्वरूपयाथात्म्यवित् । न रमते- न क्रीडति ॥२२॥

यः - नरः । शरीरविमोक्षणात् - शरीरत्यागात् । प्राक् - पूर्वं । यावद्देहपात मित्यर्थः । इहैव - साधनानुष्ठानदशायामेव । कामक्रोधोद्भवं - कामक्रोधजनितम् । वेगं - शरीरेन्द्रियक्षोभरूपम् । सोढुं - निरोद्धुम् । शक्नोति - समर्थो भवति । आत्मानुभवे प्रीत्यतिशयादिति भावः । सः - नरः । युक्तः - आत्मानुभवयोग्यः । स एव । सुखी - शरीरमोक्षानन्तर मात्मानुभवैकसुख स्सम्पत्स्यते ॥ २३ ॥

यः - योगी । अन्तस्सुखः - अन्तः - आत्मन्येव, सुखं यस्य स तथोक्तः । बहि र्विषयानुभवं सर्वं विहाया त्मानुभवैकसुख इत्यर्थः । अन्तरारामः - अन्तः - आत्मैव, आरामः - क्रीडास्थानं, यस्य स तथोक्तः । तथा । यः - योगी । अन्त र्ज्योति रेव - अन्तः - आत्मन्येव, ज्योतिः - ज्ञानं, यस्य स तथोक्तः । आत्मैकविषयज्ञान इत्यर्थः । सः । ब्रह्मभूतः - ब्रह्मनिष्ठः । योगी । ब्रह्मनिर्वाणं - आत्मानुभवैकसुखम् । अधिगच्छति - प्राप्नोति ॥ २४ ॥

छिन्नं, द्वैधं - शीतोष्णादिद्वन्द्वं, येषां ते तथोक्ताः । यतात्मानः - यतः - आत्मन्येव नियतः, आत्मा - मनः, येषां ते तथो-

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां ॥ २६ ॥
स्पर्शा न्कृत्वा बहि र्बाह्यां श्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धि र्मुनि र्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो य स्सदा मुक्त एव सः ॥ २८ ॥

क्ताः । सर्वभूतहिते - सर्वेषां भूतानां हिते - इष्टसाधन एव । रताः - आत्महित इव निरताः । ऋषयः - अतीन्द्रियार्थद्रष्टारः, आत्माव लोकनपरा इत्यर्थः । एतादृशाः । क्षीणकल्मषाः - क्षीणानि - नष्टानि, कल्मषाणि - आत्मप्राप्तिविरोधिपापानि, येषां ते तथोक्ता स्सन्तः । ब्रह्मनिर्वाणं - आत्मानुभवसुखं । लभन्ते - प्राप्नुवन्ति ॥ २५ ॥

उक्तलक्षणानां कर्मयोगिनां ब्रह्मा त्यन्तसुलभ मित्याह । (कामेति) कामक्रोधवियुक्तानां - रागद्वेषरहितानां । यतीनां - यत्नशीलानां । यतचेतसां - यतं - विषयेभ्यो निवर्तितं, चेतो येषां तेषां तथोक्तानाम् । अत एव । विजितात्मनां - जितमनस्कानां, पुरुषाणाम् । निर्वाणं - सुखरूपम् । ब्रह्म - आत्मस्वरूपम् । अभितो वर्तते - करस्थ मित्यर्थः ॥ २६ ॥

उक्तं कर्मयोगं योगशिरस्क मुपसंहरति " स्पर्शा " नित्यादि श्लोकद्वयेन । यः - कर्मयोगी । बाह्यान् - बहिर्भवान्, आत्मव्यतिरिक्तानितियावत । स्पर्शान् - विषयानुभवान् । बहिःकृत्वा-बहिष्कृत्य, त्यक्त्वेत्यर्थः । चक्षुश्च । भ्रुवोः । अन्तरएव । कृत्वा । नासाभ्यन्तरचारिणौ - नासिकाया अभ्यन्तरचारिणौ - उच्छ्वास निश्वास रूपेणान्त स्सञ्चरन्तौ । प्राणापानौ । समौ - समगती । कृत्वा ॥ यतेंद्रियमनोबुद्धिः - यताः - आत्मावलोकना दन्यत्रप्रवृत्त्यनर्हीकृताः, इंद्रि

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्ति मृच्छति ॥ २९ ॥

इति श्रीभगवद्गीतायां पंचमोध्यायः ॥ ५ ॥

याणि - बाह्येन्द्रियाणिदश, मनः - चित्तं, बुद्धिः - अध्यवसायश्च, यस्य स तथोक्तः । अतएव । विगतेच्छाभयक्रोधः - रागभयद्वेषरहितः । मोक्षपरायणः - मोक्षैकप्रयोजनः । मुनिः – आत्ममननशीलः, आत्मावलोकनशीलश्च । भवति । सः । सदा - सर्वदा, साध्यदशायामिव साधनानुष्ठानदशायामपीत्यर्थः । मुक्तएव-निवृत्तसंसारएव ॥ २७ ॥ २८ ॥

योगशिरस्कस्य कर्मयोगस्य सुशकत्वमाह (भोक्तारमिति) कर्मयोगाधिकारी । मां । सर्वलोकमहेश्वरं · सर्वेषां लोकानां महतामीश्वरं : सर्वेषां लोकेश्वराणामपीश्वरमित्यर्थः । सर्वभूतानां - सर्वेषां प्राणिनां । सुहृदं - परममित्रभूतं । अतएव । यज्ञतपसां - यज्ञाः - महायज्ञादयः - तपांसि - कृच्छ्रचान्द्रायणादीनि, तेषां । भोक्तारं - आराध्यम् । ज्ञात्वा - विदित्वा । शान्ति - कर्मयोगानुष्ठाने सुखं । ऋच्छति - प्राप्नोति ॥ २९ ॥

इति श्रीमद्गीताभाष्यार्थ संग्रह तात्पर्यदीपे
श्री वरवरमुनि विरचितायां बालबोधिन्याख्यायां
गीतार्थ संग्रहदीपिकायां

पंचमोऽध्यायः ॥ ५ ॥

श्री रस्तु ।

अथ षष्ठोऽध्यायः ।

॥ श्रीभगवानुवाच ॥

अनाश्रितः कर्मफलं कार्यं कर्म करोतियः ।
स सन्नयासी च योगी च न निरग्नि र्नचाक्रियः ॥ १ ॥
यं सन्यासमिति प्राहु र्योग न्तं विद्धि पाण्डव ।
नह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

एवं कर्मयोगं सपरिकरमुक्त्वे दानीं ज्ञानयोग कर्मयोग साध्या त्मावलोकनरूप योगस्याभ्यासो विधीयते । तत्कर्मयोगमेव निर पेक्षात्मावलोकनरूप योगसाधनत्वेन प्रशंसति " अनाश्रित " इत्या- दिना । यः । कर्मफलं - स्वर्गादिकं । अनाश्रितः - अनपेक्षमाण स्सन् । कार्यं - सर्वसुहृद्भूत परमपुरुषाराधनरूपत्वा त्स्वतःप्रयो जनभूतम् । कर्म - यज्ञादिकं । करोति - स्वतः प्रयोजनबुद्ध्या ऽनुतिष्ठतीत्यर्थः । सः । सन्नयासी - ज्ञानयोगनिष्ठश्च । योगी - कर्म योगनिष्ठश्च । आत्मावलोकनरूप योगसाधनोभयनिष्ठ इत्यर्थः । निरग्निः - अग्निशब्दे नाग्निसाध्यानि कर्माण्युच्यन्ते, नविद्यन्तेऽग्नयो· यस्य स तथोक्तः । न - सन्नयासी न भवति । अक्रियः - नविद्य- न्ते - क्रियाः - अनग्निसाध्याः, पूर्तादिकाः यस्य स तथोक्तः । नच - सन्नयासी न भवति ॥ १ ॥

ननु ज्ञानेनविना ऽ निवृत्तदेहात्माभिमानस्य केवलं कर्माचरतः कथं ज्ञानयोगित्व मित्यत्राह (यमिति) यं । सन्नयासइति - ज्ञानयोग इति । प्राहुः - पण्डिताः प्रवदन्ति । हे पाण्डव ! तं । योगं - कर्म

आरुरुक्षो र्मुने र्योगं कर्म कारण मुच्यते ।
योगारूढस्य तस्यैव शमः कारण मुच्यते ॥ ३ ॥
यदाहि नेन्द्रियार्थेषु न कर्म स्वनुषज्जते ।
सर्वसंकल्पसन्नयासी योगारूढ स्तदोच्यते ॥ ४ ॥

योगमेव । विद्धि - जानीहि । न कर्मयोग बहिर्भूतो ज्ञानयोगइत्यर्थः । तत्र हेतुमाह (नहीति) हि - यस्मात्कारणात् । कश्चन - कश्चिदपि । योगी - कर्मयोगी । असन्नयस्त संकल्पः - असन्नयस्तः - अपरित्यक्तः, संकल्पः - देहात्माभिमानः, येनसतथोक्तः, आत्म याथात्म्य ज्ञानशून्यइति यावत् । न भवति - न विद्यते । उक्तलक्षण कर्मयोगएव ज्ञानमप्यस्तीतिभावः ॥ २ ॥

कर्मयोगएवा प्रमादेन योगंसाधयतीत्याह (आरुरुक्षोरिति) योगं - आत्मावलोकनरूपं । आरुरुक्षोः - आरोढुमिच्छोः - प्राप्तुमिच्छोः । मुनेः - मननशीलस्य मुमुक्षोः । कर्म - कर्मयोगएव । कारणं - साधनं। उच्यते । शास्त्रेष्वितिशेषः । योगारूढ़स्य - प्रतिष्ठितयोगस्य । तस्यैव - मुमुक्षोः । शमः - कर्मनिवृत्तिः । कारणं - मोक्षसाधनं । उच्यते । यावदात्मावलोकनप्राप्ति कर्म कार्य मित्यर्थः ॥ ३ ॥

कदा ऽ यं प्रतिष्ठितयोगो भवतीत्यत्राह (यदाहीति) यदा । अयं कर्मयोगी । इन्द्रियार्थेषु - आत्मव्यतिरिक्त प्राकृतविषयेषु । नानुषज्जते - आत्मानुभवैक प्रवणतया तत्र संगं नकरोति । कर्मसुच तत्साधनभूतेषु । नानुषज्जते । तदाहि । सर्वसंकल्प सन्नयासी - सर्वान् , संकल्पान् - मनोरथान्, सन्नयासितुं शील मस्यास्तीति तथोक्तः । योगारूढः - प्रतिष्ठितयोगः । उच्यते ॥ ४ ॥

उद्धरे दात्मना ऽऽत्मानं नात्मान मवसादयेत् ।
आत्मैव ह्यात्मनो बन्धु रात्मैव रिपु रात्मनः ॥ ५ ॥
बन्धु रात्मा त्मन स्तस्य येना त्मैवा त्मनो जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेता त्मैव शत्रुवत् ॥ ६ ॥
जितात्मनः प्रशांतस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथामानावमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

आत्मना-विषयाननुषक्तेन मनसा । आत्मानं - स्वात्मानं । उद्धरेत्-संसारादुत्तारयेत । आत्मानं । नावसादयेत-विषयानुषक्तेन मनसा नक्लेशये दित्यर्थः । हि-यस्मात्कारणात । आत्मनः-स्वस्य । आत्मैव - विषयाननुषक्तं मनएव । बन्धु- हितः । आत्मैव-विषयानुषक्तम्मनएव । रिपुः - शत्रुः । प्रतिकूलइत्यर्थः ॥ ५ ॥

उक्तमेवार्थं विवृणोति (बन्धुरिति) येन पुरुषेण । आत्मनैव - स्वेनैव । आत्मा - मनः । जितः - विषयविमुखीकृतः । तस्य । आत्मनः - स्वात्मनः । आत्मा । बन्धुः । अनात्मनः - अजितमनस्क-स्यतुपुरुषस्य । आत्मैव - स्वकीयंमनएव । शत्रुवत - शत्रुणातुल्यं । शत्रुत्वे - स्वाभीष्ट प्रतिबन्धादि शत्रुकृत्ये । वर्तेत - प्रवर्तेतेत्यर्थः ॥६॥

योगस्यारम्भावस्था माह (जितेति) शीतोष्णसुखदुःखेषु । तथा । मानावमानयो श्च । एवं रूपेषु द्वन्द्वेषु । जितात्मनः - जित मनस्क स्य - निर्विकारचित्तस्येति यावत् । अत एव । प्रशान्तस्य - निर्दुः खस्य पुरुषस्य । आत्मा - शुद्धस्वरूपो जीवः । परं - अत्यन्तम् । समाहितः - सम्यङ्मनस्याहितः, ध्यानविषयो भवतीत्यर्थः ॥ ७ ॥

ज्ञानं - आत्मस्वरूपज्ञानम् , विज्ञानं - आत्मनः प्रकृतिविवि-क्ताकारज्ञानम् , ताभ्यां, तृप्तः - निर्वृतः, आत्मा - मनः, यस्य

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धि र्विशिष्यते ॥ ९ ॥
योगी युंजीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशी रपरिग्रहः ॥ १० ॥

स तथोक्तः । कूटस्थः कूटे देवत्वमनुष्यत्वादि सकलावस्था स्वनुवर्तमानतया सर्वसाधारणे ज्ञानैकाकार आत्मनि, तिष्ठतीति - तथोक्तः, तदेकनिष्ठ इत्यर्थः । अत एव । विजितेन्द्रियः - निर्जित सकलेन्द्रियः । समलोष्टाश्मकांचनः - लोष्टं - घटशकलं, अश्मा - पाषाणः, कांचनं - स्वर्णं, एतानि, समानि - अविशेषतया प्रतीयमानानि, यस्य स तथोक्तः । प्रकृतिविविक्तात्मस्वरूपनिष्ठतया प्राकृतवस्तुषु भोग्यताबुद्ध्यभावा दिति भावः । एवंविधः । योगी - कर्मयोगी । युक्तः - आत्मावलोकनरूपयोगाभ्यासयोग्यः । इत्युच्यते - एवं तत्त्वज्ञैः कथ्यते ॥ ८ ॥

सुहृदः - वयोविशेषा नादरेण हितैषिणः, मित्राणि - सवयसो हितैषिणः, अरयः - निमित्तवशेनानर्थाकांक्षिणः, उदासीनाः - उभयहेत्वभावा द्धितैषित्वाहितैषित्वोभयरहिताः, मध्यस्थाः - जन्मत एव तदुभयरहिताः, द्वेष्याः - जन्मत एवानर्थैषिणः, बन्धवः - जन्मत एव हितैषिणः, तेषु । साधुषु - धर्मशीलेषु च । पापेषु - पापशीलेष्वपि । समबुद्धिः - तुल्यधीः । तैः प्रयोजनाभावा द्विरोधाभावा च्चेति भावः । एवंभूतः पुरुषः । विशिष्यते योगाभ्यासार्हत्वेऽतिशेते ॥९॥

अथ सांगयोग मुपदिशति "योगी" त्यादिना । यतचित्तात्मा - नियतमनोबुद्धिः । निराशीः - आत्मव्यतिरिक्तसकलवस्तुनि निरपेक्षः । अपरिग्रहः - परिग्रहशून्यः । आत्मव्यतिरिक्ते कस्मिंश्चिदपि वस्तुनि ममतारहितः । एवंविधः । योगी - कर्मलक्षणयोग

शुचौ देशे प्रतिष्ठाप्य स्थिर मासन मात्मनः ।
नात्युच्छ्रितं नातिनीचं चेलाजिन कुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्या सने युंज्या द्योग मात्मविशुद्धये ॥ १२ ॥
समं कायशिरोग्रीवं धारय न्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चा नवलोकयम् ॥ १३ ॥

निष्ठः । रहसि - विजने निश्शब्दे च देशे । एकाकी - असहायः । स्थित स्सन् । सततं - अहरहर्योगकाळे । आत्मानं - स्वात्मानम् । युंजीत - युक्तं कुर्वीत, स्वदर्शननिष्ठं कुर्वीतेत्यर्थः ॥ १० ॥

शुचौ - पवित्रे । देशे - स्थळे । आत्मनः - स्वस्य । अत्युच्छ्रितं- अत्युन्नतं , न भवतीति- नात्युच्छितम् । अतिनीचं - अतिनिम्नं , न भवतीति-नातिनीचम् । चेलं - वस्त्रं, अजिनं - व्याघ्रादिचर्म, ते, कुशोत्तरे - कुशेभ्य उपरि स्थिते, यस्मिन् त च्चेळाजिनकुशोत्तरं- कुशोपर्यजिनं - अजिनस्योपरि चेलं चास्तीर्येत्यर्थः । स्थिरं - अचं- चलम् । आसनं - दार्वादिनिर्मितम् । प्रतिष्ठाप्य - निक्षिप्य ॥ ११ ॥

तत्र - तस्मिन् आसने । उपविश्य - उपविष्टः । मनः । एकाग्रं - योगैकप्रवणम् । कृत्वा - विधाय । यताः - उपसंहृताः, चित्तस्य - मनसः, इन्द्रियाणां - श्रोत्रादीनां च, क्रियाः - व्यापाराः, येन सः - यतचित्तेन्द्रियक्रिय स्सन् । आत्मविशुद्धये - आत्मनो बन्धनिवृत्तये । योगं - आत्मावलोकनम् । युंज्यात - कुर्यादित्यर्थः ॥१२॥

कायशिरोग्रीवं - कायः - मध्यदेहः, शिरः - मूर्धा, ग्रीवा - कण्ठः, तासां द्वन्द्वैकवचनं तत् । समं - अवक्रम् । अचलं - निश्चलम् । स्थिरं - सापाश्रयत्वेन दृढं च यथा तथा । धारयन् । दिश श्च । अनवलोकयन् - अपश्यन् ॥ १३ ॥

प्रशान्तात्मा विगतभी र्ब्रह्मचारिव्रते स्थितः ।
मन स्संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥
युञ्ज न्नेवं सदा त्मानं योगी नियतमानसः ।
शान्ति निर्वाणपरमां मत्संस्था मधिगच्छति ॥ १५ ॥
नात्यश्नतस्तु योगोऽस्ति न चैकान्त मनश्नतः ।
नचाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

स्वं - स्वकीयम् । नासिकाग्रं - नासाग्रभागम् । सम्प्रेक्ष्य - दृष्ट्वा । नासाग्रनिवेशितार्ध निमीलितनयन इत्यर्थः । प्रशान्तात्मा - अत्यन्तनिर्वृतमनाः । विगतभीः - वीतभयः । ब्रह्मचारिव्रते - ब्रह्मचर्यव्रते । स्थितः - वर्तमानः । मनः । संयम्य - सम्यङ् नियम्य, विषयेभ्य उपसंहृत्येत्यर्थः । मयि चित्तं यस्य सः - मच्चित्तः । युक्तः - अवहितः । अहमेव परं प्राप्यं यस्य सः - मत्परः, तथाभूतश्च सन् । आसीत - मामेव चिन्तयन् वर्तेतेत्यर्थः ॥ १४ ॥

योगाभ्यासफल माह (युंजन्निति) एवं - उक्तरीत्या । मयि ब्रह्मणि । सदा - सन्ततम् । आत्मानं - मनः । युंजन् - समाहितं कुर्वन् । नियतमानसः - निश्चलचित्तः । मत्संस्थां - मयि, संस्था - सम्पत्तिः यस्यां तां तथोक्ताम् । निर्वाणपरमां - सुखकाष्ठारूपाम् । शान्ति - संसारनिवृत्तिरूपां मुक्तिम् । अधिगच्छति ॥ १५ ॥

एवमात्मयोगमारभमाणस्य भगवति शुभाश्रये चेतस स्स्थिति मभिधायान्यदपि योगोपकरण माह (नेति) हे अर्जुन! अत्यश्नतस्तु अमितं भुञ्जानस्यच । योगः - आत्मावलोकनाभ्यासरूपः । नास्ति - नसिद्ध्यति । एकान्तम् - अत्यन्तम् । अनश्नतः - अभुञ्जानस्यच । नास्ति । अतिस्वप्नशीलस्य - अतिनिद्रास्वभावस्यच । नास्ति । जाग्रतः - अत्यन्तजागरणशीलस्यच । नास्त्येव । अत्रात्यन्ताहारविहारशीलस्यात्यन्तमायासानायास शीलस्यच योगासिद्धिरनुसन्धेया ॥१६॥

युक्ताहार विहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥
यदा विनियतं चित्त मात्मन्येवा वतिष्ठते ।
निःस्पृह स्सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥
यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योग मात्मनः ॥ १९ ॥

तर्हि कथंभूतस्य योगसिद्धिरित्यत्राह (युक्तेति) युक्ताहारविहारस्य - युक्तौ - मितौ, आहारविहारौ – आहारसंचारौ, यस्य तस्य तथोक्तस्य । कर्मसु · कार्येषुविषये । युक्तचेष्टस्य - मितायासस्य । युक्तस्वप्नावबोधस्य - मितनिद्राजागरस्यच । दुःखहा-सकलबन्धनाशनः । योगः । भवति - सिद्ध्यति ॥ १७ ॥

योगार्हस्य स्वरूप माह (यदेति) यदा - यस्मिन् काले । चित्तं - प्रयोजनचिन्तापरं मनः । आत्मन्येव । विनियतं - निरतिशयप्रयोजनतया विशेषेण निश्चलम् । अवतिष्ठते - प्रतिष्ठितं भवति । तदा - तस्मिन् काले । सर्वकामेभ्यः । निस्पृहः – निवृत्ताशस्सन् । युक्तः - योगार्ह इति । उच्यते ॥ १८ ॥

यतचित्तस्यात्मस्वरूपं दृष्टान्तमुखेन स्फुटयति (यथेति) यथा । निवातस्थः - वातरहितप्रदेशस्थः । दीपः । नेंगते - न चलति । अचलप्रभश्च तिष्ठति । यतचित्तस्य - यतं - निवृत्तं, चित्तं – सकलबाह्यविषयमनोव्यापारः, यस्य तस्य । योगिनः । योगम् - स्वात्मविषयकावलोकनाभ्यासम् । युञ्जतः – कुर्वतः । आत्मनः – स्वस्वरूपस्य । सा – निवातस्थो दीपः । उपमा - दृष्टान्तः ॥ १९ ॥

यत्रो परमते चित्तं निरुद्धं योगसेवया ।
यत्र चै वात्मना त्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥
सुख मात्यन्तिकं यत्त द्बुद्धिग्राह्य मतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थित श्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मि न्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥
तं विद्या द्दुःखसंयोग वियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ २३ ॥

अथ योगस्वरूपं वदन् तस्यावश्यकर्तव्यता माह " यत्रे " त्यादि श्लोकचतुष्टयेन । योगसेवया - योगाभ्यासेन हेतुना । निरुद्धं - सर्वविषयान्तरेभ्यो निवर्तितम् । चित्तं - मनः । यत्र - योगे । उपरमते - अतिशयित सुख मिद मिति रमते - क्रीडति । यत्र च - योगे.। आत्मना - मनसा । आत्मानम् । पश्यन् - अवलोकयन् । आत्मन्येव । तुष्यति । अन्यत्रावेक्षते ॥ २० ॥

अतीन्द्रियं - विषयेन्द्रियसम्बन्धाजन्यम् । बुद्धिग्राह्यं - बुद्ध्या ग्राह्यं, आत्मविषयकबुद्ध्येकविषयभूतम् । आत्यन्तिकम् :- नित्यम् । यत्तत् - किमपि । सुखम् । यत्र - योगे । वेत्ति - अनुभवति । यत्र - योगे । स्थितः । अयं - पुरुषः । तत्त्वतः - तद्भावात् । न चलत्येव । सुखातिशयादिति भावः ॥ २१ ॥

यं - योगम् । लब्ध्वा । ततः - योगात् । अधिकं - अतिशयितम् । अपरं - अन्यम् । लाभं च । न मन्यते । यस्मिन् - योगे । स्थितः - निष्ठावान् । गुरुणा - गुणवत्पुत्रवियोगादिजानततया ऽधिकेनापि । दुःखेन - शोकेन । न विचाल्यते - नप्रकम्प्यते ॥२२॥

तम् । दुःखसंयोगवियोगं - दुःखसंयोगस्य - दुःखसम्बन्धस्य, वियोगं - प्रत्यनीकम्, विरोधिन मिति यावत् । योगसंज्ञितं -

संकल्पप्रभवा न्कामां स्त्यक्त्वा सर्वा नशेषतः ।
मनसै वेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥
शनैश्शनै रुपरमे द्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनःकृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥
यतोयतो निश्चरति मन श्चंचल मस्थिरम् ।
ततस्ततो नियम्यैत दात्मन्येव वशं नयेत् ॥ २६ ॥

योगशब्दाभिधेयम् । विद्यात् - जानीयात् । सः । योगः । निश्चयेन - एवंरूपो योग इत्यारम्भदशायामेव निर्णयेन । अनिर्विण्णचेतसा-अनिर्विण्णेन - फलसिद्धौ किंचिद्विळम्बे निर्वेदरहितेन; चेतसा - चित्तेन । योक्तव्यः - कर्तव्यः ॥ २३ ॥

संकल्पप्रभवान् - संकल्पात् - देहात्माभिमानरूपात् , प्रभवः - जन्म, येषां तां स्तथोक्तान् । सर्वान् - पुत्रक्षेत्रशब्दस्पर्शादिविषयकान् समस्तान् । कामान् - मनोरथान् । अशेषतः - सवासनं यथा तथा । त्यक्त्वा - विहाय । समन्ततः - सर्वस्मादपि विषयात् । इन्द्रियग्रामं - इन्द्रियसमूहम् । मनसैव - विषयदोषानुसन्धानपरेण चेतसैव । विनियम्य - उपसंहृत्य ॥ २४ ॥

धृतिगृहीतया - धृतिः - विवेकः, गृहीता - विषयीकृता, यया तया तथोक्तया । बुद्ध्या - अध्यवसायेन । शनैश्शनैः - मन्दम्मन्दम् । उपरमेत् - आत्मव्यतिरिक्तविषया दुपरतो भवेत । मनः - चित्तम् । आत्मसंस्थं - आत्मैकनिष्ठम् । कृत्वा । किंचिदपि - आत्मव्यतिरिक्तं किमपि । न चिन्तयेत ॥ २५ ॥

रजोगुणवशा न्मनश्चलने किं कर्तव्य मित्यत्राह (यत इति) चंचलं - चलनस्वभावम् । अस्थिरं - आत्मनि स्थैर्यरहितम् । मनः । यतोयतः - यस्मिन्यस्मिन् विषये । निश्चरति - निर्गच्छति । तत

प्रशान्तमनसं ह्येनं योगिनं सुख मुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूत मकल्मषम् ॥ २७ ॥
युंजन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्श मत्यन्तं सुखमश्नुते ॥ २८ ॥

सर्वभूतस्थ मात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

स्ततः - तस्मा त्तस्मा द्विषयात् । एतत - मनः । नियम्य । आत्म न्येव - विषये । वशम् । नयेत् - प्रापयेत् ॥ २६ ॥

एवं पुनः पुनः प्रत्याहारेण मनोवशीकरणफल माह (प्रशान्तेति) हि - यस्मा त्कारणात् । अकल्मषं - योगाभ्यासेन दग्ध कल्मषम् । अत एव । शान्तरजसं - नष्टरजोगुणम् । अत एव । प्रशान्तमनसं - प्रशान्तं - आत्मान्यविषयेभ्य उपरतं, मनो यस्य तं तथोक्तम् । अत एव । ब्रह्मभूतं - स्वस्वरूपेणावस्थितम् । एनम् । योगिनम् । उत्तमं - उत्कृष्टम् । सुखं - स्वरूपानुभवरूपम् । उपैति - प्राप्नोति । उत्तमसुखरूपत्वा दात्मस्वरूपस्येति भावः ॥ २७ ॥

एवं - उक्तप्रकारेण । आत्मानं । युञ्जन् - योगेनावलोकयन् । अत एव । विगतकल्मषः - विगतसमस्त प्राचीनपापः । योगी । ब्रह्म संस्पर्शं - ब्रह्मानुभवरूपं । अत्यन्तं - अपरिमितं - सुखं । सुखेन - अनायासेन । सदा - सततं । अश्नुते - अनुभवति ॥ २८ ॥

अथ चतुर्विधा योगविपाकावस्थोच्यते " सर्वभूतस्थ " मित्यादिना । योगयुक्तात्मा - योगेनयुक्तः - आत्मा - मनो यस्यसथोक्तः पुरुषः । सर्वत्र - प्रकृतिवियुक्तेषु सर्वेष्वात्मसु । समदर्शनः - ज्ञानैकाकारतया तुल्यबुद्धिस्सन् । आत्मानं - स्वस्वरूपं । सर्वभूतस्थं - सर्वेषु भूतेषु तिष्ठतीति तथोक्तं, सर्वभूत समानाकार मित्यर्थः । सर्वभूतानि -

योमां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥
सर्वभूतस्थितं यो मां भज त्येकत्व मास्थितः ।
सर्वथा वर्तमानो ऽपि स योगी मयि वर्तते ॥ ३१ ॥

सर्वभूताना मात्मस्वरूपाणि । आत्मनि - स्वात्मनि । स्थितानीतिशेषः । स्वात्मसमानाकाराणिचेत्यर्थः । ईक्षते - पश्यति । अनेन सर्वेष्वात्मसु साम्यदर्शनावस्थोक्ता भवति ॥ २९ ॥

ततोप्यधिकदशामाह (यइति) यः - योगी । मां - मत्स्वरूपं । सर्वत्र - सर्वेष्वात्मस्वरूपेषु । पश्यति । सर्वं - आत्मवस्तु । मयिच, पश्यति । प्रकृतिसम्बन्धविनिर्मुक्तानां परमात्मना सह परमसाम्य मापन्नानांच जीवात्मनां परमात्मनश्च समानाकारत्वादितिभावः । अहं । तस्य - योगिनः । नप्रणश्यामि - अदृश्योनभवामि । ' सदापश्यन्ती ' त्युक्तरीत्या तस्य सर्वदाऽ परोक्षानुभवविषयोभवामीत्यर्थः । मे - ममच । सः - योगी । नप्रणश्यति - अदृश्योनभवति । सर्वदा मत्कृपावलोकन विषयो भवतीत्यर्थः । अनेनात्मपरमात्मनोस्साम्य दर्शनावस्थोक्ता ॥ ३० ॥

ततोप्यधिकां विपाकावस्थामाह (सर्वेति) यः - योगी । सर्वभूतस्थितं - सर्वेषुभूतेष्वन्तर्यामितया ऽवस्थितं । मां । एकत्वं - असंकुचितज्ञानैकाकारतयैक्य । आस्थितः - अंगीकृतवान् सन् । भजति - योगदशायां देवत्वमनुष्यत्वादि प्राकृतभेदपरित्यागेन सुदृढं भजते । सः । योगी । शरीरादुत्थानकाले । सर्वथा - सर्वप्रकारेण, केनापिप्रकारेणेत्यर्थः । वर्तमानोपि । मयि वर्तते - मामेव चिन्तयन्वर्तत इत्यर्थः ॥ ३१ ॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

॥ अर्जुन उवाच ॥

यो ऽयं योग स्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चंचलत्वात् स्थितिं स्थिराम् ॥ ३३ ॥
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

ततो विपाककाष्ठा माह (आत्मौपम्येनेति) हे अर्जुन! यः-योगी। आत्मौपम्येन - आत्मनां-प्रकृतिवियुक्तात्मनां, औपम्येन -असंकुचितज्ञानैकाकारत्वसाम्येन हेतुना। सर्वत्र - स्वात्मन्यन्येषुच। वर्तमानमितिशेषः। सुखं - पुत्रजन्मादिरूपम्। यदि वा दुःखम् -वद्धियोगादिदुःखमपिवा। समं-तुल्यम्। पश्यति स्वकीयसुखदुःखे परकीयसुखदुःखसमतया पश्यतीत्यर्थः। सः। योगी। परमः - योगकाष्ठां गतः। मतः - सम्मतः ॥ ३२ ॥

उक्तरूपस्य योगस्य मनोनिग्रहसाध्यत्वा त्तन्निग्रहोपायजिज्ञासया ऽर्जुनः पृच्छति - "योयं योग" इत्यादि श्लोकद्वयेन। हे मधुसूदन! त्वया। साम्येन - ज्ञानैकाकारतया समत्वेन। योयं योगः - सर्वेषु स्वात्मसु परमात्मनि च समदर्शनरूपः। प्रोक्तः। चञ्चलत्वात् - मनस श्चलस्वभावत्वा द्धेतोः। एतस्य - सर्वत्र समदर्शनरूपयोगस्य। स्थिरां - अचञ्चलाम्। दीर्घकाला मिति यावत्। स्थितिम्। अहम्। न पश्यामि ॥ ३३ ॥

हे कृष्ण। चंचलं - अनवरताभ्यस्तविषयेष्वपि स्वत एव चंचलम्। मनः - चित्तम्। प्रकर्षेण मथितुं शील मस्यास्तीति प्रमाथि - शरीरेन्द्रियक्षोभकर मित्यर्थः। अत एव। बलवत् -

॥ श्रीभगवा नुवाच ॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्यो वाप्त मुपायतः ॥ ३६ ॥

॥ अर्जुन उवाच ॥

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कांगतिं कृष्ण गच्छति ॥ ३७ ॥

जेतु मशक्यम् । तत्र हेतु माह (दृढ़मिति) दृढं - अनादिवासनया विषयान्तरे ष्वनिवर्त्यं प्रसरं हि । तस्य - चपलस्वभावस्य मनसः । वायोरिव- प्रतिकूलगते महावातस्येव । निग्रहम्,- कदाचिदप्यनभ्यस्त आत्मनि नियमनम् । सुदुष्करं - अतीव कर्तु मशक्यम् । अहम् । मन्ये - जानामि । अतो मनोनिग्रहोपायो वक्तव्य इति भावः ॥ ३४ ॥

हे महाबाहो ! चलं - स्वभाव चञ्चलं । मनः । दुर्निग्रहं - निगृहीतुमशक्यम् । असंशयं - अस्मिन्नर्थे संशयोनास्ति । किन्तु - हे कौन्तेय ! अभ्यासेन - आत्मनि कल्याणगुणाश्रयत्वानुसन्धान जनिताभिमुख्येन । वैराग्येण - आत्मव्यतिरिक्तेषु दोषाश्रयत्वानुसन्धान जनित वैतृष्ण्येनच । गृह्यते - कथंचिन्नियम्यते ॥ ३५ ॥

असंयतात्मना - असंयतः - अनिर्जितः, आत्मा - मनः, येनसः तेन तथोक्तेनपुंसा । योगः - सर्वत्र समदर्शनरूपः । दुष्प्रापः - सर्वथापि प्राप्तुमशक्य एव । इति । मे - मम । मतिः - निश्चयः । किन्तु । उपायतः - पूर्वोक्तान्तर्गतं ज्ञानमदाराधनैकरूप कर्मयोगेनोपायेन । वश्यात्मना-वशीकृतमनसा । यतता - यत्नं कुर्वन्तापुरुषेण । योगः । अवाप्तुं- प्राप्तुं । शक्यः ॥ ३६ ॥

अभ्यासवैराग्याभावादप्राप्तयोगः किंफलं प्राप्नोतीत्यर्जुनःपृच्छति " अयतिःश्रद्धये " त्यादि श्लोकत्रयेण । हेकृष्ण ! श्रद्धया-

कच्चि न्नोभयविभ्रष्ट श्छिन्नाभ्र मिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥
एतन्मे संशयं कृष्ण च्छेत्तुमर्हस्य शेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥ ३९ ॥

श्रीभगवा नुवाच ।

पार्थ नैवेह नामुत्र विनाश स्तस्य विद्यते ।
न हि कल्याणकृ त्कश्चि द्दुर्गतिं तात गच्छति ॥ ४० ॥

आस्तिक्यबुद्ध्या । उपेतः, योगे प्रवृत्तः । अयतिः - दृढतराभ्यास रूपयत्नरहितः । योगसंसिद्धिम् - योगस्य-समदर्शनरूपस्य, संसिद्धि-सम्य क्सिद्धिम् । अप्राप्य - अलब्ध्वा । योगात् । चलितमानसः - च्युतमनस्कः पुरुषः । कां गतिं - भोगमोक्षयो र्मध्ये किं फलम् । गच्छति - प्राप्नोति ॥ ३७ ॥

हे महाबाहो । अप्रतिष्ठः - प्रतिष्ठारहितः - अनुष्ठीयमानेषु कर्मसु फलाभिसन्धिसहित इत्यर्थः । ब्रह्मणः । पथि - उपक्रान्तब्रह्मप्राप्ति साधनभूतयोगमार्गे । विमूढः - प्रच्युतः । अत एव । उभय विभ्रष्टः - भोगमोक्षरूपोभय पुरुषार्थशून्यस्सन् । छिन्नाभ्रमिव - पूर्वस्मान्महतो मेघा द्विश्लिष्य मेघान्तरञ्चाप्राप्तं यदभ्रं - मेघशकलं, तदिव । ननश्यतिकच्चित - नष्टो न भवति किं ॥ ३८ ॥

हे कृष्ण । मे-मम । एतं । संशयं - किं भोगमोक्षयोरन्यतरत्फलं प्राप्नोति - किंवा - उभयभ्रष्टोनश्यतीत्येवं रूपं सन्देहं । अशेषतः - सवासनम् । छेत्तुं - परिहर्तुम् । अर्हसि । हि - यस्मा त्कारणात् । त्वदन्यः - त्वद्व्यतिरिक्तः । अस्य । संशयस्य । छेत्ता - परिहर्ता । नोपपद्यते - न सम्भवति ॥ ३९ ॥

हे पार्थ । तस्य - श्रद्धया योग मुपक्रम्य तस्मा च्च्युतस्य । इह - अस्मिन् लोके । अमुत्र - परस्मिन् लोके च । विनाशः -

प्राप्य पुण्यकृतां लोका नुषित्वा शाश्वती स्समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टो ऽभिजायते ॥ ४१ ॥
अथवा योगिनामेव कुले भवति धीमताम ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

प्राकृतभोगानुभवे ब्रह्मानुभवे चाभीष्टानवाप्तिरूपः प्रत्यवायरूपानिष्टावाप्तिरूपश्च । नैव विद्यते । हि - यस्मा त्कारणात् । कल्याणकृत् - निरतिशयकल्याणरूपयोगकृत् । कश्चित् । दुर्गतिं - प्राकृतभोगानवाप्ति मनिष्टावाप्तिं वा । न गच्छति - कालत्रयेपि न प्राप्नोति ॥ ४० ॥

कथ मुभयं भविष्यतीत्यत्राह (प्राप्येति) योगभ्रष्टः - योग प्रच्युतः पुरुषः । पुण्यकृतां - सुकृतिनाम् । लोकान् - स्वर्गादीन् । प्राप्य । तत्र । शाश्वतीः - बह्वीः । समाः - संवत्सरान् । उषित्वा - स्थित्वा । ततः । शुचीनां - परिशुद्धानां, सदाचारशीलाना मित्यर्थः । श्रीमतां - ऐश्वर्यसम्पन्नानाम् । गेहे - गृहे । अभिजायते - अभिजातो भवति । योगोपक्रम एव भ्रष्टे उपक्रान्तयोगमाहात्म्या द्योगोपक्रमयोग्यानां कुले भवतीति भावः ॥ ४१ ॥

अल्पकालाभ्यस्तयोगभ्रष्टस्य गति रुक्ता । परिपक्वयोग भ्रष्टस्य तु पक्षान्तर माह (अथवेति) योगभ्रष्टः इत्य नुषज्यते । चिराभ्यस्तयोगा त्प्रच्युतः । धीमतां - स्वयमेव योगो पदेशसमर्थानाम् । योगिनां - योगं कुर्वतामेव । कुले - गृहे । भवति - जायते । ईदृशं - योगयोग्यानां योगिनां च कुले लभ्य मानम् । यत् । जन्म । एतत् - जन्म । लोके । दुर्लभतरं - प्राकृतजनाना मत्यन्तदुर्लभं हि ॥ ४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः ।
जिज्ञासु रपि योगस्य शब्दब्रह्मा तिवर्तते ॥ ४४ ॥
प्रयत्ना द्यतमानस्तु योगी संशुद्ध किल्बिषः ।
अनेकजन्मसंसिद्ध स्ततो याति परांगतिम् ॥ ४५ ॥

ततः किमित्यत आह (तत्र तमिति) हे कुरुनन्दन । तत्र - तस्मिन्नुभयविधे जन्मनि । पौर्वदेहिकं - पूर्वदेहे भवम् । तमेव । बुद्धिसंयोगं - बुद्ध्या योगविषयया, संयोगं - सम्बन्धम् । लभते - प्राप्नोति । ततः - तदनन्तरम् । सुप्तप्रबुद्ध इव । भूयः - पुनरपि । संसिद्धौ - योगसिद्धौ विषये । यतते - यत्नं करोतिच ॥४३॥

सः - योगभ्रष्टः । अवशः - अनिच्छन्नपि । तेन । पूर्वाभ्यासेन - पूर्वेणाभ्यासेनैव । ह्रियते - योगविषय एवाकृष्यते । हि - एतद्योग माहात्म्यं प्रसिद्ध मित्यर्थः । इम मर्थं कैमुतिकन्यायेन द्रढयति - (जिज्ञासुरिति) जिज्ञासुः - योगे प्रवृत्तिं विना केवलं ज्ञातु मिच्छ न्नपि पुरुषः । शब्दब्रह्म - देवमनुष्यादिपृथिव्यन्तरिक्षादिशब्दाभि लापयोग्यं ब्रह्म प्रकृतिः, तत् । अतिवर्तते - अतिक्रामति, प्रकृति सम्बन्धा न्मुक्तो भवति; देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानानन्दैक स्वरूप मात्मानं प्राप्नोतीत्यर्थः ॥ ४४ ॥

योगी - चलितयोगस्तु । प्रयत्नात् - प्रयत्नेन । यतमानः - उत्तरोत्तर मधिकयोगे यत्नं कुर्वन् । संशुद्धकिल्बिषः - संशुद्धं - योगेन विधूतं, किल्बिषं - यस्य स तथोक्तः । अनेकजन्मसंसिद्धः - अनेकेषु जन्मस्वभ्यासेन संसिद्धयोग स्सन् । तत एव । परां - उत्कृष्टाम् । गतिम् । याति - प्राप्नोति ॥ ४५ ॥

तपस्विभ्यो धिको योगी ज्ञानिभ्योपि मतोधिकः ।
कर्मिभ्य श्चाधिको योगी तस्मा द्योगी भवा ऽर्जुन ॥ ४६ ॥
योगिना मपि सर्वेषां मद्गते नान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

इति षष्ठोध्यायः ॥ ६ ॥

योगिनस्सर्वस्मा दाधिक्यमाह (तपस्विभ्य इति) योगी । तपस्विभ्यः - कृच्छ्रचान्द्रायणादि तपोनिष्ठेभ्यो ऽपि । अधिकः - श्रेष्ठः । ज्ञानिभ्यः - शास्त्रजन्य ज्ञानवद्भ्यो ऽपि । अधिकः । कर्मिभ्यः - इष्टापूर्तादि कर्मानुष्ठानपरेभ्योपि । योगी । अधिकः । मतः - सम्मतः । तस्मात् - कारणात् । हे अर्जुन । त्वं । योगी - योगनिष्ठः । भव ॥ ४६॥

एवं परविद्यांगभूतं प्रत्यगात्मावलोकनमुक्त्वा परविद्यांप्रस्तौति (योगिनामिति) यः - योगी । मद्गतेन - प्रीत्यतिशयान्मदेकप्रवणेन । अन्तरात्मना - मनसा । श्रद्धावान् - मत्प्राप्तिविषयकत्वरायुक्तस्सन् । मां - अखिलहेय प्रत्यनीककल्याणैकतानं । भजते - उपास्ते । सः । सर्वेषां - योगविपाकभेदेन भिन्नानां पूर्वोक्तानां । योगिनामपि - षष्ठ्या स्संम्बन्धसामान्यविषयत्वेन योगिभ्योपीति पंचम्यर्थेषष्ठी, वक्ष्यमाण योगिनः पूर्वोक्तयोगिष्वनन्तर्गतत्वेन निर्धारणषष्ठ्य सम्भवात् । मे - मम । युक्ततमः - श्रेष्ठतमः । मतः - सम्मतः ॥ ४७ ॥

इति श्रीमद्गीताभाष्यार्थसंग्रह तात्पर्यदीपे
श्री वरवरमुनिविरचितायां बालबोधिन्याख्यायां
गीतार्थसंग्रह दीपिकायां

षष्ठोऽ ध्यायः ॥ ६ ॥

श्री रस्तु।

अथ सप्तमोध्यायः।

श्रीभगवा नुवाच ।

मय्यासक्तमनाः पार्थ योगं युंज न्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥
ज्ञानं तेहं सविज्ञान मिदं वक्ष्याम्य शेषतः ।
यज्ज्ञात्वा नेह भूयोन्य ज्ज्ञातव्य मवशिष्यते ॥ २ ॥

एवं प्रथमेनाध्यायषट्केन परब्रह्मप्राप्त्युपायभूतस्य तदुपासनस्यांगभूत मात्मज्ञानपूर्वक कर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनस्स्वरूप याथात्म्यदर्शनमुक्तं । इदानीं मध्यमेनषट्केन परब्रह्मस्वरूपं भक्तिशब्दवाच्यं तदुपासनंचोच्यते । तत्र सप्तमेध्याये भगवत्स्वरूप याथात्म्यं तस्य प्रकृत्यातिरोधानं तन्निवृत्तये भगवत्प्रपत्ति रुपासकभेदो ज्ञानिन श्श्रैष्ठ्यंचोच्यते । हेपार्थ - अर्जुन । मदाश्रयः - अहमेवाश्रयो यस्य समदाश्रयः - मया विनास्वात्मधारणाशक्त्या मदेकाधारः । मयि - विषये । आसमन्तात् सक्तं मनोयस्यसः - आसक्तमनाः । योगं । युञ्जन् - कर्तुं प्रवृत्तः । त्वं । समग्रं - सकलं । मां - योगविषयभूतंमां । यथा - येनज्ञानेन । असंशयं - संशयरहितं यथा तथा । ज्ञास्यसि । तत - ज्ञानं । शृणु - सावधानमाकर्णय ॥ १ ॥

वक्ष्यमाणं ज्ञानंस्तौति (ज्ञानमिति) सविज्ञानं - समस्त चिद॰ चिद्वस्तु ज्ञानाद्विविक्ताकारविषयं ज्ञानं - विज्ञानं, तेन सहितं । अशेषतः - अशेषं । इदं - वक्ष्यमाणरूपं । ज्ञानं - मत्स्वरूपविषयकं ज्ञानम् । ते - तव । अहम् । वक्ष्यामि । यत् - ज्ञानम् ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चि न्मां वेत्ति तत्त्वतः ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृति रष्टधा ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

ज्ञात्वा । इह - मयि । भूयः - पुनरपि । ज्ञातव्यं - ज्ञेयम् । अन्यत् - तत्त्वम् । नावशिष्यते - अवशिष्टं न भवति ॥ २ ॥

वक्ष्यमाण ज्ञानदुर्लभत्वमाह (मनुष्याणामिति) मनुष्याः - शास्त्राधिकारिणः, तेषां । सहस्रेषु - मध्ये । कश्चिदेव । सिद्धये - मम साक्षात्काररूपसिद्धिपर्यन्तम् । यतति - यत्नं करोति । स एव प्रथमं दुर्लभइत्यर्थः । यततां - सिद्धिपर्यन्तं यतमानानां । सहस्रेषु । कश्चिदेव । मां । वेत्ति - विदित्वासिद्धये यत्नं करोतीत्यर्थः । अयं पूर्वोक्ताधिकारिणोपि दुर्लभः । सिद्धानां - मद्विषयज्ञानवतामपि । सहस्रेषुमध्ये । कश्चिदेव । तत्त्वतः - यथावत् । मां । वेत्ति । तथा विधाधिकारी परमदुर्लभ इति भावः ॥ ३ ॥

एवं श्रोतारमभिमुखीकृत्याथ प्रतिज्ञातमर्थं वक्तुमारभते (भूमिरित्यादि) भूमिः - पृथिवी । आपः - जलं । अनलः - अग्निः । वायुः - मारुतः । खं - आकाशः । मनः - मनःप्रभृतीन्द्रियवर्गः । बुद्धिः - महत्तत्त्वंच । अहंकारः - सात्त्विकराजसतामसभेदेन त्रिविधोऽहंकारश्च । इति - अनेन प्रकारेण । अष्टधा - अष्टभिः प्रकारैर्भिन्ना । इयं । प्रकृतिः । मे - मदीया ॥ ४ ॥

इयं - अष्टधा भिन्ना मे प्रकृतिः । अपरा - जडत्वा न्निकृष्टा । हे महाबाहो । इतः - अचेतनभूतायाः प्रकृतेः । अन्यां - विल-

एतद्योनीनि भूतानि सर्वाणी त्यपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥
मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ।
मयि सर्व मिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥
रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

क्षणाम् । जीवभूतां - जीवरूपाम् । मे । प्रकृतिं तु । परां - भज ङत्वा द्भोक्तृत्वा त्प्रिधानत्वा ञ्चोत्कृष्टाम् । विद्धि - जानीहि । यया - जीवरूपया मत्प्रकृत्या । इदं - स्थावरजंगमात्मकम् । जगत् । धार्यते - शरीरियां ऽन्तः प्रविश्य ध्रियते ॥ ५ ॥

तस्याः प्रकृतित्वं दर्शयन् तद्द्वारा स्वस्य जगत्कारणत्व माह (एतद्योनीनीति) सर्वाणि - ब्रह्मादीनि स्तम्बपर्यन्तानि । भूतानि । एतद्योनीनि - एतत - परापररूपप्रकृतिद्वयं, योनिः - उपादानकारणम्, येषां तानि तथोक्तानि । इति -अनेन प्रकारेण । उपधारय - जानीहि । अत एव । कृत्स्नस्य - मदीयप्रकृतिद्वयमयस्य समस्तस्य । जगतः - प्रपंचस्य । अहं- तयोरपि योनिभूतो ऽहम् । प्रभवत्यस्मा दिति प्रभवः - उत्पत्तिकारणम् । तथा । प्रलीयते ऽस्मिन्निति प्रळयः - लयकारणं च ॥ ६ ॥

हे धनंजय । मत्तः - मदपेक्षया । अन्यत् । परतरं - उत्कृष्टतरम् । किंचिदपि - वस्तु । नास्ति । सर्वम् । इदं - चिदचिद्वस्तुजातम् । सूत्रे - तन्तौ । मणिगणा इव - रत्नसमूहा इव । मयि । प्रोतं - आश्रितम् ॥ ७ ॥

समस्त चिदचिद्वस्तु शरीरिणः स्वस्मादन्यस्याभावा त्स्वयमेव सर्वमित्याह पंचभिःश्लोकैः । हे कौन्तेय । अप्सु - जलेषु । रसः -

पुण्यो गन्धः पृथिव्यांच तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धि र्बुद्धिमता मस्मि तेज स्तेजास्विना महम् ॥ १०
बलं बलवतांचाहं कामरागविवर्जितं ।
धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ॥ ११ ॥

मधुरादिः । अहमेव । शशि सूर्ययोः - चन्द्रसूर्ययोः । प्रभा - कान्तिः । अहं । अस्मि । सर्ववेदेषु । प्रणवः । अहमेव । खे - आकाशे । शब्दः । अहमेव । नृषु - मनुष्येषु । पौरुषम् - उद्योगः । अहम् ॥ ८ ॥

पृथिव्यां । पुण्यः - सुरभिः । गन्धश्च । विभावसौ - अग्नौ । तेजश्च । अहं । अस्मि । सर्वभूतेषु - सर्वप्राणिषु । जीवनं - प्राण धारणं । तपस्विषु - वानप्रस्थादिषु । तपः - कायक्लेशादिरूपतपश्च । अहं । अस्मि ॥ ९ ॥

हे पार्थ । सर्वभूतानां । सनातनं - उत्तरोत्तरकार्येष्वनुस्यूत- तयानित्यं । बीजं - स्वजातीयकार्यारम्भसामर्थ्यं । मां । विद्धि । बुद्धिमतां - प्रज्ञावतां । बुद्धिः - प्रज्ञाच । अहं । अस्मि । तेज स्विनां - पराभिभवन सामर्थ्यवतांजनानाम् । तेजः - पराभिभवन साम- र्थ्यंच । अहं ॥ १० ॥

कामरागविवर्जितं - कामः - अप्राप्तवस्तुष्वभिलाषः, रागः - अभिलषितार्थलाभेपि पुनरधिकार्थेतृष्णा, ताभ्यां विवर्जितं । बलवतां- जनानां । बलं - सर्व स्वधर्मानुष्ठान सामर्थ्यंच । अहं । हे भरतर्षभ । भूतेषु - देवमनुष्यादिषु । धर्माविरुद्धः - धर्मस्याप्रतिकूलः । कामश्च । अहं । अस्मि ॥ ११ ॥

ये चैव सात्त्विका भावा राजसा स्तामसा श्च ये ।
मत्त एवेति तान् विद्धि नत्वहं तेषु ते मयि ॥ १२ ॥
त्रिभि र्गुणमयै र्भावै रेभि स्सर्व मिदं जगत् ।
मोहितं नाभिजानाति मा मेभ्यः परमव्ययम् ॥ १३ ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते माया मेतां तरन्ति ते ॥ १४ ॥

सात्त्विकाः - सत्त्वप्रधानाः । ये । भावाः - शमदमादयःपदार्थाः । सन्ति । राजसाः - रजोगुणप्रधानाः । येच । भावाः । हर्षदर्पादयः । सन्ति । तामसाः - तमोगुणप्रधानाः । येच । भावाः - शोकमोहादयः । सन्ति । तान् - सर्वानेवभावान् । मत्तएवेतिविद्धि - मत्सकाशादेवजातान्विद्धि । अहन्तु । तेषु । न - तदायत्तस्थितिर्नभवामीत्यर्थः । ते - भावाः । मयि । मदायत्तस्थितिका इत्यर्थः. ॥ १२ ॥

गुणमयैः - सत्त्वादिगुणप्रचुरैः । त्रिभिः - त्रिविधैः । एभिः - पूर्वोक्तैः । भावैः । इदं - देवमनुष्याद्यात्मकम् । सर्वम् । जगत् । मोहितं सत् । एभ्यः - भावेभ्यः । परं - विप्रकृष्टम् । एभि रस्पृष्ट मिति यावत् । अव्ययं - सदैकरूपम् । माम् । नाभिजानाति - ज्ञातुं न शक्नोति ॥ १३ ॥

तर्हि त्वां केवा जानन्ती त्यत्राह (दैवीति) गुणमयी - सत्त्व रजस्तमोमयी । दैवी - देवेन - क्रीडाप्रवृत्तेन, मयैव निर्मिता । एषा । मम । माया - प्रकृतिर्हि । दुरत्यया - दुरतिक्रमा । तर्हि तद्वि मोचनोपायः क इत्यत्राह (मामेवेति) ये । मामेव । प्रपद्यन्ते - शरणं व्रजन्ति । ते । एतां - मदीयाम् । मायाम् । तरन्ति - अतिक्रम्य मामेवोपासत इत्यर्थः ॥ १४ ॥

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भाव माश्रिताः ॥ १५ ॥
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासु रर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्ति र्विशिष्यते ।
प्रियो हि ज्ञानिनोत्यर्थ महं स च मम प्रियः ॥ १७ ॥

एवंविधां भगवत्प्रपत्तिं सर्वेपि किमिति न कुर्वत इत्यत्राह (नमामिति) दुष्कृतिनः - पापकर्माणः । अत एव, मूढाः - अविदितमत्स्वरूपाः । नराधमाः - ततोपि दुष्कृताधिक्येन मत्स्वरूपापरिज्ञानात् प्राकृतेष्वेव भोगेषु सक्ताः पुरुषापशदाः । माययापहृतज्ञानाः - सामान्यतो मत्स्वरूपज्ञाने जातेपि पूर्वेभ्यो दुष्कृतातिशया द्युक्त्याभासरूपया मायया नष्टमद्विषयज्ञानाः । आसुरं - असुरसम्बन्धिनम् । भावं - स्वभावम् । आश्रिताः - पूर्वेभ्योपि दुष्कृतातिशया न्मद्विषयं मदैश्वर्यविषयं च ज्ञानं येषां मयि द्वेषायैव भवति त आसुरस्वभावा इत्यर्थः । एते चत्वारः । माम् । न प्रपद्यन्ते ॥ १५ ॥

हे भरतर्षभ - भरतश्रेष्ठ । अर्जुन । सुकृतिनः - पुण्यकर्माणः । चतुर्विधाः - सुकृततारतम्येनोत्तरोत्तर मधिकतया चतुःप्रकाराः । जनाः । मां - मामेव । भजन्ते - शरणवरणपूर्वक मुपासते । तानेव चतुःप्रकारा नाह । आर्तः - नष्टैश्वर्यः पुनस्तत्प्राप्तिकामः । अर्थार्थी - अप्राप्तैश्वर्य स्तत्प्राप्तिकामः । जिज्ञासुः - प्रकृतिवियुक्तज्ञानैकस्वरूप केवलात्मप्राप्तीच्छुः । ज्ञानी - मच्छेषतैकरसात्मस्वरूपज्ञानवत्तया मत्प्राप्तिकाम श्च ॥ १६ ॥

तेषा म्मध्ये ज्ञानी श्रेष्ठ इत्याह (तेषामिति) नित्ययुक्तः - मया नित्ययोगवान् । इतरेषां तु स्वाभीष्टप्राप्तिपर्यन्तमेव मया योग

उदारा स्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थित स्स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८ ॥
बहूनां जन्मना मन्ते ज्ञानवा न्मां प्रपद्यते ।
वासुदेवः सर्व मिति स महात्मा सुदुर्लभः ॥ १९ ॥

इतिभावः । एकभक्तिः - एकस्मिन् - मय्येव, भक्ति र्यस्य स तथोक्तः । इतरेषां तु स्वाभीष्टवस्तुनि तत्साधनभूते मयि च तद्भक्ति रित्यर्थः । ज्ञानी । तेषां - पूर्वोक्तानां चतुर्णा म्मध्ये । विशिष्यते - अतिशेते । किंच । अहम् । ज्ञानिनः । अत्यर्थं - अर्थः - अभिधेयः, तमतिक्रान्तं यथा भवति तथा । प्रियः - प्रीतिविषयः । तस्य मद्विषयप्रीतिः सर्वज्ञेन सर्वशक्तिना मयापि परिच्छिद्याभिधातुं न शक्यत इत्यर्थः । सः - ज्ञानीच । मम । अत्यर्थम् । प्रियः ॥ १७ ॥

एते - पूर्वोक्ताः । सर्वे - आर्तप्रमुखा श्चत्वारः । उदाराः - ममवदान्या एव । ये मत्सकाशाद्यत्किंचिदपि गृह्णन्ति - तेहि मम सर्वस्वदायिन इति भावः । ज्ञानीतु । मे - मम । आत्मैव - धारक एव । तदायत्तधारणो हमित्यर्थः । इति । मे । मतं - मतिः । एवम्मन्य इत्यर्थः । हि - यस्मात्कारणात् । सः - ज्ञानी । युक्तात्मा - युक्तः - मदेकायत्तस्थितिः, आत्मा - स्वरूपं, यस्य सतथोक्तः । अत एव । मामेव । अनुत्तमां - नविद्यते उत्तमागतिर्यस्यास्तां, परमामित्यर्थः । गतिं - प्राप्यं । आस्थितः - आश्रितः । अतस्सोपि ममात्मेतिभावः ॥ १८ ॥

बहूनां - भूयसां । जन्मनां - पुण्यजन्मनां । अन्ते - अवसाने । ज्ञानवान् - अहं वासुदेवशेषतैकरस स्तदायत्तस्वरूपस्थिति प्रवृत्तिकः, सचा संख्येयकल्याणगुणाकरतया सर्वस्मात्परः, इत्येवं रूपज्ञानसम्पन्नोभूत्वा । सर्वं - परमंप्राप्यं प्रापकं अन्यदपि यन्मनीषितं तत्सर्वं च । वासुदेवः - वसुदेवकुले ऽवतीर्ण स्सर्वात्मको भगवानेव । इति । मां । प्रपद्यते - उपास्ते । सः । महात्मा - महामनाः । सुदुर्लभः - लोके ऽत्यन्त दुर्लभः ॥ १९ ॥

कामै स्तै स्तै र्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवताः ।
तं तं नियम मास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥
यो यो यां यां तनुं भक्तः श्रद्धया र्चितु मिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधा म्यहम् ॥ २१ ॥
स तया श्रद्धया युक्त स्तस्याराधन मीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥ २२ ॥

ज्ञानिनो दुर्लभत्वमेवोपपादयति (कामैरिति) सर्वेलौकिकाः पुरुषाः । स्वया - स्वकीयया । प्रकृत्या - वासनया । नियताः - नित्यमान्विताः । तै स्तैः - स्ववासनानुगुणैः । कामैः - काम्यमानै र्विषयैरेव । हृतं - अपहृतं - प्रतिबद्धं, ज्ञानं - मत्स्वरूपविषयं, येषा न्ते तथोक्तास्सन्तः । अन्यदेवताः - मद्व्यतिरिक्ताः केवलेन्द्रादि देवताः । तं तं नियमं - तत्त द्देवताविशेषमात्रप्रीणना साधारणं नियमं । आस्थाय - आश्रित्य । प्रपद्यन्ते - तत्त त्कामसिद्ध्यर्थ माराधयन्ति ॥२०॥

योयः - पुरुषः । सर्वा देवतामदीया स्तनव इत्यजानन्नपीत्यर्थः । यां यां तनुं - इन्द्रादिरूपां मदीयां तनुं । भक्तः - भक्तियुक्तस्सन् । श्रद्धया - आस्तिक्यबुद्ध्या । अर्चितुं - आराधयितुं । इच्छति । तस्य तस्य - अजानतोपि पुरुषस्य । अहं - मत्तनुविषयाह्येषामियं श्रद्धेति जानन्नहं । तामेव - तत्तनुविषयामेव । श्रद्धां । अचलां - निर्विघ्नां । विदधामि - करोमि ॥ २१ ॥

सः - पुरुषः । तया - निर्विघ्नीकृतया श्रद्धया । युक्तस्सन् । तस्य मत्तनुभूतस्येन्द्रादेः । आराधनं - अर्चनंप्रति । ईहते - चेष्टते । अनुतिष्ठतीत्यर्थः । ततः - मत्तनुभूतेन्द्रादि देवताराधनात । मयैव - मत्तनुभूतेन्द्रादि देवताराधनमपि वस्तुतो मदाराधनमेवेति मन्वानेन तत्तदन्तर्यामिणा मयैव । विहितान् वितीर्णान् । तान् -स्वाभिलषितान् । कामान् । लभते - प्राप्नोति । हेतिप्रसिद्धौ, अयमर्थ श्शास्त्रेषु प्रसिद्ध इत्यर्थः ॥ २२ ॥

अन्तवत्तु फलं तेषां त द्भव त्यल्पमेधसाम् ।
देवा न्देवयजो यान्ति मद्भक्ता यान्ति मा मपि ॥ २३ ॥
अव्यक्तं व्यक्ति मापन्नं मन्यन्ते मा मबुद्धयः ।
परं भाव मजानन्तो ममा व्यय मनुत्तमम् ॥ २४ ॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोयं नाभिजानाति लोको मा मज मव्ययम् ॥ २५ ॥

किन्तु - तेषां । अल्पमेधसां - अल्पबुद्धीनां; इन्द्रादिमात्रयाजिना मित्यर्थः । तत् - आराधनजनितं फलं । अन्तवत् - नाशवत् । भवति । कुतइत्यत्राह (देवानिति) देवान् - इन्द्रादीन्, यजन्ति- पूजयन्तीति देवयजः - ते । देवान् यान्ति - देवतासायुज्यं प्राप्नुवन्ति । इन्द्रादिभोगाःखलुपरिमितकालवर्तिनः, अतस्तत्सायुज्यं प्राप्ता स्ते स्वहप्रच्यवन्तइतिभावः । मद्भक्ताअपि । मां । यान्ति -प्राप्नुवन्ति । तेषां कर्मणा म्मदाराधनरूपतां ज्ञात्वा ऽल्पास्थिरफलसंग त्यागपूर्वकं मत्प्रीणनैकप्रयोजकनकतया ऽनुष्ठानादितिभावः ॥ २३ ॥

इतरे सर्वसमाश्रयणीयत्वाय मम मनुष्यादिष्ववतार मप्य किञ्चि त्करं कुर्वन्तीत्याह (अव्यक्तमिति) अबुद्धयः - मद्विषयबुद्धिशून्याः । अव्ययं - सततैकरूपं । अनुत्तमं- सर्वस्मादुत्कृष्टं । परम्-अप्राकृतं । मम । भावम्-स्वभावम् । अजानन्तस्सन्तः । मां । अव्यक्तं-इतःपूर्वमनभिव्यक्तं । व्यक्तिमापन्नं - इदानीं कर्मविशेषाज्जन्मविशेषं प्राप्याभिव्यक्तिमापन्नं । मन्यन्ते - अवबुध्यन्ते । अतोमां नकर्मभि राराधयन्तीति भावः ॥२४॥

कुतएवं नप्रकाशस इत्यतत आह (नाहमिति) योगमायासमावृतः- योगः - देवमनुष्यादि समानसंस्थानशरीरस्य योगः, सएवमाया, तया, समावृतः - आच्छादितस्वरूपः । अहं । सर्वस्य - जनस्य । नप्रकाशः - स्फुटोनभवामि । अतः । मूढः - अज्ञः । अयं । लोकः - जनः । अजं - उत्पत्तिरहितं । अव्ययं - नाशरहितं च । मां । नाभिजानाति- नवेत्ति ॥ २५ ॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥
इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परंतप ॥ २७ ॥
येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

हे अर्जुन ! समतीतानि - अतिक्रान्तानि । वर्तमानानि - इदानीं विद्यमानानि । भविष्याणि - अनागतानिच । सर्वाणि । भूतानि । अहं । वेद - जानामि । मान्तु । कश्चन - कालत्रय वर्तिषु भूतेषु कश्चिदपि । नवेद - सर्वस्मात्परस्सर्वसमाश्रयणीयत्वायाजहत्स्वभावएवावतीर्णइति नजानाति । अतोज्ञानी दुर्लभइतिभावः ॥ २६ ॥

हे परन्तप ! हे भारत ! सर्वभूतानि । इच्छाद्वेषसमुत्थेन – इच्छाद्वेषौ - पूर्वस्मिन् जन्मन्यनुकूलप्रतिकूल रूपद्वन्द्वविषयतया अभ्यस्तौ रागद्वेषौ, ताभ्यां, समुत्थेन - समुत्पन्नेन । द्वन्द्वमोहेन- मुह्यत्यनेनेतिमोहः - मोहहेतुः, तेन - शीतोष्णादिद्वन्द्वरूपेण मोहेन । सर्गे - जन्मकालएव । सम्मोहं - पूर्वजन्मानुभूत सजातीयद्वन्द्वविषयरागद्वेष स्वभावरूपं । यान्ति - पूर्ववासनावशादितिभावः । ज्ञानीतु मत्संश्लेष विश्लेषरूपसुखदुःखविषयरागद्वेषवानितितात्पर्यम् ॥ २७ ॥

कथं तर्हि केचन त्वामेव भजन्तोदृश्यन्त इत्यत्राह(येषामिति)पुण्यकर्मणां-अनेकजन्मार्जितोत्कृष्टपुण्यवतां । येषान्तु । जनानां । पापं, गुणमयद्वन्द्वेच्छाद्वेषहेतुभूतं मदोन्मुख्यविरोधिचानादिकालप्रवृत्तपातकं । अन्तगतं अन्तं - नाशं, गतम् - प्राप्तम् । ते - जनाः । द्वन्द्वमोहनिर्मुक्ताः - मत्प्रपदनेन गुणमयद्वन्द्वरूपा न्मोहाद्विनिर्मुक्ताः । दृढवृताः - दृढसंकल्पास्सन्तः । मामेव । भजन्ते - सुकृततारतम्याद्यथाधिकार मुपासत इत्यर्थः ॥ २८ ॥

जरामरणमोक्षाय मा माश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्न मध्यात्मं कर्म चाखिलम् ॥ २९ ॥
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेपि च मां ते विदु र्युक्तचेतसः ॥ ३० ॥

इति श्री भगवद्गीतायां सप्तमोध्यायः ॥ ७ ॥

अथ त्रयाणामपि भगवन्तं भजमानानां ज्ञातव्यविशेषा नुपादेयांश्च प्रस्तौति - "जरामरणे" त्यादि श्लोकद्वयेन । ये - जनाः । जरामरणमोक्षाय - जरामरणयोः प्रकृतिसम्बन्ध निमित्तकयोः, मोक्षः - सवासननिवृत्तिः, तस्मै - तत्पूर्वकात्म स्वरूपायेत्यर्थः । मां । आश्रित्य - प्रपद्य । यतन्ति - यत्नं कुर्वन्ति । ते । तद्ब्रह्म । कृत्स्नमध्यात्मं । अखिलं कर्म च । विदुः - जानीयुः । एतत्त्रयमपि केवलात्मानुभवकामस्यावश्यं ज्ञातव्यमितिभावः ॥ २९ ॥

एव मात्मप्राप्तिकामस्य ज्ञातव्यमुक्त्वा ऽथैश्वर्यार्थिनो ज्ञातव्यं त्रयाणामप्युपादेयं चाह (साधिभूताधिदैवमिति) येपि- ऐश्वर्यार्थिनः । साधिभूताधिदैवं- अधिभूताधि दैवाभ्यां सहितम् । मां । विदुः, ऐश्वर्यार्थिनामेवम्भूतोऽहं ज्ञातव्यइत्यर्थः । तथा । साधियज्ञं - अधियज्ञ सहितं । मां । विदुः । इदमैश्वर्यार्थिन मुद्दिश्यविधीयमानम प्यर्थस्वाभाव्यात्त्रयाणामपिसाधारणं । त्रयाणांसमविहित नित्यनैमित्तिकरूप महायज्ञाद्यनुष्ठानमवर्जनीयं । तेच । प्रयाणकाले - चरमप्रयाणसमयेपि । युक्तचेतसः - मदासक्त मनसस्सन्तः । मां । विदुः - स्वप्राप्यानुगुणं जानीयुरित्यर्थः । तेचेति चकारात् - जरामरणमोक्षाय यतमाना अपि प्रयाणकाले मां विदुरिति समुच्चीयते । अनेनार्थस्वभावपर्यालोचनया ज्ञानिनोपि साधियज्ञं मां विदुः - प्रयाणकाले मां स्वप्राप्यानुगुणं विदुरित्युक्तंभवति ॥३०॥

इति श्रीगीताभाष्यार्थसंग्रह तात्पर्यदीपे
श्री वरवरमुनिविरचितायां बालबोधिन्याख्यायां
गीतार्थसंग्रह दीपिकायां
सप्तमोऽध्यायः ॥ ७ ॥

श्री रस्तु ।

अथ अष्टमोध्यायः ।

अर्जुन उवाच ।

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्त मधिदैवं किमुच्यते ॥ १ ॥
अधियज्ञः कथं कोत्र देहेस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयो सि नियतात्मभिः ॥ २ ॥

अष्टमे ऽध्याये पूर्वाध्यायप्रस्तुता स्त्रयाणां ज्ञातव्योपादेयभेदा विविच्यन्ते । हे पुरुषोत्तम । जरामरणमोक्षाय भवन्तं प्रपद्य यतमानानां ज्ञातव्यतयोक्तं, तद्ब्रह्म । किम् । अध्यात्मं च । किम् । कर्म च । किम् । ऐश्वर्यार्थिनां ज्ञातव्यतयोक्तं, अधिभूतं - किं प्रोक्तम् । अधिदैवं च । किमुच्यते ॥ १ ॥

हे मधुसूदन । अत्र - अस्मिन् शास्त्रे - यो यो यां यां तनुमिति त्वयोक्ते । अस्मिन् - परिदृश्यमाने । देहे - इन्द्रादिरूपे । त्रयाणामपि ज्ञातव्यतयोक्तः - अधियज्ञः । कः - किं रूपः । कथं - किं प्रकारः । प्रयाणकाले - चरमप्रयाणसमये च । नियतात्मभिः - नियतमानसैः । त्रिभिः । कथं - केन प्रकारेण । ज्ञेयोसि - ज्ञातव्यो ऽसि ॥ २ ॥

॥ श्रीभगवानुवाच ॥

अक्षरं ब्रह्म परमं स्वभावो ऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञो ऽहमेवात्र देहे देहभृतांवर ॥ ४ ॥

परमम् - प्रकृतेः परमम् । न क्षरतीत्यक्षरम् - प्रत्यगात्मस्वरूपम् । ब्रह्म - तद्ब्रह्मेतिपूर्वं निर्दिष्टमित्यर्थः । स्वभावः - प्रकृतितद्वासनादिकम् । अध्यात्मं - कर्मवशादात्मनि सम्बध्यमानतया ऽध्यात्मशब्द निर्दिष्टमित्यर्थः । भूतभावोद्भवकरः - भूतभावः - देवमनुष्यादिभावः, तस्य उद्भवकरः - उत्पत्तिहेतुः । विसर्गः - "पंचम्यामाहुतावापः पुरुषवचसोभवन्ती" ति श्रुत्युक्तरीत्या योषाग्नौ रेतोरूपाया आहुते स्त्यागः । कर्मसंज्ञितः - "कर्मचाखिल"मिति पूर्वं कर्मशब्द निर्दिष्ट-इत्यर्थः । एतत् त्रितयमपि मुमुक्षोःप्राप्यतया परिहरणीयतयाच ज्ञातव्य मित्यर्थः ॥ ३ ॥

क्षरः- क्षरणस्वभावः । भावः- विलक्षणसाश्रयशब्दस्पर्शरूप रसगन्धरूपः पदार्थः । अधिभूतं - वियदादिभूतसम्बन्धितया ऽधिभूत शब्दनिर्दिष्टः । ऐश्वर्यार्थिनां प्राप्यतया ऽ वश्यं ज्ञातव्यइतिभावः । पुरुषः- भोक्तृत्वावस्थापन्नोजीवः । अधिदैवतं - इन्द्रप्रजापतिप्रभृति दैवतोपरिवर्तमानतया ऽधि दैवतशब्दनिर्दिष्टः । इन्द्रादिदैवतो परि-वर्तमानत्वंचास्य तद्भोग्यभूतादपि विलक्षणस्य शब्दादे र्भोक्तृत्वादिति बोध्यम् । भोक्तृत्वावस्था चैश्वर्यार्थिनां प्राप्यतया ऽनुसन्धेयेतिभावः । देहभृतां- देहधारिणाम्मध्ये । पर- श्रेष्ठ हे अर्जुन । अत्र- अस्मि न्निन्द्रादिरूपे । देहे- मच्छरीरे । विद्यमानः । अह मेव । अधि यज्ञः - यज्ञैराराध्यतयावर्तमानत्वा दधियज्ञशब्दनिर्दिष्टः । "यज्ञोवै विष्णुरितिश्रुतेः"। अत्र अहमेवाधि यज्ञ इत्यनेन यज्ञस्वरूप प्रश्नो

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेबरम् ।
यः प्रयाति समद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥
यंयं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम् ।
तन्तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

त्तरमुक्तम् । अत्र देहे ऽहमेवेत्यनेन – कथमधियज्ञइति प्रकारप्रश्नस्या प्युत्तरमुक्तम्भवति । भगवतोहि " स आत्मा । अंगान्यन्यादेवताः" "तदेवाग्नि स्तद्वायुः" इत्यादि श्रुत्युक्तरीत्या-"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च " इत्यादि वक्ष्यमाणरीत्याचाग्नि वाय्वादि तत्तत्कर्मदेवतान्तर्यामितया ऽवस्थाय महायज्ञादि समस्तकर्मणामाराध्यतया तत्फलप्रदतयाचाधियज्ञत्व मित्यनुसन्धेयम् । त्रयाणामप्यधिकारिणां महा यज्ञादि नित्यनैमित्तिकादि कर्मानुष्ठानवेळाया मिदमनुसन्धेयमितिभावः ४

प्रयाणकाले च कथमित्यस्योत्तरमाह (अन्तकालेचेति) यः – अधिकारी । अन्तकाले- शरीरावसानसमये । मां- सर्वशरीरितया सर्वात्मभूतम्माम् । स्मरन्सन्नेव । कळेबरं-शरीरम् । मुक्त्वा- त्यक्त्वा । प्रयाति- गच्छति । सः । मद्भावं- मत्स्वभावं । याति- प्राप्नोति । अत्र – अस्मिन्नंशे । संशयः । नास्ति । अन्तकाले यदाकारम्मा मनुसन्धत्ते- तदाकारोभवति, मृगरूपम्मामनुसन्धाय मृगाकारतया सम्भूता आदिभरतादय एवात्र निदर्शनमितिभावः । अतस्त्रयाणा मप्यधिकारिणां शरीरावसानसमये स्व स्वप्राप्याकारमदनुसन्धानमवश्यं कर्तव्यमितिभावः ॥५॥

स्मर्तु स्स्मृतिविषय सजातीयाकारापादन अन्तिमस्मृते स्स्वभाव इत्यमुमर्थं सुस्पष्टमाह (यंयमिति) हेकौन्तेय । अंते · अंतकाले । यंयंवापि - देवतिर्यङ्मनुष्यस्थावरेषु मध्येयंयमपिवा । भावं - स्वभावं । स्मरन् - अनुसन्दधानः । कळेबरं । त्यजति · मुंचति । तन्तमेव ·

तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च ।
मय्यर्पितमनोबुद्धि र्मामेवैष्यस्य संशयः ॥ ७ ॥
अभ्यासयोगयुक्तेन चेतसानान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

भावं । एति - मरणानन्तरमेव प्राप्नोति । अन्तकालेभावविशेष स्मरणेहेतुमाह (सदेति) सदा-निरन्तरं - जीवनकालेनिरन्तरं । तस्य:- अन्तकालेस्मरिष्यमाणस्यभावस्य, भावः - भावना - अनुचिन्तनं, तेनभावितः - वासितान्तःकरणइत्यर्थः । जीवनकालाभ्यासवासनैवा- न्तिमस्मृतिहेतुः, नतु तदानीं परवशस्य स्मरणो न्मुख्यं सम्भवतीति भावः ॥ ६ ॥

तस्मात् - अन्तिमस्मृतेः पूर्वकालाभ्यस्त सजातीय स्वभावविषयत्व नियमाद्धेतोः । सर्वेषुकालेषु - आप्रयाणमहरहः । मां - परमप्राप्य भूतं । अनुस्मर - अनुचिन्तय । युध्यच - वर्णाश्रमोचितं युद्धादि कर्मचकुरु । तस्य मनोनैर्मल्यापादनद्वारा ऽहरहरनुस्मृतिकरत्वादिति भावः ! ततः किमित्यत्राह (मयीति) एवंसति । मयि - विषये । अर्पितमनोबुद्धिः - अर्पिते - निवेशिते, मनोबुद्धी - मनोध्यवसायौ , येन स तथोक्तः । अन्तकाले मां स्मरन्नित्यर्थः । मामेव। एष्यसि- प्राप्स्यसि । असंशयः - अत्र संशयोनास्ति ॥ ७ ॥

एवं सामान्यत स्स्वप्राप्यावाप्ति रन्तिमस्मृत्यधीनेत्युक्तं । अथ त्रयाणामधिकारिणा मुपासनप्रकारभेदं वक्तु मारभमाणः प्रथम मैश्व- र्यार्थिना मुपासनप्रकारं यथोपासन मन्तिमस्मृतिंचाह (अभ्यासेति) हेपार्थ, । अभ्यासयोगयुक्तेन- अभ्यासः - प्रत्यहं नित्यनैमित्तिका विरुद्धे- षुकालेषु मनसोपास्यवस्तुसंशीलनं, योगस्तु - अहरहर्योगकाले ऽनुष्ठीयमानं - शुचौदेशे प्रतिष्ठाप्ये त्याद्युक्तलक्षण मुपासनं, ताभ्यां युक्तेन - सहितेन। अतएव - नान्यगामिना - अन्याविषय विमुखेन ।

कविं पुराण मनुशासितार मणोरणीयांस मनुस्मरे द्यः ।
सर्वस्य धातार मचिन्त्यरूप मादित्यवर्ण तमसः परस्तात ॥ ९ ॥
प्रयाणकाले मनसा ऽचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् सतं परं पुरुषमुपैति दिव्यम् ॥१०॥
यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्तेपदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

चेतसा - मनसा । दिव्यं - अप्राकृतं । परमं - सर्वस्मात्परं । पुरुषं - मां । अनुचिन्तयन् - अनुस्मरन् । अन्तकालइतिशेषः। याति-स्वाभिलषितैश्वर्य विशिष्टं मामेवप्राप्नोतीत्यर्थः ॥ ८ ॥

ऐश्वर्यार्थिना मुपास्यस्य परस्य ब्रह्मणः स्वरूपं तेषामन्तिमस्मृतिप्रकारंचाह 'कवि' मित्यादिश्लोकद्वयेन । यः । भक्त्या - निरतिशयप्रेमरूपया । योगबलेनच । युक्तस्सन् । प्रयाणकाले । भ्रुवोः । मध्ये । प्राणम् । सम्यक् । आवेश्य- संस्थाप्य । तत्र-भ्रूमध्ये । कविं- सर्वज्ञम् । पुराणम् - पुरातनम् । अनुशासितारं- सर्वस्यनियन्तारम् । अणोः- सूक्ष्माज्जीवात । अणीयांसं- अतिसूक्ष्मम् । सर्वस्य-जगतः । धातारं- स्रष्टारम् । अचिन्त्यरूपं- सकलेतरविसजातीयतया चिन्तयितुमशक्यस्वरूपन् । तमसः- प्रकृतेः । परस्तात् - परम् , अप्राकृतम् । आदित्यवर्ण- आदित्यस्यवर्ण इववर्णोयस्यतम् , स्वा साधारणदिव्यविग्रहमित्यर्थः । दिव्यम् । परम् । पुरुषम् । अनुस्मरेत । सः । तमेव- पुरुषम् । उपैति - तत्समानैश्वर्यो भवतीत्यर्थः ॥ ९ ॥ ॥१०॥

अथ कैवल्यार्थिनां स्मरणप्रकारमाह (यदक्षरमिति) वेदविदः- वेदार्थवेदिनः । यत् । अक्षरम् । वदन्ति- अस्थूलत्वानणुत्वादिगुणकंवदन्ति । वीतरागाः- विषयान्तरविरक्ताः । यतयः- यतनशीला मुनयः । यत् अक्षरम् । विशन्ति- प्राप्नुवन्ति । यत्- अक्षरम् ।

सर्वद्वाराणि संयम्य मनोहृदि निरुद्ध्य च ।
मूध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥
ओमित्येकाक्षरंब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं सयाति परमांगतिम् ॥ १३ ॥
अनन्यचेताः सततं योमां स्मरति नित्यशः ।
तस्या हं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

इच्छन्तः- प्राप्तुमिच्छन्तः । ब्रह्मचर्य- ऊर्ध्वरेतस्कत्वरूपम् । चरंति- अनुतिष्ठन्ति । पद्यते- गम्यते- ज्ञायतइतिपदं- उपास्यमित्यर्थः । तत- निखिलवेदान्तप्रसिद्धं । अक्षरं- नक्षरतीत्यक्षरं - निर्विकारं - मत्स्वरूपम् । ते - तुभ्यम् । संग्रहेण - संक्षेपेण । प्रवक्ष्ये- प्रवक्ष्यामि ॥११॥

सर्वद्वाराणि- सर्वाणि ज्ञानप्रसरद्वारभूतानि श्रोत्रादीन्द्रियाणि । संयम्य- स्वव्यापारेभ्योनिवर्त्य । मनः । हृदि- हृदयकमलनिविष्टे मय्यक्षरे । निरुध्य- नियम्य । योगधारणां - योगरूपां धारणां, मय्येवनिश्चलांस्थितिम् । आस्थितः- आश्रितः । ब्रह्म - परब्रह्मणो ममवाचकम् । ओमित्येवंरूपम् । एकाक्षरं- मुख्यमक्षरम् । व्याहरन् - उच्चारयन् । मां- उच्चार्यमाणप्रणववाच्यम्माम् । अनुस्मरन्- अनुसन्दधानः । आत्मनः- स्वस्य । प्राणं - प्राणवायुम् । मूर्ध्नि - शिरसि । आधाय- मूर्धन्यसुषुम्नानाडीद्वारेणप्रवेश्य । देहं - शरीरम् । त्यजन्- यः । प्रयाति - अर्चिरादिगत्यागच्छति । सः । परमां - पुनरावृत्तिरहिताम् । गतिं- प्राप्यं, प्रकृतिवियुक्तम्मत्समानाकारमात्मानमित्यर्थः । याति - गच्छति ॥१२॥ ॥१३॥

अथ ज्ञानिनोभगवदुपासनप्रकारं प्राप्तिप्रकारंचाह (अनन्येति) नित्यशः- उद्योगकालप्रभृति । सततं- सर्वकालम् ! नाविद्यते ऽन्यस्मिन्चेतोयस्यसतथोक्तः - अनन्यचेताः - अत्यर्थमत्प्रियत्वेनमत्स्मृति

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥
आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्यतु कौन्तेय पुनर्जन्म नविद्यते ॥ १६ ॥

स्सन्ततिविना ऽऽत्मानं धारयितुमशक्नुवान्नित्यर्थः । यः । माम् । स्मरति- निरतिशय स्वप्रियां स्मृतिं करोति । हे पार्थ । नित्ययुक्तस्य मया नित्ययोगमाकांक्षतः । तस्य । योगिनः- ज्ञानिनः । अहम् । सुलभः- सुखेनलब्धुंशक्यः । तस्य हि मत्प्राप्त्यनुगुणोपासन तद्वि वृद्धि तत्परिपाक तद्विरोधिनिरसनादिकं ममैव भरइतिभावः ॥ १४ ॥

अतःपर मध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चा पुनरावृत्ति मैश्व र्यार्थिनः पुनरावृत्तिश्चाह । मां । उपेत्य - प्राप्य । पुनः - भूयोपि । दुःखालयं - दुःखानां - आध्यात्मिकादिरूपाणां, आलयं - एकास्पदं । अशाश्वतं - अस्थिरं । जन्म - देवमनुष्यादि प्राकृतशरीरसंसर्गरूपं । नाप्नुवन्ति - न प्राप्नुवन्ति । नाप्नुवन्तीत्यनन्तरं - यतः - ते - इति द्वयमध्याहार्यं । यतः यस्मात्कारणात् । ते - मां प्राप्तवन्तः । महात्मानः - महान् - अभ्यर्हितः, आत्मा - मनः, येषांते तथोक्ताः ; यथा वस्थितमत्स्वरूपज्ञानाः - मदेकप्रियत्वेन मया विना क्षण मप्यात्मधारण मलभमाना मय्येवासक्तमनसो मदुपासनविनाशित सकलपूर्वोत्तराघा इत्यर्थः । परमां- निरतिशयाम् । संसिद्धिं - पुरुषार्थरूपंमाम् । गताः - प्राप्ताः । अतस्तेषामपुनरावृत्ति रुचितेतिभावः । अत्र - मामुपेत्य पुनर्जन्मनाप्नुवन्तीत्युक्त्या ऽर्थादैश्वर्यार्थिनां पुनरावृत्तिरुक्ता भवतीति भावः ॥१५॥

ऐश्वर्यगतिं प्राप्तानां पुनरावृत्तौ भगवन्तं प्राप्तानामनावृत्तौच हेतु माह (आब्रह्मेति) हे अर्जुन । आब्रह्मभुवनात् - चतुर्मुखलोकपर्यन्ताः । लोकाः - ब्रह्माण्डोदरवर्तिनः कर्माद्युपायैः प्राप्या भोगैश्वर्यालया

सहस्रयुगपर्यन्त महर्यद्ब्रह्मणोविदुः ।
रात्रिंयुगसहस्रान्तां तेऽहोरात्रविदोजनाः ॥ १७ ॥

अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८ ॥

भूतग्रामस्सएवायं भूत्वाभूत्वाप्रलीयते ।
रात्र्यागमेऽवशःपार्थ प्रभवत्यहरागमे ॥ १९ ॥

स्सर्वेलोकाः । पुनरावर्तिनः - विनाशिनः । अतएवैश्वर्यगतिं प्राप्तानां प्राप्यस्थानविनाशाद्विनाशित्वमवर्जनीयमितिभावः । हे कौंतेय । मांतु सर्वज्ञं सत्यसंकल्पं परमकारुणिकं माश्रितवात्सल्यैकजलधिं मां पुनः । उपेत्य - प्राप्य । पुनर्जन्म - पुनरावृत्तिः । नविद्यते - नास्ति ॥ १६॥

ब्रह्मलोकपर्यन्तानां लोकानां तदन्तवर्तिनाञ्च भगवत्संकल्पकृता मुत्पत्तिविनाशकालव्यवस्था माह (सहस्रेति) अहोरात्रविदः - ब्रह्मा दीनाम्मत्संकल्पकृताहोरात्ररूपकाल व्यवस्थावेदिनः। ते - तथाप्रसिद्धाः। जनाः । ब्रह्मणः - चतुर्मुखस्य । अहः - दिनं । यत् । अस्ति । तत् सहस्रयुगपर्यन्तं- सहस्रयुगावसानं । विदुः - जानन्ति । ब्रह्मणः - रात्रिं। युगसहस्रान्तां - युगसहस्रपर्यन्ताम् । विदुः ॥ १७ ॥

अहरागमे - ब्रह्मणोदिनागमेसति । सर्वाः - समस्ताः । व्यक्तयः - व्यज्यन्ते - अभिव्यज्यन्तइति त्रैलोक्यवर्तिनो देहेन्द्रियभोग्य भोगस्थानरूपाः कार्यपदार्थाः । अव्यक्तात् - चतुर्मुखदेहात्मनापरिणतायाः प्रकृतेः । प्रभवन्ति- उत्पद्यन्ते । ब्रह्मणः । रात्र्यागमेसति । तत्रैव - उत्पत्तिस्थानभूतएव । अव्यक्तसंज्ञके - चतुर्मुखदेहावस्थिताव्यक्तनाम्नि । प्रलीयन्ते - प्रलीनाभवन्ति ॥ १८ ॥

हे पार्थ । स एव - प्राग्विद्यमान एव । अयम् । अवशः - कर्मपरवशः । भूतग्रामः - देवमनुष्यादि भूतसमूहः । अहरागमे । भूत्वा भूत्वा - पुनः पुनरुत्पद्य । रात्र्यागमे । प्रलीयते - पुनःपुनर्लयं

परस्तस्मात्तुभावो ऽन्यो व्यक्तो ऽव्यक्तात्सनातनः ।
यस्ससर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥
अव्यक्तो ऽक्षर इत्युक्त स्तमाहुः परमांगतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥
पुरुषःस्सपरःपार्थ भक्त्यालभ्यस्त्वनन्यया ।
यस्यान्तःस्थानिभूतानि येन सर्व मिदं ततम् ॥ २२ ॥

प्राप्नोति । अहरागमे । पुनः । प्रभवति - जायते । अतऐश्वर्य गतिं प्राप्तानां पुनरावृत्तिरपरिहार्या, मामुपेतानांतु न पुनरावृत्ति प्रसंग इतिभावः ॥ १९ ॥

अथकैवल्यं प्राप्तानामप्य पुनरावृत्तिमाह (परइति) तस्मात् । अव्यक्तात् - अचेतनरूपात् । परः - पुरुषार्थतयोत्कृष्टः । अन्यः - ज्ञानैकाकारतया तस्माद्विजातीयः । अव्यक्तः - केनापि प्रमाणेनानभि व्यज्यमानः - स्वयं प्रकाश इत्यर्थः । सनातनः - उत्पत्तिविनाशानर्हतया नित्यः । यः । भावः - पदार्थः । अस्ति । सः । सर्वेषु । भूतेषु - वियदादिषु । नश्यत्सुसत्सु । न विनश्यति - तत्रस्थितोपिविनाशंनप्राप्नोति ॥२०

अतएव अव्यक्तः - अक्षरः - इत्युक्तः, येत्वक्षरमनिर्देश्य मव्यक्तं पर्युपासतइत्यादाविति भावः । तं - अक्षरशब्दनिर्दिष्टं प्रकृतिविविक्त मात्मस्वरूपं । परमांगतिं - परमप्राप्यं । आहुः । वेदविदइतिशेषः । यं - आत्मस्वरूपं । प्राप्य । ननिवर्तंते - पुनरावृत्तिं नभजन्ते । तत - आत्मस्वरूपं । मम - सर्वनियन्तुः । परमं - अचेतनप्रकृतिरूपात्तत्सं सृष्टजीवरूपाच्च विलक्षणं नियमनस्थानम् ॥ २१ ॥

ज्ञानिनः प्राप्यन्तु तस्मादत्यन्त विलक्षणमित्याह (पुरुषइति) भूतानि - देवमनुष्यादीनि सर्वाणिकार्याणि । यस्य - कारणभूतस्य परमपुरुषस्य । अन्तस्स्थानि । तत्र हेतुमाह (येनेति) येनच

यत्र काले त्वनावृत्ति मावृत्तिं चैव योगिनः ।
प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्रप्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

परेण पुरुषेण । सर्व-कारणावस्थं कार्यावस्थंच समस्तं । इदं-चेत नाचेतनजातं । ततं-व्याप्तं । हेपार्थ! सः – परः पुरुषस्तु । अनन्यया-अव्यभिचारिण्या । भक्त्या । लभ्यः-प्राप्यः ॥ २२ ॥

अथ प्रकृतिवियुक्तात्म याथात्म्यनिष्ठस्य परमपुरुषनिष्ठस्यचा पुन रावृत्तिहेतुमार्गं ऐश्वर्यार्थिनः प्रसंगात्कर्मिणां सर्वेषांच पुनरावृत्तिहेतुमा र्गंच वक्तुं प्रतिजानीते (यत्रेति) योगिनः-योगः - उपायः, उपास नपुण्यकर्मरूपः, ‘ योगस्सन्नहनोपायध्यानसंगतियुक्ति’ ष्वित्यभिधानात , सएषामस्तीतियोगिनः जिज्ञासवो ज्ञानिनः पुण्यकर्माणश्च । अत्रकालशब्देन कालाभिमानि देवता प्रापणीयो मार्गउच्यते । यत्रकाले- यस्मिन्मार्गे । प्रयाताः । अनावृत्तितु – अपुनरावृत्तिच । आवृत्तिंचैव -पुनरावृत्तिंच । जिज्ञासवोज्ञानिनश्चा पुनरावृत्ति पुण्यकर्माण आवृत्तिंचेत्यर्थः । यान्ति-प्राप्नुवन्ति । हेभरतर्षभ ! तं । कालं-मार्गं । वक्ष्यामि ॥ २३ ॥

तत्र जिज्ञासूनां ज्ञानिनां च साधारणी मर्चिरादिकांगतिमाह (अग्निरिति) अग्निः-अग्निरूपं । ज्योतिः – तेजः । अहः – दिनं । शुक्लः-शुक्लपक्षः । उत्तरायणं षण्मासाः – उत्तरायणतयाप्रसिद्धाष्षण्मासाः । इदं प्रजापत्यंताना मप्युपलक्षणं । एतत्प्रभृतिर्योमार्गविशेषोऽस्ति । तत्र - तस्मिन्मार्गे । प्रयाताः । ब्रह्मविदः - ब्रह्मोपासकाः जनाः । ब्रह्म । गच्छन्ति – प्राप्नुवन्ति । तत्रज्ञानिनः परंब्रह्मगच्छन्ति-जिज्ञासवस्तु प्रकृतिविमिक्तात्मस्वरूपरूपं ब्रह्मगच्छन्तीतिविवेकः ॥ २४॥

धूमोरात्रि स्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्रचान्द्रमसं ज्योति र्योगी प्राप्यनिवर्तते ॥ २५ ॥
शुक्लकृष्णे गतीह्येते जगतःशाश्वते मते ।
एकया यात्यनावृत्ति मन्ययाऽऽवर्ततेपुनः ॥ २६ ॥
नैतेसृती पार्थ जान न्योगी मुह्यतिकश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

अथ पुण्यकर्मणां पुनरावृत्तिहेतुं मार्गमाह (धूमइति) धूमः धूमाभिमानिनीदेवता । रात्रिः - रात्र्यभिमानिनीदेवता । तथा, कृष्णः कृष्णपक्षाभिमानिनीदेवता । दक्षिणायनं षण्मासाः - दक्षिणायनतय प्रसिद्धाष्षण्मासाः । इदं पितृलोकादीनाम प्युपलक्षणं । एवं रूप योमार्गः । तत्र, प्रयातः । योगी - इष्टापूर्तादिपुण्यकर्मा । चान्द्रमस चन्द्रमस्सम्बन्धि । ज्योतिः - तेजः, तदुपलक्षितं स्वर्गलोकं । प्राप्य निवर्तते - तत्रेष्टापूर्तादिकर्मफलमनुभूय पुनरावर्ततइत्यर्थः ॥ २५ ॥

अनयोमार्गयोरावृत्त्यनावृत्ति हेतुं विविच्याह (शुक्लेति) एते पूर्वोक्ते । शुक्लकृष्णे - शुक्लपक्षकृष्णपक्षान्विते - स्वच्छास्वच्छेवा गती - अर्चिरादिधूमादिमार्गौ । जगतः - उपासकस्य पुण्यकर्मणश्चे नस्य । शाश्वते - प्रवाहरूपेणनित्ये । मतेहि - सम्मतेहि । हिश नानयोर्गत्योः पंचाग्निविद्यादि श्रुतिप्रसिद्धिं द्योतयति । तयोर्मध्ये एकया - अर्चिरादिगत्या । गतः उपासकः । अनावृत्तिं, याति । अन्यय धूमादिगत्या । गतः पुण्यकर्मा । पुनरावर्तते । कर्मभूमिप्रतीतिशेषः ॥२६

उक्तमार्गद्वय मजानानस्य फलंदर्शयं न्नर्जुनस्यो पादेयमार्ग चित विधत्ते (नैतइति) हेपार्थ ! एते । सृती मार्गौ । जानन्- हेयतया पा यतयाच संततमनुसंदधानः । कश्चन-कश्चिदपि । योगी-उपासकः । मुह्यति प्रयाणकाले न मोहमाप्नोति । स्वर्गंतव्यमार्गे ऽर्चिरादिरूपेव्याकु

वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येतितत्सर्वमिदं विदित्वा योगीपरं स्थानमुपैति चाद्यम् ॥ १८ ॥

इति अष्टमोऽध्यायः । ८ ।

चित्तो नभवतीत्यर्थः । तस्मात्-कारणात् । हेअर्जुन ! सर्वेषुकालेषु-प्रत्यहम् । योगयुक्तः – अर्चिरादि गतिचिंतन रूपयोगसहितः । भव ॥२७॥

पूर्वाध्यायद्वयोदित भगवन्माहात्म्यरूप शास्त्रार्थवेदनस्य फलमाह (वेदेष्विति) वेदेषु- ऋग्यजुस्सामाथर्व रूपवेदाभ्यासेषु । यज्ञेषु-इष्टिपशुसोमादिरूपवैदिककर्मसु । तपस्सु – चांद्रायणा नशनादि रूपकायशोषणेषु । दानेषु – न्यायार्जितधनस्यपात्रेप्रतिपादनादिरूपेषु । पुण्यफलं – पुण्यकर्मफलं । यत् । प्रदिष्टं - शास्त्रैरुपदिष्टं । इदं - अध्यायद्वयोदित भगवन्माहात्म्यं । विदित्वा । तत्सर्वं - पुण्यफलं । अत्येति- अतिक्रामति । एतद्वेदनसुखातिरेकेण तत्सर्वं तृणायमन्यते । योगी ज्ञानीचभूत्वा । परम् - ज्ञानिप्राप्यं । आद्यं – जगत्कारणभूतं । स्थानं – पदम् । उपैति - प्राप्नोति ॥ २८ ॥

इति श्रीमद्गीताभाष्यार्थ संग्रह तात्पर्यदीपे
श्रीवरवरमुनि विरचितायां बालबोधिन्याख्यायां
गीतार्थसंग्रहदीपिकायां
अष्टमोऽध्यायः ॥ ८ ॥

श्रीरस्तु ।

अथ नवमोऽध्यायः ।

श्रीभगवानुवाच ।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥ १ ॥
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

अथ नवमाध्याये उपास्यस्य परमपुरुषस्य माहात्म्यं ज्ञानिनां विशे षंचशोधयन् भक्तिरूपोपासनस्य स्वरूपमाह (इदमिति) हेअर्जुन! विज्ञानसहितं – विज्ञानेन-उपासनगतविशेषज्ञानेन, सहितं । गुह्यतमं – अतिरहस्यं । इदन्तु – पूर्वाध्यायोक्तज्ञानाद्विलक्षणं । ज्ञानं – भक्तिरू पोपासनाख्यं ज्ञानं । अनसूयवे – असूयारहिताय । ते–तुभ्यं । प्रवक्ष्या मि । यत्-ज्ञानं । ज्ञात्वा-ज्ञानपूर्वकमनुष्ठाय । अशुभात्- मत्प्राप्तिविरो धिनस्सर्वस्मादमंगळात् । मोक्ष्यसे – मुक्तोभविष्यसि ॥ १ ॥

तदेवज्ञानं प्रशंसति (राजविद्येति) इदं - उपदेक्ष्यमाणं भक्ति रूपापपन्नं ज्ञानं । राजविद्या - विद्यानां ज्ञानानां राजा, श्रेष्ठमित्यर्थः । राजगुह्यं – गुह्यानां रहस्यानां राजा-श्रेष्ठं । उत्तमं पवित्रं-परमपवित्रं मत्प्राप्तिविरोधिसकलकल्मषापहमित्यर्थः । प्रत्यक्षावगमं – अवगम्यते ज्ञायते इत्यवगमोविषयः, प्रत्यक्षः-अवगमः, यस्य तत्तथोक्तं, भक्ति रूपेणोपासनेन मामुपासीनस्य तदानीमेवाहं प्रत्यक्षोभवामी त्युपासन प्रत्यक्षावगमं भवतीत्यर्थः । धर्म्यं-धर्मादनपेतं । निरतिशयप्रीतिरूप तया स्वयमेव निःश्रेयसरूपमपि मत्प्राप्तिरूप निःश्रेयससाधनंचेत्यर्थः ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्यमां निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि नचाहंतेष्ववस्थितः ॥ ४ ॥
न च मत्स्थानि भूतानि पश्यमे योगमैश्वरम् ।
भूतभृन्नच भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

अतएव, कर्तुं-अनुष्ठातुं । सुसुखं-अत्यर्थप्रियं । अव्ययं-अक्षयं । मत्प्राप्तिं साधयित्वापि स्वयंनक्षीयते-प्राप्याभिन्नतया मुक्तिदशायामप्यनुवर्तमानमित्यर्थः ॥ २ ॥

हेपरन्तप! अस्य - निरतिशयप्रियमद्विषयतया स्वयं निरतिशयप्रीतिरूपस्य । धर्मस्य - निरतिशयमत्प्राप्तिसाधनस्योपासनस्य । सम्बन्धसामान्येषष्ठी, इमं धर्ममित्यर्थः । अश्रद्दधानाः - अविश्वसन्तः -विश्वासपूर्वकत्वरारहिताइत्यर्थः । पुरुषाः, अतएव, मां, अप्राप्य । मृत्युसंसारवर्त्मनि -मृत्यौ स्वरूपनाशकतया मृत्युरूपे, संसारवर्त्मनि- संसारमार्गे । निवर्तन्ते - नितरां वर्तन्ते । महदिदमाश्चर्यमितिभावः ॥ ३ ॥

भक्तिरूपोपासनाख्य परमधर्मे श्रद्धाजनकं प्राप्यस्य स्वस्यासाधारणं महिमानमाह (मयेति) इदं - चेतनाचेतनात्मकम् । सर्वं, जगत् : अव्यक्तमूर्तिना-अप्रकाशितस्वरूपेण। मया ततं- धारणार्थं नियमानार्थञ्च शेषितयाव्याप्तं । अतः, सर्वभूतानि । मत्स्थानि-अन्तर्यामिणि मयिस्थितानि, मदेकायत्तस्थितिनियमनानीत्यर्थः । अहंच -अहन्तु । तेषु-भूतेषु नावस्थितः - न तदधीनस्थिति रित्यर्थः ॥ ४ ॥

घटादि जलादेरिव नाहं जगतोधारकः, अपितु संकल्पेनेत्याह (नचेति) भूतानि, मत्स्थानिच । न- जलादीनि घटादाविव मयिस्थि

यथाऽऽकाशस्थितोनित्यं वायु स्सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६ ॥
सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षयेपुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

तानिनभवन्तीत्यर्थः । तर्हि पूर्वोक्तव्यापकत्वधारकत्वे विरुध्येयातामि त्यत्राह (पश्येति) मे - मम । ऐश्वरं - ईश्वरस्य सम्बन्धिनं, तदसा धारणमित्यथः । शिवस्य भागवतइतिव दयं निर्देशः । योगं - आश्चर्य युक्तिं । 'योगस्सन्नहनोपायध्यानसंगति युक्तिष्वि' त्यभिधानकोशात । युक्तिः - अघटितघटनाचातुर्यम् । पश्य - अवलोकय । तमेवयोग माह (भूतभृदिति) अहं । भूतानि भिभर्तीतिभूतभृत् । नचभूतस्थः॰ भूतेषुस्थितस्तुन । ममास्थितौतु भूतै र्न कश्चिद प्युपकार इत्यर्थः । त्वय्य नवस्थितानां भूतानां त्वयाधारणंतु कथंघटतइत्यत्राह (ममेति) मम । आत्मा - संकल्पएव । भूतभावनः - भावयतीतिभावनः - भूतानांभा वनः - भूतानां धारकत्वादिसत्तानुवृत्ति हेतु रित्यर्थः ॥ ५ ॥

सर्वस्यास्य स्वसंकल्पायत्तस्थिति प्रवृत्तित्वं स्थालीपुलाकन्यायेन क्वचिन्निदर्शयति (यथेति) नित्यम् । आकाशस्थितः - अमूर्तेऽनालंब आकाशेविद्यमानः । सर्वत्रगच्छतीति सर्वत्रगः - सर्वत्रप्रवर्तमानः । म हान् । वायुः । यथा-मत्स्थः तथैव, सर्वाणि, भूतानि, मत्स्थानि, मदेका यत्तस्थिति प्रवृतिकानि, इति इममर्थं । उपधारय - अवधारय । वायो र्हिनतावदमूर्तो निरालंब आकाशोधारकः प्रवर्तकोवा । नचमहानयं वा युरनालंबे गगने विहंगशरीरव त्केनचिच्चेतनांतरेण धारयितुंचशक्यः । अ तोनिरालंबे विहायसि चेतनो विहंगशरीरादेरिव महावायोर्महीयानह मेवधारकः प्रवर्तकश्चे त्यभ्युपगमनीयं । तथासर्वभूतेष्वपीतिभावः ॥ ६॥

सर्वभूतानां स्वरूपस्थिति प्रवृत्तिवदुत्पत्ति प्रळयावपि मत्संकल्पायत्ता वित्याह (सर्वेति) हेकौंतेय । सर्वभूतानि सर्वाणि चराचराणि । कल्पस्य-

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः ।
भूतग्राममिमं कृत्स्न मवशं प्रकृतेर्वशात् ॥ ८ ॥
न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनव दासीन मसक्तं तेषु कर्मसु ॥ ९ ॥

द्विपरार्धकाल रूपचतुर्मुखायुषः । क्षये - अवसानसमये । मामिकां-मच्छरीरभूतां । प्रकृतिं - तमश्शब्दावाच्याम् । यांति - मत्संकल्पात्प्रविशन्ति । तान्येव-भूतानि । कल्पादौ-कल्पारम्भे, पुनः, अहं, विसृजामि – प्रकृते स्सकाशाद्विभज्य सृजामीत्यर्थः ॥ ७ ॥

स्वां - स्वकीयां । प्रकृतिं - विचित्रपरिणामिनीं तमोरूपां । अवष्टभ्य - भूमिरापोऽनलोवायुरित्युक्तरीत्या ऽष्टधापरिणमय्येत्यर्थः । प्रकृतेः - महामोहिन्याः । वशात् - अधीनत्वाद्धेतोः । अवशं - अस्वतंत्रं। इमं - देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधं भूतग्रामं - भूतसमूहं । पुनःपुनः, तत्तद्योग्यकाले । विसृजामि-विविधं विचित्रच सृजामि ॥८॥

नन्वेवं देवमनुष्याद्यात्मनोत्कृष्टापकृष्टवस्तुसृष्टिं कुर्वतस्तव वैषम्यनैर्घृण्ये कथं न स्यातामित्याशंक्याह (नचमामिति) हेधनंजय ! तानि - विषमसृष्ट्यादीनि । कर्माणि-व्यापाराः । मां न निबध्नन्ति - वैषम्यनैर्घृण्यदोषेण नबन्धयन्ति । अत्रहेतु विशेषमुखेनाह (उदासीनवदिति) तेषु - विषमसृष्ट्यादिषु । कर्मसु-तेषां कर्माणां वैषम्य इत्यर्थः । असक्तं - प्रयोजकत्वसम्बन्धरहितं । तत्र उदासीनवत -अकिंचित्करवत्। आसीनं - वर्तमानं । मां, ननिबध्नन्ति - नसम्बध्नन्ति । सृज्यवस्तुगत प्राचीनपुण्यपापकर्माण्येव मत्कृतसृष्टिवैषम्येप्रयोजकानि - नत्वहमिति भावः ॥ ९ ॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो ममभूतमहेश्वरम् ॥ ११ ॥
मोघाशामोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरींचैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

हेकौन्तेय! अध्यक्षयतीत्यध्यक्षः, ' तदैक्षतबहुस्या 'मित्युक्तरीत्या प्रत्यक्षमीक्षमाणः, तेन . मया। मदीया प्रकृतिः । सचराचरं - चराचराभ्यां सहितं । जगत् । सूयते - उत्पादयति। हि - यस्मात् अनेन-क्षेत्रज्ञकर्मानुगुणमदीक्षणरूपेण, हेतुना - कारणेन, सचराचरं, जगत् । परिवर्तते - कुलालचक्रवत्पुनःपुनरावर्ततइत्यर्थः ॥ १० ॥

मूढाः - स्वकृतकर्मणा संकुचितज्ञानाजनाः | भूतमहेश्वरं - भूतानां महांतमीश्वरं | मानुषीं - मनुष्यसजातीयाम् | तनुं - विग्रहं | आश्रितं - परमकारुणिकतया सर्वसमाश्रयणीयत्वाय मनुष्यसजातीयत यावतीर्णमित्यर्थः | माम् | मम | परं - कर्मकृतेतरमनुष्य भाव विलक्षणम् | भावं - परमकारुणिकत्वादिकृतं मनुष्यभावम् | अ जानन्तः - अप्राकृतमनुष्यभावमजानन्तस्सन्तः | अवजानन्ति - प्रा कृतमनुष्यम्मन्वाना नाद्रियन्त इत्यर्थः ॥ ११ ॥

पूर्वोक्तस्वावज्ञाया हेतुफलेदर्शयति (मोघाशाइति) मूढाइति पूर्वश्लोकादनुषञ्जनीयं | मदवज्ञापरामूढाः | रक्षसामिमां राक्षसीं-रजः प्रचुरां | असुराणामिमा मासुरीं-तमःप्रचुराञ्चैव | अतएव | मोहिनीं-मनुष्यत्वे परत्वतिरोधानकरीं | प्रकृतिं-स्वभावं | श्रिताः-आश्रिताः अतएव - मोघाशाः-विफलाभिलाषाः | मोघकर्माणः - व्यर्थारम्भाः | मोघज्ञानाः - विफलज्ञानाः | विचेतसः-सर्वेषु विषयेषु विगतयथार्थज्ञा नाश्च | भविष्यन्तीतिशेषः ॥ १२ ॥

महात्मानस्तुमां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥
सततं कीर्तयन्तो मां यतंतश्च दृढव्रताः ।
नमस्यंतश्चमां भक्तया नित्ययुक्ता उपासते ॥ १४ ॥
ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

हेपार्थ ! दैवीं-देवसम्बन्धिनीं सत्त्वप्रचुरां । प्रकृतिं- स्वभावं । आश्रिताः - प्राप्ताः । महात्मानः - महानुभावास्तु । भूतादिं-भूतानां-देवमनुष्यादिसमस्तकार्याणां, आदिं, कारणभूतं । अव्ययं-अवतारस्य दयामूलत्वेन कर्ममूलत्वाभावा त्तत्कृतज्ञानसंकोचादिरहितं, परमकारुणिकं । मां, ज्ञात्वा । अनन्यमनसः - मदेकचित्तास्सन्तः । भजन्ते-भक्तिरूपोपासनंकुर्वते ॥ १३ ॥

तेषां भजनप्रकारमाह " सतत " मित्यादि श्लोकद्वयेन । भक्त्या - मयिनिरतिशयप्रीत्या । सततं - अनवरतं । मां, कीर्तयन्तः- कल्याणगुणविशेषप्रदर्शके नारायणकृष्ण वासुदेवादिनामभिः कीर्तनं कुर्वंतः । दृढव्रताः - दृढ़संकल्पास्सन्तः । सततं - यतंतः - मदर्चनादिषु तदुपयोगिनंदनवनकरणादिषुच मत्कर्मसुयतमानाः । नमस्यंतः साष्टांगमचिन्तित पांसुपंकशर्करादिके धरातले दण्डवत्प्रणिपतंतः । सततं नित्ययुक्ताः - मयानित्ययोग माशासानाश्चसंतः । सततं - उपासते ॥ १४ ॥

अन्येपि - केचिन्महात्मानः । ज्ञानयज्ञेन - ज्ञानं - मत्स्वरूप गुणैश्वर्यविषयं - वासुदेवस्सर्वमित्येवं रूपंवा, तदेवयज्ञः - तेनच, चकारात्पूर्वोक्तैः कीर्तनादिभिश्च । मां, यजन्तः - प्रीणयन्तस्सन्तः । विश्वतोमुखं - विश्वतः-विश्वानि, कार्यकारणोभयावस्थ समस्तस्थूलसूक्ष्म चिदाचिद्वस्तूनि, मुखं - शरीरतया प्रकारः- यस्य तं तथोक्तम्मां ।

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्य महमग्निरहं हुतम् ॥ १६ ॥
पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यंपवित्रमोंकार ऋक् साम यजुरेवच ॥ १७ ॥

बहुधा पृथक्त्वेन - बहुधा - अव्यक्तमहदहंकारादि समष्टिरूपै र्देवमनुष्यादिव्यष्टिरूपैश्च बहुप्रकारैः • पृथक्त्वं - नामरूपविभागात्मकं कार्यत्वं तेन प्रकारेण । एकत्वेन - एकत्वं - अविभक्तनामरूपत्वरूपं कारणत्वं-तेनप्रकारेण, कार्यरूपजगदाकारेण कारणरूप जगदाकारेणचेत्यर्थः । उपासते ॥ १५ ॥

विश्वशरीरत्वमेव दर्शयति (अहमिति) अहमेव । क्रतुः-ज्योतिष्टोमाद्यध्वरः । अहमेवच । यज्ञः- ब्रह्मयज्ञादिःपंचविधोमहायज्ञः । अहमेव । स्वधा - पितृगणभोगनंहविः । अहमेव । औषधं - व्रीहियवाद्योषधिविकारभूतं चरुपुरोडाशादिरूपं हविः । अहमेव । मंत्रः - याज्यापुरोनुवाक्यादिरूपः । अहमेव । आज्यं-आज्यरूपं हविः । सोमादेरप्युपलक्षणमेतत् । मन्त्रशब्दसाहचर्यादाज्यनामकस्तोत्रविशेषोवा । अहमेव । अग्निः - आहवनीयादिरूपः । अहमेव । हुतं होमः ॥ १६ ॥

अस्य - ब्रह्मादिस्तम्बपर्यंतस्य । जगतः । पिता - तत्र तत्र पितृत्वेन वर्तमानश्चेतनः । माता-जननीत्वेन वर्तमानः । धाता-माता पितृव्यतिरिक्त स्रष्टृचेतनतया ऽ वस्थितः । पितामहः-जनकजनकत्वेनावस्थितः । पवित्रं-पावनं । वेद्यं-ज्ञेयम् । ओंकारः-पवित्रवेद्या वेदक समस्तवेदमूलभूतः प्रणवः । ऋक्-पादव्यवस्थावान्मन्त्रविशेषः । साम-स्वरस्वरादिगानविशेषसंस्कार्यमन्त्रविशेषः । यजुश्च - पादव्यवस्थारहितो ऽखण्डमन्त्रविशेषश्च । चकारेणविध्यर्थवादरूप ब्राह्मणभागस्समुच्चीयते । अहमेव ॥ १७ ॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥
त्रैविद्यामां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नंति दिव्यान् दिवि देवभोगान् ॥ २०॥

गम्यतइतिगतिः-स्वर्गपृथिव्यादिरूपं तत्तत्प्राप्यस्थानं । भर्ता-धारयिता । प्रभुः- शासिता । साक्षी - अध्यक्षः - साक्षाद्द्रष्टा । निवासः - वेश्मादिवासस्थानम् । शरणं-इष्टप्राप्त्यनिष्टनिवृत्त्युपायत्वेन समाश्रयणीयतयातत्रतत्रावस्थितश्चेतनः । सुहृत् - हितैषीचेतनः । प्रभवप्रळयस्थानं - प्रभवप्रळययोः स्थानम् । निधानं - निधीयत इतिनिधानं - उत्पाद्यमुपसंहार्यंच कार्यजातम् । बीजं- यस्य कस्यापि कार्यस्यसहकार्यादि कारणतया ऽवस्थितंच वस्तु । अहमेव ॥ १८ ॥

अहमेव ! तपामि - अग्न्यादित्यादि रूपेण स्थित्वा ग्रीष्मसमये जगतस्तापं करोमीत्यर्थः । अहमेव । वर्षं - जलं । निगृह्णामि - पर्जन्यादिरूपेणस्वीकरोमि । अहमेव । उत्सृजामि च - प्रावृषिमुंचामिच । अमृतं च - जीवनसाधनभूतंच । मृत्युश्च - मरणसाधनंचवस्तु । अहमेव । किम्बहुना । सत् - वर्तमानं । असच्च - अतीतमनागतंच - चिदचिद्वस्तुजातं । अहमेव ॥ १९ ॥

एवम्महात्मनां ज्ञानिनां भगवदनुभवैकभोगस्वरूपं वृत्तमुक्त्वा तेषामेव विशेषं दर्शयितुं भगवद्व्यतिरिक्तकामोपहतानामज्ञानां वृत्तमाह (त्रैविद्याइति) तिस्रोविद्यास्समाहतास्त्रिविद्यं । त्रिविद्यमधीयतेविदुरितिवा । त्रैविद्याः, ऋग्यजुस्सामरूप वेदत्रयप्रतिपाद्य केवलकर्मनिष्ठाः । यज्ञैः -केवलेंद्राद्याराधनतया ऽनुसंहितैर्यागैः । मां-इन्द्राद्यन्तर्यामिणम् ।

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ २१ ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

इष्ट्वा - आराध्य । सोमपाः - सोमं - यज्ञशिष्टं सोमरसं - पिबन्तीति तथोक्ताः । अतएव, पूतपापाः - पूतानि - शोषितानि - पापानि - स्वर्गादिप्राप्तिविरोधिदुरितानि , येषान्ते - तथोक्ताः । स्वर्गतिं । प्रार्थयन्ते, इन्द्रादीन्याचन्तइत्यर्थः । ते - जनाः। पुण्यम् - दुःखासम्भिन्न सुखरूपं । सुरेन्द्रलोकं - स्वर्गलोकम् । आसाद्य-प्राप्य । दिवि -स्वर्गे। दिव्यान् - अमानुषान् । देवभोगान् - देवानां - इन्द्रादीनां - भोगान्-भोग्यान् शब्दादीन्विषयान् । अश्नंति - भुंजते ॥ २० ॥

ते - स्वर्गभोक्तारः - त्रैविद्याः । विशालं - विस्तीर्णं । सं-प्रार्थितं। स्वर्गलोकं - स्वर्गसुखम् । भुक्त्वा - अनुभूय । पुण्ये - तदनुभवहेतु भूते सुकृते । क्षीणे - नष्टेसति । मर्त्यलोकं - भुवम् । विशंति - प्राप्नुवंति । एवम् - अनेनप्रकारेण । कामकामाः - कामान् - स्वर्गादिकाम्यान् - कामयन्तइतिकामकामाः । त्रयीधर्मं - त्रयीप्रतिपाद्यकेवलकर्म । अनुप्रपन्नाः अनुसृतवन्तः । गतागतं-घटीयंत्रवद्यातायातम् । लभन्ते । इतोगत्वास्वर्गाद्यल्पास्थिरफलान्यनुभूय पुनरत्रैवागच्छन्तीत्यर्थः ॥ २१ ॥

ज्ञानिनामपुनरावृत्ति रूपविशेषं दर्शयति (अनन्याइति) नविद्यतेऽन्यत्प्रयोजनं येषांतेऽनन्याः - प्रयोजनान्तरविमुखा मच्चिंतनैक प्रयोजनाइत्यर्थः । मां - चिंतयंतः - सततं परिशीलयंतः । ये - जनाः - धन्यजन्मानः । मां । पर्युपासते -परितः-स्वरूपरूप गुणविभूतिभिस्सर्वैः प्रकारैः, उपासते । नित्याभियुक्तानां- मयिनित्याभि योगमाकांक्षताम् । तेषां - जनानां । अहं - आश्रितवात्सल्यैक जलधिः । योगश्च क्षेमश्च

ये ऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
ते ऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मा मभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

योगक्षेमं - योगः - अप्राप्तमत्प्राप्ति लक्षणोलाभः, क्षेमः - तत्परिपालनं अपुनरावृत्ति रितियावत् - तौ । वहामि - प्रापयामि ॥ ५५ ॥

नन्विन्द्राद्याराधनमपि तच्छरीरिणो ममैवाराधनमिति जानन्नपि भवान् केवलकर्मिणामपि मोक्षरूपं योगक्षेमं किमितिनप्रयच्छतीत्यत आह " येत्वि " त्यादिश्लोकद्वयेन । तुशब्दशंकानिरासार्थः । ये - जनाः । अन्यदेवताभक्ताः - अन्यदेवता स्विन्द्रादिषुभक्ताः-प्रीति मन्तः । श्रद्धया - विश्वासेन - आस्तिक्यबुद्ध्या । अन्वितास्सन्तः, यजन्ते - इन्द्रादीन् केवलकर्मभिराराधयन्ते । हेकौन्तेय! तेपि । मामेव - सर्वशरीरकतया सर्वस्यमदात्मकत्वेन सर्वशब्दवाच्यम्मामेव । यजन्ते - वस्तुत आराधयन्ते । किन्तु, अविधिपूर्वकं विधिः-विध्यर्थयाथात्म्यज्ञानं, पूर्वं - नविद्यते यस्मिन् कर्मणि - तद्यथा - तथा- अविधिपूर्वकं । यजन्ति, 'चतुर्होतारो यत्र सम्पदं गच्छन्तिदेवै ' रित्यादि वेदान्तवाक्यानि कर्म स्विन्द्रादिदेवाना माराध्यतया ऽन्वयं यथाविधति तथा तद्विधिज्ञानपूर्वकं न यजन्तीत्यर्थः । चतुर्होतारइत्यस्य ? चतुर्होतारः - अग्निहोत्र दर्शपूर्णमासादीनिकर्माणि, यत्र-परमात्मानि, आत्म तयास्तयेव, दैवैस्तच्छरीरभुतैरिन्द्रादिभिः , सम्पदं - इन्दादिदेवता राधनस्वरूपमातिशयं । गच्छन्ति - प्राप्नुवन्तीत्यर्थः ॥ २३ ॥

त्रैविद्यानाम विधिपूर्वक यजनस्य फलमाह (अहमिति) अहं- सर्वशरीरतया-इन्द्रादिरूपो ऽहमेव । सर्वयज्ञानां सर्वेषान्त्रयीधर्माणां । भोक्ता - आराध्यश्च । प्रभुः - तत्र तत्र फलप्रदाताच । हिशब्देना

यान्तिदेवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यांति भूतेज्या यान्ति मद्याजिनोपि माम् ॥ २५ ॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृत मश्नामि प्रयतात्मनः ॥ २६ ॥

स्यार्थस्य वेदान्तप्रसिद्धिंद्योतयति । किन्तु - ते - त्रैविद्याः । मां, तत्त्वेन - सर्वेषां कर्मणामिन्द्रादिशरीरकः परमात्मैवाराध्यः फलप्रदश्चेत्येवं रूपेण याथार्थ्येन । नाभिजानन्ति - नबुध्यन्ते । अतः - तत्त्वतोऽज्ञानाद्धेतोः ! च्यवन्ति - भ्रश्यन्ति । सर्वथा तत्प्रवृत्तिवैफल्यमितिभावः॥२४॥

नन्वेकस्यैव कर्मणः कथंभोगमोक्षरूप विरुद्धफलसाधनत्वमित्याशंक्य संकल्पाख्य सहकारिवैचित्र्या त्तदुपपन्नमित्याह (यान्तीति) देवव्रताः - अत्र व्रतशब्द स्संकल्पवाची । देवेषु - इन्द्रादिषु केवलेषु - व्रतं - दर्शपूर्णमासादीन्यक्ष्यामहइति यजनसंकल्पः - येषान्तेतथोक्ताः । देवान् - इन्द्रादीन् । यान्ति । पितृव्रताः - पितृषु - केवलेषु व्रतं - पितृयज्ञादिभिः पितॄन्यक्ष्यामहइति यजनसंकल्पोयेषान्ते तथोक्ताः । पितॄन् यान्ति । भूतेषु - केवलेषु यक्षरक्षःप्रभृतिषु, इज्या - अनेनकर्मणा यक्षादीन्यक्ष्यामहइति संकल्पपूर्वकं यजनं, येषान्ते तथोक्ताः । भूतानि यान्ति । मद्याजिनोपि - अनेन कर्मणासर्वज्ञं सत्यसंकल्पं परमकारुणिकं परमात्मानं यक्ष्यामहइति संकल्पपूर्वकं मामाराधयन्त स्तु पुरुषाः । मां यान्ति - अनादिनिधनं अनवधिकातिशयासंख्येय कल्याणगुणगणं अनवधिकातिशयानन्दं मां प्राप्य पुनर्नानिवर्तन्ते ॥ २५ ॥

यः - अत्यर्थमत्प्रियः पुरुषः । भक्त्या - अत्यर्थप्रीतिरूपता मापन्नेन ज्ञानेन । मे - मह्यम् । पत्रम् , पुष्पम् , फलम् , तेषामभावेसर्वं सुलभंतोयंवा । प्रयच्छति - तदेक प्रयोजनस्समर्पयति । प्रयतात्मनः - तत्प्रदानैक प्रयोजनत्वरूप शुद्धियुक्त मनसस्तस्य । भक्त्युपहृतम् - भक्त्यासमर्पितम् । तत - पत्रादिकमेव । अहम - सर्वेश्वरोवाप्त समस्तकामोपि । अश्नामि

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपेष्यसि ॥ ९८ ॥

मनोरथपथदूर वर्तिमिमं प्राप्येवाश्नामि । अत्रच " अन्यत्पूर्णादपांकुम्भा द- न्यत्पादावनेजनात् । अन्यत्कुशल संप्रश्नान्न चेच्छतिजनार्दनः ॥ याः क्रियास्संप्रयुक्ता स्स्युरेकांतगतबुद्धिभिः । तास्सर्वाश्शिरसादेवः प्रति गृह्णाति वैस्वयम् ॥ इत्यादिक मनुसन्धेयम् ॥ २६ ॥

यस्माज्ज्ञानिनामयमवाङ्मनसगोचरोविशेषः - तस्मात्त्वमपि ज्ञानी भूत्वा क्रियमाणं कर्मेत्थं कुर्वित्याह (यदिति) यत् - देहयात्राशेष भूतं लौकिकं कर्म । यदश्नासि - देहधारणाय यदन्नंकरोषि । यज्जु होषि-होमरूपं यद्वैदिकं कर्मकरोषि । यद्ददासि - दानरूपं यत्क र्मकरोषि । यत्तपस्यसि - तपोरूपं यत्कर्मकरोषि । हेकौन्तेय । त त्सर्वम् । मदर्पणं - अर्प्यतइत्यर्पणं - मय्यर्पितम् , कुरुष्व । अनुष्ठीयमा नस्य सर्वस्य लौकिकस्य वैदिकस्य च कर्मणः - कर्तृत्वं भोक्तृत्व माराध्यत्वं चात्यंतभक्तियुक्तो मय्यनुसंधत्स्वेत्यर्थः ॥ २७ ॥

एवं - उक्तरीत्या । संन्यासयोगयुक्तात्मा - सन्न्यासः सर्वकर्म णाम्मय्यर्पणं - सएवयोगः - अनुसंधानं , तेनयुक्तः - आत्मा - मनः - यस्यसतथोक्तः । त्वं । शुभाशुभफलैः - शुभानि अनुकूलानि, अशु भानि - प्रतिकूलानिच - फलानि - येषांतैस्तथोक्तैः । कर्मबंधनैः - कर्मा णिप्राचीनान्येव - बंधनानि मत्प्राप्ति प्रतिबंधकानि - तैः । विमोक्ष्यसे मुक्तोभविष्यसि । विमुक्तस्सन् । मामेव, उपैष्यसि ॥ २८॥

समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव समन्तव्यः सम्यग्व्यवसितोहिसः ॥ ३० ॥

अथजात्याकारादि कृततारतम्यानादरेण भक्तेषुस्वस्यैकरस्यमाह (स मइति) अहम् । सर्वभूतेषु - जात्याकारादिभि रुत्कृष्टापकृष्टतया वर्तमानेषु देवतिर्यङ्मनुष्यादि समस्तभूतेषु । समः-समाश्रयणीयत्वेतुल्यः । तदेवस्पुटीकरोति । मे-मम । द्वेष्यः-जात्याकारादिभि र्निकृष्टतया समाश्रयणे परिहरणीयः । नविद्यते । प्रियः-जात्यादिभिरुत्कृष्टतया समाश्रयणेसंग्राह्योपि । नविद्यते । एवंतर्हि-सच ममाप्रियइत्युक्त्या प्रियत्वं विरुध्यतइत्यत्राह (यइति) तुशब्दश्शंकानिरासार्थः । ये-जात्यादिभिरुत्कृष्टावा अपकृष्टावा । भक्त्या । मां । भजन्ति-उपासते । ते । मयि । वर्तन्ते-मत्समानाइव यथासुखं मयिव्यवहरन्ति । तेषुच-अहमपि । वर्ते-उत्कृष्टेष्विवव्यवहरामि " निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शिनम् । अनुव्रज्याम्यहंनित्य पूयेयेत्यंघ्रिरेणुभिः " इत्यादिकमत्रानुसन्धेयम् ॥२९॥

समाश्रयणे जात्याद्यपकर्षो प्रयोजकइत्युक्तं ॥ तथा वृत्तापकर्षश्चाप्रयोजक इत्याह (अपीति) सुदुराचारः- सुष्टुदुराचारः - तत्तज्जात्याद्युचिताचार विपरीताचार विहिताकरणा विहितकरणरूप दुष्टाचारोयस्यसतथोक्तोपि । अनन्यभाक्-भजनैकप्रयोजनस्सन् । मां । भजतेचेत उक्तप्रकारेणोपास्ते यदि, सः, साधुरेव वैष्णवाग्रेसरएव । मन्तव्यः - बहुमन्तव्यः । कुतएतदित्यतआह (सम्यगिति) हि - यस्मात्कारणात् । सः -सम्यक् । समीचीनं यथा तथा । व्यवसितः-व्यवसायंकृतवान् । भगवान्नारायणएव चराचरपतिरस्मत्स्वामीपरमभोग्यइत्येवं रूपदृढाध्यवसायइतिभावः ॥ ३० ॥

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छाति ।
कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥
मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रा स्तेपि यांति परां गतिम् ॥ ३२ ॥

अस्त्वय मन्येषां बहुमन्तव्यः, तस्यतु न कार्यसिद्धिः - "नाविरतो दुश्चरिता" दिति श्रुते राचारव्यतिक्रमस्योत्तरोत्तर भजनोत्पत्ति प्रवाह निरोधित्वादित्यत्राह (क्षिप्रमिति) दुराचारोपि । क्षिप्रमेव-शीघ्रमेव । धर्मात्मा - धर्मे - सपरिकरे नन्यमद्भजन रूपधर्म एव, आत्मा - मनः यस्यसतथोक्तः । भवति - उपासना प्रतिबन्धक रजस्तमोमूलभूत पापनिवृत्यर्थोहि सदाचारः, तादृशे पापेऽनन्य प्रयोजनमद्भजनोपक्रमेण निवृत्तेसति प्रतिबंधकाभावा दविळंबेनैव मद्भजनप्रवाहैकमना भवतीत्यर्थः ॥ शश्वत् - शाश्वतीं - अपुनराववर्तिनीम् । शांतिं - मत्प्राप्तिविरोध्याचार निवृत्तिंच । निगच्छति । हेकौंतेय । प्रतिजानीहि - त्वमेवास्मिन्नर्थे प्रतिज्ञांकुरु । प्रतिज्ञातव्य मर्थमाह (नेति) मे - मम । भक्तः - भक्त्यावुपक्रांतः । न प्रणश्यति - विरोध्याचार मिश्रोपि न नश्यति । अपितु - भक्त्युपक्रम माहात्म्येन सर्वविरोधिजातं विधूय विरुद्धाचारशांति मप्यधिगम्य शीघ्रमेव परिपूर्णभक्ति र्भवतीत्यर्थः ॥ ३१ ॥

जात्युत्कर्षं भक्तिपौष्कल्यंच कैमुत्यन्यायेन परमगतिप्राप्तिं वदन्-जात्यादिभि रुत्कृष्टस्त्वमपि फले निस्संदेह उपाय मनुतिष्ठेत्याह "मांही"त्यादि श्लोकद्वयेन । हेपार्थ । पापयोनयः – पापजन्मानोपि । ये । स्त्रियः । वैश्याः । शूद्राश्च । स्युः - संति । तेपि । माम् । व्यपाश्रित्य । पराम् । गतिं । यांतिहि । ॥ ३२ ॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैव मात्मानं मत्परायणः ॥ ३४ ॥

इति नवमोऽध्यायः ॥ ९ ॥

पुण्याः – पुण्ययोनयः । भक्ताः – मयि भक्तिमन्तः । ब्राह्मणाः – द्विजाः । तथा । राजर्षयः – ऋषितुल्याः – राजानः – क्षत्रिया श्च । किं पुनः – परां गतिं यान्तीति किं वक्तव्यम् । अनित्यं – अस्थिरम् । असुखं – तापत्रयाभिभूततया दुःखरूपम् । इमं – अतिक्षुद्रम् । लोकम् । प्राप्य । वर्तमानो राजर्षि स्त्वम् । माम् भजस्व – मद्भक्ति मनुतिष्ठ ॥ ३३ ॥

भक्तिस्वरूप माह (मन्मना इति) मद्भक्तः – मय्यत्यर्थप्रीति युक्त स्सन् । मन्मनाः – मय्येव, मनः – तैलधारावदविच्छिन्नास्मृति सन्तानरूपा मनोवृत्तिः, यस्य स तथोक्तः । भव । तथा । मद्याजी – परिपूर्णशेषवृत्तिरूपमद्यजनशीलः । भव । किञ्च । माम् नमस्कुरु – मयि मनसो तिमात्रप्रह्वीभावव्यवसायरूपं नमस्कारं कुरु । णमुप्रह्वत्वे इति हि धातुः । एवं – उक्तरूपं – मन्नमस्कार मद्यजन मद्भक्तियुक्त मदेकविषयवृत्तिविशेषवन्त मित्यर्थः । आत्मानं-मनः । युक्त्वा – लब्ध्वा । मत्परायणः – अह मेव परमयनं यस्य स तथोक्तः, मया विनात्मधारणाशक्त्या मदेकाश्रय इत्यर्थः । मा मेव । एष्यसि – प्राप्स्यसि ॥ ३४ ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

नवमोऽध्यायः ॥ ९ ॥

श्रीरस्तु ।

अथ दशमोऽध्यायः ।

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥
न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

एवं सपरिकरो भक्तियोग उक्तः । इदानीं भक्त्युत्पत्तये तद्विवृद्धयेच भगवतो निरंकुशैश्वर्यादिकल्याणगुणानन्त्यं प्रपञ्च्यते । हे महाबाहो । मे- मम । परमं- उत्कृष्टतमं । वचः । भूय एव-पुनरपि । शृणु सावधानमाकर्णय । किन्तद्वच इत्यत्राह । प्रीयमाणाय - मदीयमाहात्म्यश्रवणे ऽतिमात्रप्रीतिमते । ते- तुभ्यम् । हितकाम्यया-भक्त्युत्पत्ति विवृद्धिरूपहितकामनया । अहं । यत- वचः । वक्ष्यामि - कथयिष्यामि ॥ १ ॥

वक्ष्यमाणज्ञानस्यादरणीयत्वसिद्धये दुर्लभत्वमाह (नमइति) मे- मम । प्रभवं- प्रभावं- माहात्म्यम् । सुरगणाः- अधिकतरज्ञाना ब्रह्मादिदेवगणाअपि । न विदुः- नजानन्ति । महर्षयः - अतीन्द्रियार्थ द्रष्टारोब्रह्मर्षयोपि । नविदुः । तत्रहेतुमाह ॥ हि- यस्मात्कारणात । देवानाम् । महर्षीणां च । सम्बन्धिनः । सर्वशः- सर्वस्य च स्वरूपज्ञानशक्त्यादेः । अहमेव । आदिः- कारणम् । तेषांदेवत्वमहर्षित्वा वाप्तिहेतुपुण्यानुगुण्येन मयादत्तं ज्ञानशक्त्यादिकं परिमितम् ; अतो मां यथावज्ज्ञातुं शक्नुवन्तीति भावः । अत्र " यत्रदेवानमुनयो

योमामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥

नचाहं नच शंकरः । जानन्ति परमेशस्य तद्विष्णोःपरमंपद"मित्यादिक मनुसन्धेयम् ॥ २ ॥

देवाद्यचिन्त्य स्वमाहात्म्यज्ञानस्य भक्त्युत्पत्तिविरोधि पापविमोचनोपायतामाह (य इति) मर्त्येषु- मनुष्येषु मध्ये । असम्मूढः- इतर सजातीयतयैक्यीकृत्यमोहः- सम्मोहः, तद्रहितः । यः - मनुष्यः । नजायत इत्यजं- कर्मकृताचित्संसर्गरूपजन्मरहितं । अनेनविकारिद्रव्यादचेतनात्तत्संसृष्टबद्धचेतनाच्च वैलक्षण्यमुक्तम् , सहिकर्मकृताचित्संसर्गरूपजन्मवान् । कदाचिदजत्वम्मुक्तस्याप्यस्तीति तद्वैलक्षण्यार्थमाह (अनादिमिति) अजत्वेनानादिंचेत्यर्थः । मुक्तस्यह्यजत्वंकादाचित्कं, नत्वनादि, ततोऽस्यवैलक्षण्यम् । एतादृशम् । माम् । लोकमहेश्वरं- लोकानां- सर्वावस्थावस्थित समस्तचिदचिद्वस्तूनां, महान्तं- ईश्वरं- नियन्तारं, तन्नियमनैकस्वभावतया तद्विलक्षणमित्यर्थः । अनेन नित्यसिद्धेभ्योपि तस्यवैलक्षण्यमुक्तम् । वेत्ति- जानाति । सः । सर्वपापैः- मद्भक्त्युत्पत्तिविरोधि समस्तकिल्बिषैः । प्रमुच्यते- विमुच्यते ॥३॥

एवं स्वस्वभावानुसन्धाना द्भक्त्युत्पत्तिविरोधिपापनिरसनमुखेन भक्त्युत्पत्तिं प्रतिपाद्य स्वकीयैश्वर्यकल्याणगुणप्रपंचानुसन्धानेन भक्तिविवृद्धिप्रकार माह (बुद्धि रित्यादि) बुद्धिः - मनसो निरूपण सामर्थ्यम् । ज्ञानं - चिदचिद्वस्तुविषयो निश्चयः । असम्मोहः - सम्मोहस्य निवृत्तिः, सम्मोहो नामपूर्वदृष्टरजतादे र्विजातीये शुक्तिकादौ तत्सजातीयता बुद्धिः । क्षमा - कोपादिमनोविकारहेतौ सत्य

अहिंसा समता तुष्टि स्तपो दानं यशोऽयशः ।
भवन्ति भावाभूतानां मत्त एव पृथग्विधाः ॥ ५ ॥
महर्षय स्सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसाजाता येषां लोक इमाः प्रजाः ॥ ६ ॥

प्यविकृतचित्तत्वम् । सत्यं - यथादृष्टविषयभूतहितरूपवचनानुगुणा मनोवृत्तिः । दमः - बाह्येन्द्रियाणा मसद्विषयेभ्यो नियमनम् । शमः - अन्त रिन्द्रियस्य तथा नियमनम् । सुखं - अनुकूलानुभवः । दुःखं - प्रतिकूलानुभवः । भवः - अनुकूलानुभवजनितं मनस्स्वास्थ्यम् । अभावः - प्रतिकूलानुभवजनितो मनसो ऽवसादः । भयं - आगामिदुःखस्य हेतुदर्शनजनितं दुःखं च । अभयं - तन्निवृत्तिरेव च ॥ ४॥ अहिंसा - परदुःखाहेतुत्वम् । समता-विद्याविनयसम्पन्न इत्या द्युक्तसमदर्शित्वम् । तुष्टिः - सर्वेष्वात्मसु दृष्टेषु सन्तोषस्वभावत्वम् । तपः - शास्त्रीयो भोगसंकोचरूपः कायक्लेशः । दानं - स्वकीयभोग्यानां परस्मै प्रतिपादनम् । यशः - गुणवत्ताप्रसिद्धिः । अयशः - गुणहीनत्वप्रथा । अत्र तपोदानादिचतुष्टयं तदनुगुणमनोवृत्तिविषय म्मन्तव्यम् । एवमादयः । पृथग्विधाः - नानाप्रकाराः । भूतानां - देवमनुष्यादीनाम् । भावाः - प्रवृत्तिहेतवो मनोवृत्तयः । मत्त एव - मत्संकल्पा देव । भवन्ति ॥ ५ ॥

सर्वस्य भूतजातस्य सृष्टिस्थितिप्रवर्तकतया प्रसिद्धा अपि मत्संकल्पायत्तप्रवृत्तिका इत्याह (महर्षय इति) पूर्वे - अतीतमन्वन्तरस्थाः । मानसाः - नित्यसृष्टिप्रवर्तनाय ब्रह्मणो मनस्सम्भूताः ! सप्त महर्षयः - भृग्वादयः । तथा । चत्वारः । मनवः - सावर्णिका नाम स्थितिहेतव श्चत्वारो मनव श्च । मद्भावाः - मम भावो भिप्राय एव भावो येषां ते तथोक्ताः - मत्संकल्पानुवर्तिन इत्यर्थः। तानेव विशेषयति (जाता इति) येषां - महर्षीणाम् । लोके - पुत्रपौत्रादि

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकंप्येन योगेन युज्यते नात्र संशयः ॥ ७ ॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥

सन्तानमये ऽस्मिन् लोके । इमाः - परिदृश्यमानाः । प्रजाः । जाताः । ते मद्भावा इति पूर्वेणान्वयः ॥ ६ ॥

एतां - सर्वस्योत्पत्ति प्रवृत्ति नियमनरूपाम् । मम । विभूतिं - ऐश्वर्यम् । एतम् । मम । योगं च - अखिलहेय प्रत्यनीकानवधिकातिशया संख्येयकल्याण गुणगणयोगंच । तत्त्वतः- तत्त्वेन - अबाधिताकारेण । यः । वेत्ति - जानाति । सः । अवि कंप्येन - बाधकशतेनाप्यविचाल्येन, अशक्यकंपनेनेतिभावत् । योगेन - पूर्वोक्तलक्षण भक्तिरूपोपायेन । युज्यते - संबध्यते । अत्र - अस्मिन्नर्थे । संशयः । नास्ति, नकर्तव्यइत्यर्थः । मद्विभू तिगुणविषयं ज्ञानं भक्तियोगविवर्धक मित्यमुमर्थं स्वयमेव द्रक्ष्यसी तिभावः ॥ ७ ॥

स्वविभूतिगुणज्ञानविपाकरूपां भक्ते र्विवृद्धिं दर्शयति (अह मिति) अहम् । सर्वस्य - विचित्र चिदचित्प्रपंचस्य । प्रभवः - उत्प त्तिकारणम् । मत्तएव सर्वं - जगत् । प्रवर्तते । इति - एव रूपं ममस्वाभाविकं निरंकुशैश्वर्यं । जगत्कारणत्वोक्त्या तदुपयोगि कल्याणगुणयोगंचेत्यर्थासिद्धम् । मत्वा - ज्ञात्वा । बुधाः - ज्ञानिनः । भावसमन्विताः - मयि स्पृहावन्त स्सन्तः । मां - समस्तकल्याण गुणाकरम् । भजन्ते । भक्त्योपासते ॥ ८ ॥

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमंति च ॥ ९ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥
तेषामेवानुकंपार्थं महमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषां स्पृहारूपभावसमन्वितत्व मेव प्रपंचयति (मच्चित्ता इति) मच्चित्ताः - मय्येव निवसितमनसः । मद्गतप्राणाः - मद्गतजीवाः, मया विना क्षण मपि धारण मलभमाना इत्यर्थः । परस्परं - अन्योन्यम् । बोधयन्तः - स्वस्व विदितान् मत्कल्याणगुणविशेषा नज्ञातान् ज्ञापयन्तः । मां - दिव्याद्भुतातिरमणीयजन्मकर्माणम् । नित्यं - नित्यनैमित्तिकानुष्ठानानवरुद्धकालादि ष्वनवरतम् । कथयन्तः - मत्कथाश्रवणकण्डूलकर्णकुहरेभ्यो वदन्त श्च सन्तः । तुष्यन्ति च - कथका स्तत्कथनेना नन्यप्रयोजनेन सन्तुष्यन्ति च । रमन्ति च - श्रोतार स्तत्कथाश्रवणेना त्यर्थप्रियेण क्रीडन्ति च ॥ ९ ॥

भगवद्गुणविभूतिज्ञानस्य भक्त्युत्पत्तिविवृद्धिहेतुत्व मुक्तम् । अथ तथाविधविवृद्धभक्ते र्भगवत्प्राप्तिपूर्वभाविविशदतमसाक्षात्काररूपावस्थाविशेषहेतुत्वं भगवत्प्रसादद्वारक माह (तेषामिति) सततयुक्तानां - मयि सततयोगाशंसावतां, नित्यं - मत्संश्लेषाभिलाषिणा मित्यर्थः । तदर्थम् । भजतां - भक्ति कुर्वताम् । तेषां बुधानाम् । अहम् । तम् । बुद्धियोगं - भावनाप्रकर्षेण प्रत्यक्षवद्विशदतमबुद्धिरूप मुपायम् । प्रीतिपूर्वकं - तद्भक्तिजनितः कोपि निरतिशयो यो मनःप्रसादः तत्पूर्वकं यथा तथा । ददामि । येन - बुद्धियोगेन । ते - बुधाः । माम् । उपयान्ति - प्राप्नुवन्ति ॥ १० ॥

उक्तबुद्धियोगोत्पत्तिविरोधिनिवृत्ति माह (तेषा मेवेति) अनुकंपार्थमेव- अनुग्रहायैव अहं - कल्याणगुणविग्रहविशिष्टोऽहम -

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितोदेवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

तेषां आत्मभावस्थः- आत्मभावे मनोवृत्तौ तिष्ठतीति तथोक्तः, मनोवृत्तिविषयो भूत्वा मत्कल्याणगुणान् प्रकाशयन्नित्यर्थः । भास्वता - परितः प्रकाशमानेन, मदीय सर्वप्रकारप्रकाशकेन । ज्ञानदीपेन · मद्विषय विशदतमानुभवरूपेण दीपेन । अज्ञानजं अज्ञानविरोधि प्राचीनकर्मजनितम् । तमः - मत्साक्षात्कारप्रतिबन्धक मद्व्यतिरिक्तविषयप्रावण्यरूपमन्धकारम् । नाशयामि निवर्तयामि । मदनुग्रहायत्तनिरतिशयभोग्यकल्याणगुण विशिष्टमद्विषयाविशदानुभवलाभेसति सवासनप्राचीनकर्मरूपाज्ञाननिवृत्तेः पूर्वाभ्यस्तविषयान्तरप्रावण्यं स्वयमेवनिवर्तते, नहि महार्हमिन्द्रनीलमणिं लब्धवतः काचकरीषाद्यभिलाषा भवन्ति ॥ ११ ॥

एवं शृण्वतां निरतिशयानन्दजनकं भगवतोक्तं भगवदसाधारणं कल्याणगुणविभूतियोगं श्रुत्वा विस्तरेण श्रोतुमर्जुनः पृच्छति "पर" मित्यादिना । परं- यतोवा इमानि भूतानि जायन्त इत्याद्युक्तरीत्या कृत्स्नजगत्कारणभूतम् ब्रह्म । परं- तमेवभान्तमनुभातिसर्वं तस्य भासासर्वमिदं विभातीत्याद्युक्तरीत्या स्वेतरसमस्तज्योतिषां प्रकाशकम् । धाम· ज्योतिः । परमं - उत्कृष्टतमम् । पवित्रं - "तद्यथेषीकतूलमग्नौप्रोतं प्रदूयेत ॥ तद्यथा पुष्करपलाश आपोनश्लिष्यन्ते" इत्याद्युक्तरीत्यास्वाश्रितानां पूर्वोत्तराघविनाशा श्लेषरूपशुद्धिकरं च वस्तु । भवान्- त्वमेव । किं तत्र प्रमाणमित्यत्राह· 'पुरुषमि'त्यादिसार्धश्लोकेन । सर्वे ऋषयः- परावरवस्तुतत्त्वयाथात्म्यवेदिनः । त्वां - देवकीवसु

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
नहिते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

देवतनयतया ऽवतीर्णं त्वामेव । शाश्वतं- सनातनम् । दिव्यं- दिवि- तमसः परस्ताद्वर्तमानं । पुरुषं- अमृतत्रिपाद्विभूतिविशिष्टतया पुरुष सूक्तप्रतिपाद्यं महापुरुषम् । आदिदेवं- आदिश्चासौ देवश्चादिदेवः- आदिः- जगत्कारणभूतः, दीव्यति क्रीडतीतिदेवः- " क्रीडाहरेरिदं सर्वम् " " बालःक्रीडनकैरिव " इत्याद्युक्तरीत्या क्रीडारूपजगद्व्यापारइत्यर्थः, तम् । अजं - कर्मकृतजन्मादिरहितम् । विभुं- सर्वव्यापकम् , सर्वनियन्तारंवा । आहुः- एककण्ठ्येन वदन्ति । तथा । देवश्चासावृषिश्चदेवर्षिः । नारदः । असितः- असितनामकः । देवलः- देवलाख्यः । व्यासः- पाराशर्यश्च । आहुः । तच्चवचनं तत्तत्प्रणीतस्मृतीतिहासपुराणान्येवेतिभावः। " येच वेदविदोविप्रायेचाध्यात्मविदोजनाः । तेवदन्तिमहात्मानं कृष्णंधर्मं सनातनम् । पवित्राणांहिगोविन्दः पवित्रंपरमुच्यते । पुण्यानामपि पुण्योसौ मंगळानां च मंगळम् । एषनारायणश्श्रीमान् क्षीरार्णव निकेतनः । नागपर्यंकमुत्सृज्यह्या गतोमधुरांपुरीं । पुण्याद्भारतीत्र यत्रास्तेमधुसूदनः । साक्षाद्देवः पुराणोसौवासुदेवस्सनातनः " इत्यादिकमिहानुसंधेयं । किंच । स्वयमेव -ब्रह्मादीनामपिगुरुस्त्वमेव । मे - मह्यम् । त्वाम् । उक्तरूपम् । ब्रवीषि - वदसि । "भूमिरापोऽनलो वायुः । यो मा मजमनादिं च वेत्ति लोकमहेश्वर " मिति त्वयैवह्युक्तमितिभावः ॥१३ ॥

हेकेशव - ब्रह्मरुद्रयोरपिकारणभूत । मां - शिष्यं शरणागतंच मां प्रति । यत्- त्वदसाधारणं निरंकुशैश्वर्यं कल्याणगुणानंत्यंच । वदसि । एतत् । सर्वम् । ऋतं - सत्यम् । मन्ये । नप्रशंसापरं -

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ॥
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥
वक्तुमर्हस्यशेषेण दिव्याह्यात्मविभूतयः ।
याभिर्विभूतिभि र्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

श्रुतिसिद्धत्वा दृषिवचनादाप्ततमेन त्वयाचोक्तत्वादितिभावः । हेभगवन्-निरतिशय ज्ञानबलैश्वर्य वीर्यशक्तितेजोनिधे । ते - तव । व्यक्ति - व्यंजनप्रकारं, प्रष्टृणां त्वद्वैभवप्रतिपादन प्रकारमित्यर्थः । देवाः - सात्विकप्रकृतयोब्रह्मादयोऽपि । नविदुः - नजानंति । दानवाः - ताम सप्रकृतयोऽसुराश्च । नविदुः । दानवग्रहणंदृष्टान्तार्थं । हिशब्देनतेषां तदज्ञानहेतोः परिमितज्ञानरूपस्य प्रसिद्धिस्सूच्यते ॥ १४ ॥

एवं देवादीनां भगवद्वैभववक्तृत्वयोग्यतां निराकृत्याथ भगवतए व स्ववैभववक्तृत्वयोग्यतामाह (स्वयमिति) हेभूतभावन - भूतानामु त्पादक । भूतेश - सर्वभूतनियामक । देवदेव - देवानामपि - ब्रह्मरुद्रें द्रादीनामपि, यथादेवास्तिर्यङ्मनुष्यस्थावरा नात्मगुणैर्विग्रहगुणैश्चाति त्यवर्तन्ते - तथास्वगुणैर्देवा नप्यतीत्यवर्तमानेत्यर्थः । जगत्पते - जग त्स्वामिन् । हेपुरुषोत्तम - पुरुषधौरेय । त्वम् । स्वयमेव - अनन्या नुगृहीतइत्यर्थः । आत्मना - स्वभावभूतेनज्ञानेन । आत्मानं - त्वदुक्त निरंकुशैश्वर्यकल्याण गुणगणानंत्यविशिष्टं त्वाम् । वेत्थ - जानासि । स्वतस्सर्वज्ञत्वात्त्वद्वैभवं वक्तुं त्वमेव समर्थइतिभावः ॥ १५ ॥

एवं वक्तारं भगवन्त मभिमुखीकृत्याथ पृच्छति (वक्तुमिति) अत्र - त्वं - आत्मानं - इतिपदे पूर्वश्लोकादनुषंजनीये । त्वमेव । अशेषेण कृत्स्नेन निरंकुशैश्वर्यादिना - विशिष्टम् । त्वाम् । वक्तुं - व्यंजयितुम् । अर्हसि - योग्योसि । वक्तव्यत्वे हेतुमाह । हि - यस्मात्कारणात् । आत्मविभूतयः - आत्मनः - तव, विभूतयः - ऐश्वर्याणि । दिव्याः -

कथं विद्यामहं योगी त्वां सदा परिचिन्तयन् ।

केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिंच जनार्दन ।

भूयःकथय तृप्तिर्हि शृण्वतो नास्तिमे मृतम् ॥१८॥

अद्भुतानि । सकृच्छ्रवणेन तृप्तिर्नजायतइतिभावः । याभिः । विभूतिभिः - नियमनैश्वर्यैः , उपलक्षितस्त्वं । इमान् । लोकान्-स्थावरजंगमात्मकानिजगन्ति । व्याप्य - नियन्तृत्वेनान्तःप्रविश्य । तिष्ठसि-वर्तसे ॥ १६ ॥

"कथ"मित्यादि श्लोकद्वयेन प्रश्नस्य प्रयोजनं प्रश्नकारणं प्रष्टव्यार्थांश्च वदन्नुत्तरंप्रार्थयते । हेभगवन् । अहम् । योगी - भक्तियोगनिष्ठस्सन् । त्वां - परिपूर्णैश्वर्य कल्याणगुणविशिष्टं भवन्तम् । सदा - भक्तिवशादविरतम् । परिचिन्तयन् - परिचिन्तयितुम् । कथं-केनप्रकारेण । विद्यां -जानीयाम् । किंच-मया त्वम् । केषुकेषु भावेषु-बुद्धिज्ञानासम्मोहादि व्यतिरिक्तेषु केषुकेषु भावेषु । चिंत्यः - नियंतृतयाचिंतनीयः । असि ॥१७ ॥

हेजनार्दन - आश्रितजनाभीष्टप्रापक । आत्मनः - स्वस्य । योगं - अहं सर्वस्य प्रभवोमत्तस्सर्वं प्रवर्तते ॥ इत्यादिना संक्षेपेणपूर्वमुक्तं स्रष्टृत्वादि गुणयोगम् । विभूतिं - नियमनंच । भूयः - पुनः । विस्तरेण-शब्दप्रपंचेन । कथय । हि - यस्मात्कारणात् । अमृतं - शब्दतोऽर्थतश्चामृतवदत्यंतभोग्यभूतं त्वदीयं त्वन्माहात्म्य प्रतिपादनम् । शृण्वतः । मे - मम । तृप्तिः - पर्याप्तिः । नास्ति ॥ १८ ॥

श्रीभगवानुवाच ।

हन्त ते कथयिष्यामि दिव्याह्यात्म विभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥
अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अह मादिश्च मध्यं च भूताना मन्तएवच ॥२०॥

एवमत्यन्तमचापृच्छंतमर्जुनं प्रत्यतिप्रसन्नोभगवां स्तस्याभिज्ञात्ववर्णन मुखेनोपदेशयोग्यतां दर्शयन्नुत्तरं प्रतिजानीते (हंतेति) संक्षेपेण मद्विभूतिश्रवणादतृप्तः पुनः प्रष्टालोकेऽतिदुर्लभोऽयममलब्धइति भगवान् स्वस्यहर्षातिशयं सूचयति (हंतेति) हेकुरुश्रेष्ठ –कुरुवंशप्रदीपं । ते-अनसूयाय प्रीयमाणाया तृप्ताय तुभ्यम् । प्राधान्यतः - प्राधान्येन - उत्कृष्टत्वेनोपलक्षिताः । शुभाः - कल्याणीः । आत्मनः - मम । विभूतीः – नियमनविषयान् पदार्थान् । कथयिष्यामि । ननु विस्तरेण कथयेति पृच्छन्तं प्रति प्राधान्यतः कथयिष्यामीति कथमुच्यतइत्यत्राह (नास्तीति)मे-मम । विस्तरस्य । गुणविभूति गोचरशब्दप्रपंचस्य । अंतः- अवसानम् । नास्ति । प्रतिपाद्य गुणविभूतीना मानंत्या द्विस्तरेणवक्तुं श्रोतुंचा शक्यमित्यर्थः ॥ १९ ॥

आत्मनोयोगं विभूतिंचेति पृष्टमर्थद्वयं विस्तरेणवक्तुमसम्भवात्संग्रहेण तस्योत्तरमाह (अहमिति) हेगुडाकेश । अहम् । आत्मासन् । सर्वभूताशयस्थितः–सर्वेषां भूतानां प्राणिनां मम शरीरभूतानां, आशये- हृदये, स्थितः । भवन्तिभावाभूतानामित्याद्युक्त सर्वभूतप्रवर्तनरूपं विभूतिशब्दनिर्दिष्टं मम नियमनंराज्ञां भृत्यादिनियमनमिव न पृथगवस्थाय - किन्तु मम शरीरभूतेषु प्राणिष्वात्मतया ऽवस्थायेतिभावः । एवं विभूतिप्रश्नस्य संग्रहेणोत्तर मुक्त्वा योगप्रश्नस्यापि संग्रहेणोत्तर माह (अहमिति) अहं - समस्तकल्याणगुणाकरोऽ हमेव । भूता

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहंशशी ॥२१॥
वेदानां सामवेदोऽस्मि देवानामस्मिवासवः ।
इन्द्रियाणाम्मनश्चास्मि भूतानामस्मिचेतना ॥ २२ ॥

नां - मम शरीरभूतानां प्राणिनाम् । आदिश्च- उत्पत्तिहेतुश्च । मध्यंच- उत्पत्तिप्रळय मध्यस्थितिहेतुश्च । अन्त एवच - प्रळयहेतुश्च । अनेन संग्रहेण योगप्रश्नस्याप्युत्तरमुक्तम्भवति ॥ २० ॥

एवं भगवतस्स्वशरीरभूतेषु सर्वेष्वात्मतयावस्थानं तत्तच्छब्दसामानाधिकरण्य निर्देशहेतुं प्रतिपाद्यप्रधानभूतान् विभूतिविशेषान् सामानाधिकरण्येन निर्दिशन्विस्तरेणोत्तरमाह (आदित्यानामिति) आदित्यानां- द्वादशसंख्यानां सूर्याणाम्मध्ये । विष्णुः - विष्णुनामक उत्कृष्ट आदित्यः । अहम् । ज्योतिषां- जगतिप्रकाशक पदार्थानाम्मध्ये । अंशुमान् - प्रशस्तकिरणः । रविः - आदित्यः । अहम् । मरुतां- दितिपुत्राणामेकोनपंचाशद्वायूनाम्मध्ये । मरीचिः - उत्कृष्टो मरीचिनामावायुः । अहम् । अस्मि । नक्षत्राणां - अश्विन्यादीनां। पतिः । शशी- चन्द्रः । अहम् ॥ २१ ॥

वेदानां - ऋग्यजुस्सामाथर्वणाम्मध्ये । सामवेदः - गानप्रधानतया सहस्रशाखात्मकतया चोत्कृष्टस्सामवेदः । अहम् । अस्मि । देवानां - स्वर्गिणाम्मध्ये । वासवः - त्रैलोक्याधिपत्यरूप परमैश्वर्य सम्पन्नतयोत्कृष्ट इन्द्रः । अहम् । अस्मि । इन्द्रियाणां - एकादशानाम्मध्ये । मनश्च - विषयस्पृहानैस्पृह्यदशाभेदेन बन्धमोक्षोभयकारणतयोत्कृष्टंमनश्च । अहम् । अस्मि । भूतानां- चेतनावतां प्राणिनाम् । चेतना - बुद्धिः । अहम् । अस्मि ॥ २२ ॥

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुःशिखरिणामहम् ॥२३॥
पुरोधसांच मुख्यम्मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मिसागरः ॥२४॥
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोस्मि स्थावरणां हिमालयः ॥२५॥

रुद्राणां - एकादशानां रुद्राणाम्मध्ये । शंकरश्च - समस्तजनसुख करत्वेन प्रशस्तश्शंकरनामारुद्रश्च । अहं । अस्मि । यक्षरक्षसां - यक्षाणां राक्षसानांच । पतिः । वित्तेशः - नवनिधिस्वामित्वेनोत्कृष्टः कुबेरः । अहम् । वसूनां - अष्टसंख्याकानां वसूनाम्मध्ये । पावकः - उत्कृष्टः पावकनामावसुश्च । अहम् । शिखरिणां - रत्नकांचनमय प्रशस्तशिखराणां पर्वतानाम्मध्ये । मेरुः - सुरालयतया प्रशस्तोमेरुपर्वतः । अहम् ॥ २३ ॥

हेपार्थ । पुरोधसां - पुरोहितानाम्मध्ये । मुख्यं - वाचस्पतित्वेन प्रधानम् । बृहस्पतिंच । मां । विद्धि - जानीहि । सेनानीनां-चमूपतीनाम्मध्ये । स्कंदः - देवसेनापतित्वेनोत्कृष्टः कुमारस्वामी । अहं । सरसां - स्थास्नु सलिलाशयानाम्मध्ये । सागरः - अगाधत्वविपुलत्वादिना प्रशस्तस्समुद्रः । अहं । अस्मि ॥२४ ॥

महर्षीणां - मरीचिप्रमुखानां मध्ये । भृगुः - भृगुनामामहर्षिः । अहम् । गिरां । अर्थवच्छद्बानाम्मध्ये । एकमक्षरं - ओमित्येकाक्षरं ब्रह्मेतिश्रुतिप्रसिद्धः परब्रह्मरूपोत्कृष्टार्थाभिधायित्वेन प्रशस्तः प्रणवः । अहम् । यज्ञानाम् । मध्ये । जपयज्ञः - जपरूपोयज्ञः । अहम् । अस्मि । जपयज्ञोहि सर्वेष्वपि यज्ञेषुप्रशस्ततमः । विधियज्ञाज्जपयज्ञो विशिष्टोदशभिर्गुणैरितिवचनात् । सर्वाश्रमसाधारण्यात् ।

अश्वत्थः सर्ववृक्षाणां देवर्षीणांच नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलोमुनिः ॥२६॥

" जप्येनापितु संसिध्येद्ब्राह्मणोनात्रसंशयः । कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मणउच्यत " इतिविधुरादेरपि सिद्धिहेतुत्वेनावगतत्वाच्च । अत्रवेदान्ताचार्यै स्तात्पर्यचन्द्रिकायां जपयज्ञस्यैव प्राशस्त्यं समर्थितं - तथाहि जपयज्ञस्य प्राशस्त्य मन्यत्र प्रसिद्धम् । विधियज्ञा ज्जपयज्ञोविशिष्टो दशभिर्गुणैरिति । किंच । कुर्याद्घृतपशुं सङ्ग्ये कुर्यात्पिष्टपशुंतथा । नत्वेवतु वृथाहन्तुं पशुमिच्छेत्कथंचनेति । पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति । हिंसात्मकैस्तु किंतस्ययज्ञैः कार्यम्महात्मनः । प्रस्वापेच प्रबोधेच पूजितो येन केशवइत्यादि वचनबाहुळ्या दहिंसात्मकयज्ञानर्हाणां हिंसात्मकयज्ञानुज्ञानं । तत्रापि विधितः प्रवृत्तेरपकारा द्यनभिसन्धानादुपकारश्रुते र्देवताप्रीणनत्वाच्च नप्रत्यवायः । फलार्थिनान्तु तत्फल मल्प मस्थिरं दुःख मिश्रश्च । अहिंसात्मकास्तु यज्ञाविशिष्टाधिकारिसाध्याः भगवतो ऽतिप्रीणनत्वा दपवर्गप्रत्यासन्नाः । अतएव वसुपरिचर वस्वादयः पिष्टपशुभिरिष्टवन्तः । एवमितरेषु यज्ञेषु हिंसादिप्रसंगादधिकारिविशेषादिना विषयव्यवस्थापन मित्यादिमहान्क्लेशः । जपयज्ञेतु तत्प्रसंगाभावात - अव्यापकार्थ प्रतीत्या सर्वाजयोगद्वारा समाधानानिवेशनाच्च यज्ञान्तरेभ्यो जपयज्ञः प्रशस्ततमः । सर्वाश्रम साधारण्यात " जप्येनापितु संसिध्ये द्ब्राह्मणोनात्रसंशयः । कुर्यादन्यन्नवाकुर्या न्मैत्रोब्राह्मणउच्यत " इति विधुरादेरपि सिद्धिहेतुत्वाच्चेति । स्थावराणां । पर्वतमात्राणाम्मध्ये । हिमालयः - पर्वतराजत्वेन प्रसिद्धः प्रशस्तो हिमवान् । अहम् ॥ २५ ॥

सर्ववृक्षाणां - मध्ये । अश्वत्थः - प्रदक्षिणादिना पूज्यतयाप्रसिद्धः प्रशस्तः पिप्पलवृक्षः । अहं । देवर्षीणां - मध्ये । नारदश्च - ब्रह्मपुत्रत्वेन प्रशस्तो नारदनामा देवर्षिश्च । अहं । गन्धर्वाणां - मध्ये ।

उच्चैःश्रवसमश्वानां विद्धि मा ममृतोद्भवम् ।
ऐरावतं गजेंद्राणां नराणांच नराधिपम् ॥२७॥
आयुधाना महं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मिवासुकिः ॥२८॥

चित्ररथः । अहं । सिद्धानां - सिद्धिमतां ज्ञानिनाम्मध्ये । कपिलः - " ऋषिं प्रसूतं कपिलम्महान्त " मितिश्रुतिसिद्धोत्कर्षः कपिलनामा । मुनिः । अहम् ॥ २६ ॥

अश्वानां - मध्ये । अमृतोद्भवं । अमृतात् - मन्दरमथ्यमानात्समुद्र जलात्, उद्भवः - जन्म, यस्य तं तथोक्तं । जन्मतउत्कृष्टम् । उच्चै श्श्रवसं - उच्चैश्श्रवोनामकमिन्द्राश्वं । मां - विद्धि । गजेन्द्राणां - गज श्रेष्ठानां दिग्गजानाम्मध्ये । अमृतोद्भवमैरावतं - इन्द्रवाहनभूतं गजेंद्रं । मां । विद्धि । नराणां - मनुष्याणाम्मध्ये । नराधिपं - सर्व निर्वाहक त्वेनप्रसिद्धं प्रशस्तं राजानंच । मां । विद्धि ॥ २७ ॥

आयुधानां - सुदर्शननन्दकादि व्यतिरिक्ता र्वाचीनायुधानाम्मध्ये । वज्रं - पर्वतभेत्तृतया प्रशस्तं वज्रायुधं । अहं । धेनूनां - दोग्ध्रीणा म्मध्ये । कामधुक् - कामान् दोग्धीति कामधुक् - सकलकामितार्थ दोग्ध्रुतया प्रशस्तास्वधेनुः । अहं । अस्मि । प्रजनयतीतिप्रजनः - प्रजाजननहेतुतयाप्रशस्तः । कन्दर्पश्च - मन्मथश्च । अहं । अस्मि, तस्य प्रजाजननहेतुत्वरूपातिशयो मदधीनइत्यर्थः । सर्पाणां - एक शिरसां पन्नगानां मध्ये । वासुकिः समुद्रमथनरज्जुतया ऽत्रस्थि तो वासुकिंनामासर्पः । अहं । अस्मि ॥ २८ ॥

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमाचास्मि यमस्संयमतामहम् ॥२९॥
प्रह्लादश्चास्मिदैत्यानां कालःकलयतामहम् ।
मृगाणांच मृगेंद्रोहं वैनतेयश्च पक्षिणाम् ॥३०॥
पवनः पवतामस्मि रामःशस्त्रभृतांवरः ।
झषाणां मकरश्चास्मि स्रोतसामस्मिजाह्नवी ॥३१॥

नागानां – बहुशिरसां पन्नगानाम्मध्ये । अनन्तः – भगवत्तल्पतया फणासहस्रधृत धरणीमण्डलतया च प्रशस्तशेषनामकोनागश्च । अहम् । अस्मि । यादसां - जलजन्तूनां, पतित्वेन प्रशस्तः । वरुणश्च । अहम् । पितॄणां - अग्निष्वात्तादीनाम्मध्ये । पितृराजत्वेन प्रसिद्धः प्रशस्तः, अर्यमाच । अहम् । अस्मि । संयमताम् – संयच्छतां, दण्डयताम्मध्ये । यमः – वैवस्वतः । अहम् ॥ २९ ॥

दैत्यानां - दितिसुतानाम्मध्ये । साधूपमानत्वेन प्रसिद्धः, प्रह्लादश्च । अहम् । अस्मि । कलयतां – परानर्थसमयप्रतीक्षाणाम्मध्ये । कालः - मृत्युः । अहम् । मृगाणां - हरिणादीनाम्मध्ये । मृगेन्द्रः - सिंहश्च । अहम् । अस्मि । पक्षिणाम्मध्ये । वैनतेयः-वेगातिशय वेदमयत्वादिनोत्कृष्टः, गरुडश्च । अहम् । अस्मि ॥३०॥

पवतां – सततगमनशीलानाम्मध्ये । पवनः - तारकाद्यजस्र परिभ्रमणहेतुत्वेन प्रशस्तोवायुः । अहम् । अस्मि । शस्त्रभृतां - शस्त्रधारिणाम्मध्ये । रामः - परशुरामस्यापिजेता रावणान्तकोरामः । अहम् । अस्मि । अत्ररामगतशस्त्रभृत्त्वमात्र विभूतिः, रामशब्दवाच्यस्य भगवद्विभूतितायोग्यस्य चेतनस्याचेतनस्य वा नस्त्व

सर्गाणामादिरन्तश्च मध्यंचैवाहमर्जुन ।
अध्यात्मविद्याविद्याना वादःप्रवदतामहम् ॥३२॥

अक्षराणामकारोस्मि द्वन्द्वः सामासिकस्यच ।
अहमेवा क्षयःकालो धाताहं विश्वतोमुखः ॥३३॥

न्तरस्यासम्भवादिति बोध्यम् । झषाणां - मत्स्यानाम्मध्ये । मत्स्य राजतयाप्रसिद्धः, मकरश्च । अस्मि । स्रोतसां - प्रवाहाणाम्मध्ये । जाह्नवी - विष्णुपादोद्भवत्व सर्वज्ञशिरोधृतत्व त्रैलोक्यप्रवृत्तत्वादिभि रतिशयितागंगा । अहम् । अस्मि ॥ ३१ ॥

हे- अर्जुन । सृज्यन्त इति सर्गाः - सर्वदेशकालवर्तिनः सृज्य पदार्थाः, तेषाम् । आदिः - तत्र स्रष्टृवर्गः । अन्तः - तत्र संहर्तृ वर्गश्च । मध्यं - तत्रपालयितृवर्गश्च । अहमेव । विद्यानां मध्ये । अध्यात्मविद्या - जीवपरमात्म याथात्म्यविद्या । अहम् । प्रवदतां - जल्पवितण्डादिकथांकुर्वताम् । वादः- तत्त्वनिर्णयाय प्रवृत्ताकथा । अहम् ॥ ३२ ॥

अक्षराणां- वर्णानाम्मध्ये । अकारः - अकारोवै सर्वावागिति सर्ववर्णोत्पादकत्वेन श्रुतिसिद्धोवर्णः । अहं । अस्मि । सामासिक स्य- समासानामव्ययीभावादीनां समूहस्सामासिकः, तस्य - सामासि कस्यमध्ये । द्वंन्द्वः- द्वंद्वाख्यस्समासश्च । अहम् । सहि सर्वप दार्थप्रधानत्वेन पूर्वोत्तरान्यपदार्थ प्रधानेभ्यस्समासान्तरेभ्य उत्कृष्टः । अक्षयः - आद्यन्तरहितः । कालश्च । अहमेव । विश्वतोमुखः -सर्वमुखः । धाता - सर्वस्रष्टाहिरण्यगर्भश्च । अहमेव ॥ ३३ ॥

मृत्युस्सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्चनारीणां स्मृतिर्मेधा धृतिःक्षमा ॥३४॥
बृहत्साम तथासाम्नां गायत्रीच्छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥३५॥

सर्वहरः - सर्वेषां प्राणिनां हरः । मृत्युः - यमकिंकरश्च । अहं- भविष्यतां - उत्पत्स्यमानानां । उद्भवश्च - उद्भवाख्यं कर्मच । अहं । नारीणाम्मध्ये । श्रीः - लोकमातृत्वेन नारीणामुत्तमालक्ष्मीः । अहं । कीर्तिः - कीर्तिनाम्नी । अहं । वाक् - वाङ्नाम्नीच । अहं । एतास्तिस्रो भगवदसाधारणशक्तयः । स्मृतिः - अनुभूतार्थ गोचराया धियो ऽधिदेवतापि । अहं । मेधा-धारणावत्याधियो ऽधिदेवतापि । अहं । धृतिः- सन्तोषः, धैर्यवा, तदभिमानिदेवताप्यहं । क्षमा - तितिक्षा - तदभिमानिदेवतापि । अहम् ॥ ३४ ॥

साम्नां - ऋगक्षरसंस्काररूपाणांगानानाम्मध्ये । बृहत्साम - "बृहच्च वा इदमग्रेरथन्तरंचास्तां वाक्चचैतन्मनश्चास्तां वाग्वैरथन्तरम्मनोबृह दि"त्यादि श्रुतिसिद्धोत्कर्षं बृहन्नामकं गानञ्च । अहं । छन्दसां - छन्दोविशिष्टमन्त्राणाम्मध्ये । गायत्री - वेदमातृत्वेन श्रुतिषु छन्दोविचित्यांच प्रपंचितोत्कर्षा गायत्र्याख्य छन्दोविशिष्टा चतुर्विंशत्यक्षरात्रिपदाऋक् । अहं । मासानां - द्वादशानाम्मध्ये । मार्गशीर्षः - वर्षगर्भाधानकालत्वात्, केशवादिषु द्वादशसु प्रथमस्य केशवस्य मासत्वात्, व्रतारम्भकालत्वाच्चोत्कृष्टो मार्गशीर्षाख्योमासः । अहं । ऋतूनां - षण्णाम्मध्ये । कुसुमाकरः - अनति शीतोष्णतया कोकिलालाप मलयमारुत विविध कुसुमवासनाभिश्च सर्वप्राणि सुखहेतुत्वात् - वसन्तादि

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोस्मि व्यवसायोस्मि सत्त्वं सत्त्ववतामहम् ॥३६॥
वृष्णीनां वासुदेवोस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥

ब्राह्मणोऽग्नीनादधीत- वसन्ते ब्राह्मणमुपनयीत – वसन्तेवसन्तेज्योति षायजेत " " वसन्ते दीक्षयेद्विप्रं " इत्यादि श्रौतस्मार्त कर्मानुष्ठान कालत्वेनावगतत्वाच्च प्रशस्तो वसन्तर्तुः । अहम् ॥ ३५ ॥

छलयतां - छलंकुर्वतां - क्रयविक्रयऋणसंगरादिव्यापारैः परस्परं वञ्चनंकुर्वतां, वञ्चनास्पदेषूक्तव्यापारेषु मध्ये । द्यूतं - अक्षदेव न छागचरणायुधयुद्धादि निर्जीवसजीवसमस्तद्यूतम् । अहं । तस्यानाया सेन धर्माविरोधेनच समस्तपरधनहरण साधनत्वेन प्रशस्तत्वादितिभावः । तेजः - पराभिभवनसामर्थ्यं – एषामस्तीति तेजस्विनः, तेषां सम्बन्धि । तेजः । अहं । जयशीलानां, जयः । अहं । अस्मि । तेजोजययो रुत्कर्षः स्फुटः । व्यवसायः- अध्यवसायनिष्ठेतियावत् , सः । अहं । व्यवसायोहि-" यथावैनिस्तिष्ठत्यथकरोतिनातिष्ठन् करोतिनिस्तिष्ठन्नेव करोतिनिष्ठात्वेव विजिज्ञासितव्ये" त्यादिनाऽव्यवधानेन प्रवृत्त्यादिहेतुतया ऽवगन्तव्यत्वात्प्रशस्तइति भावः । सत्त्वं - महामनस्त्वं, तद्वताम् । सत्त्वम् । अहम् ॥३६॥

वृष्णीनां - वृष्णिकुलजातानां पुरुषाणाम्मध्ये । वासुदेवः – वसुदेवसूनुः । तदीयानि – वसुदेवगृहेचतुर्भुजतया ऽवतरणं- शैशवएवपूतनाशकटयमळार्जुनकेशि बकप्रलम्बधेनुककाळियादिनिग्रहः -

दण्डोदमयतामस्मि नीतिरस्मिजिगीषताम् ।
मौनंचैवास्मिगुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥

सप्तरात्रंगोवर्धनोद्धरणेन गोपगोपीजनाना मिन्द्रकृतःश्मवर्षान्निवारणं - परलोकगतसान्दीपनिपुत्राहरणम् - इत्येवमादीन्यमानुषचेष्टितानि वासु देवशब्देन विवक्षितानि । तानि । अहं-मद्विभूतिभूतानि । धर्मिणस्तु रामस्येव स्वावतारत्वेन स्वविभूतित्वायोगादिति बोध्यम् । इदंचा र्जुनस्य सुविदितमेवनोपदेश्य मितिदृष्टांतार्थम् । एवंच - यथावृष्णी नांमध्ये वासुदेवोऽहं तथा । पाण्डवानां - पंचानांमध्ये । धनंजयः- दिग्विजयपूर्वक राजसूयार्थ धनाहरणेन देवतासार्वभौमसुतत्वेनमयैव सारथिना प्रवर्त्यमानरथकरथिकत्वेनच प्रशस्तोऽर्जुनस्त्वंच । अहं - मद्विभूतिः । मुनीनां - मननेनार्थ तत्त्वयाथात्म्यदर्शिना म्मध्ये । व्यासः - पाराशयः । अहम् । " सहोवाचव्यासः पाराशरार्य" इतिश्रुति प्रसिद्धासतमत्वरूपोत्कर्षः पाराशर्यः । कवीनां - विपश्चिताम्मध्ये उशना - शुक्रोनामकविरहं । सहि नीतिशास्त्रप्रवर्तकत्वात्प्रशस्तः ॥३७॥

दमयतां - नियमातिक्रमे यथाधिकारं सर्वस्वहरणादिरूपं दण्डं कुर्वतां, सम्बन्धी । दण्डः - निग्रहः । अहम् । सहि नियमाति क्रमजनितपापनिर्हरणेन पुरुषस्य नैर्मल्यापादकतया प्रशस्तः । जिगी षतां - जयेच्छूनां । नीतिः - जयोपायभूत सामाद्युपायप्रयोगकौशल रूपा । अहम् । तस्या जयहेतुत्वरूपो ऽतिशयस्स्पष्टः । गुह्यानां - गोपनार्हाणामर्थानां सम्बन्धिषु गोपनोपायेषु । मौनं - वाङ्मुद्रणं । अहम् । मौनेहि सति हृदिस्थितेषु रहस्यार्थेषु न कश्चिदपि प्रकटी

यच्चापि सर्वभूतानां बीजंतदहमर्जुन ।
नतदस्ति विनायत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥
नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एषतूद्देशतः प्रोक्तो विभूतेर्विस्तरोमया ॥ ४० ॥

भवति, उक्तिप्रत्युक्त्यादि निमित्तः कलहोपि परै र्न प्रसज्यत इति तस्यातिशयः । ज्ञानवतां - तत्त्वज्ञानवतां । ज्ञानं - तत्त्वज्ञानंच । अहम् । तद्धि - ज्ञानीत्वात्मैव मे मत मित्युक्तरीत्या भगवत्प्रीति विषयतापादनद्वारा मोक्षसाधनत्वादुत्कृष्टम् ॥ ३८ ॥

सर्वभूतानां - नित्यसृज्यमानानां नरतिर्यगादि सर्वावस्थावस्थि तानां प्राणिनां । यच्च - परोक्षमपरोक्षंच । बीजं - तत्तदुपादानका रणतया स्थितं द्रव्यं । अस्ति । हे अर्जुन ! तदपि । अहमेव । अहमादिश्चेत्यादिना नैमित्तिक प्राकृतसर्गोपादानादि सर्गाणां-आदि रन्तश्चेति नित्यसर्गे स्रष्टवर्गस्य चोक्तत्वादिह नित्यसर्गोपादान कारणमात्रं बीजमित्यनेन वक्तुं युक्तं । मया । विनाभूतं - शरीर तयान्वरनन्तुप्रविष्टम् । यत् । चराचरं - जंगमस्थावरम् । स्यात् । तद्वस्तु । नास्ति । सर्वमपि भूतजातं मया शरीरतयाऽधिष्ठित मेवेत्यर्थः । स्वव्यतिरिक्त वस्तुसत्तानिषेधपरत्वे - अहमात्मागुडा केशेत्याद्युपक्रमविरोधादेवमवयोजना न्याय्या ॥ ३९ ॥

निश्शेषवचना शक्यतां प्रागुक्तां स्मारयति (नेति) हेपरंतप । दिव्यानां - कल्याणानाम् । मम । विभूतीनां - नियाम्यवस्तूनाम् । अंतः - इयत्तालक्षणः - परिच्छेदः । नास्ति । एषः । विभूतेः । विस्तरतु । उद्देशतः - संक्षेपेण । प्रोक्तः ॥ ४० ॥

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेववा ।

तत्तदेवावगच्छत्वं मम तेजोंशसंभवम् ॥ ४१ ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितोजगत् ॥ ४२ ॥

इतिश्रीभगवद्गीतायांदशमोऽध्यायः ॥

एवंप्राधान्यत इत्युपक्रम्य प्रपंचितमुपसंहरति (यद्यदिति) विभूतिमत - नियाम्यवस्तु संपन्नम् । श्रीमत - कांतिमत ; निया म्यजनभरणोपयोगि धनधान्यसंपन्नंवा । ऊर्जितं - बलवत । वाश ब्दश्चार्थः । अधिकतयोत्तरोत्तर श्रीलाभायकल्याणारंभे षूद्युक्तमेवच । नतु कदाचिदप्युद्योगादु परतमित्यर्थः । यद्यत् - सर्वजन्तुजातम् । तत्तत् - सर्वम् । मम - सर्वगोचराभंगुराघटित घटकसामर्थ्यस्ये त्यर्थः । तेजोंशसंभवं - तेजसः - नियमनसामर्थ्यस्य , अंशः - लेशः , संभवः - कारणम् , यस्य तत्तथोक्तमेव । अवगच्छ- जानीहि । यथाशैलांदोळनसमर्थस्य चंडमारुतस्य तूलतृणधरणादिकं वेगलेशमात्रकार्यम् - तद्वदितिभावः ॥ ४१ ॥

एवं प्राधान्यत इत्युपक्रान्तमुपसंहृत्याथसंक्षेपा दप्याति संक्षेपेण प्रधानाप्रधान समस्तविभूतिसंग्रहमाह (अथवेति) अथवेत्यतिसंक्षेप रूप पक्षान्तरारम्भे । हे अर्जुन ! बहुना - पृथक्पृथक् उच्यमानेन- मया ऽविरतं कथ्यमानेन । तव - त्वयाच । पृथक्पृथक्-ज्ञाते न - अविरतं ज्ञायमानेन , एतेन - विभूतिविस्तरेण । किं-

साध्यं प्रयोजनं किं । अनन्तानां विभूतीनां पर्यवसानज्ञानरूपं प्रयोजनं न सिद्ध्यतीतिभावः । अहं । इदं- कार्यकारणोभयावस्थ स्थूलसूक्ष्म चिदचिद्वस्त्वात्मकं । कृत्स्नं । जगत । एकांशेन- एकेन - अत्यल्पेन, अंशेन - मन्नियमनसामर्थ्या युतायुतभागेन । अवष्टभ्य - यथास्थितिप्रवृत्त्यादिषु मत्संकल्पमतिलंघ्य स्वैरं नव्याप्रियेत-तथा ऽधिष्ठाय । स्थितः । एवं सग्रहेण जानीहीतिभावः ॥४२॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर मुनिविरचितायां बालबोधिन्यपराभिधानायां गीतार्थसंग्रहदीपिकायां

दशमोऽध्यायः ॥ १० ॥

श्रीरस्तु ।

अथैकादशोऽध्यायः ।

अर्जुन उवाच ॥

मदनुग्रहाय परमं गुह्य मध्यात्मसंज्ञितम् ।
यस्त्वयोक्तं वचस्तेन मोहोऽयं विगतोमम ॥ १ ॥
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

एवं भक्तियोगनिष्पत्तये तद्विवृद्धयेच स्वेतरसकल स्वभावविलक्षणेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवत स्सर्वात्मकत्वे सर्वस्य जगतस्तच्छरीरतया तदायत्तस्वरूपस्थिति प्रवृत्तित्वेच कथिते सति तच्छ्रुत्वा ऽऽस्तिक्यातिरेकात् – तत्तथैवेति निश्चित्य यथा श्रुताकारविशिष्टं भगवंतं साक्षात्कर्तुकामो ऽर्जुनआह ॥

मदनुग्रहाय – मम देहात्ममोहोपहतस्य, अनुग्रहाय – अनुग्रहं कर्तुम्; मदनुग्रहैक प्रयोजन परतयेत्यर्थः । परमंगुह्यं - अतिरहस्यं । अध्यात्म संज्ञितं - आत्मानमधिकृत्य प्रवृत्ततया ऽध्यात्ममितिसंज्ञा युक्तम् । यद्वचः - नत्वेवाहं जातुनासमित्यारभ्य - तस्माद्योगी भवार्जुन - इत्येतदन्तं वाक्यम् । त्वयोक्तं । तेनवाक्येन । अयं - आत्म विषयः । मम, मोहः - भ्रमः । विगतः - सवासनं विनाशितइत्यर्थः ॥ १ ॥

एवं प्रथमषट्कार्थस्सूचितः । अथसप्तमाद्यध्यायचतुष्टयोक्तमर्थ मनुवदति ।

हेकमलपत्राक्ष - पुण्डरीकदळामळायतेक्षण । हि - यस्मात् । भूतानां - देवमनुष्यादि समस्तजन्तूनाम् । त्वत्तः - परमात्मनस्सका-

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥
मन्यसे यदि तच्छक्यं मयाद्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

शात् । भवाप्ययौ - उत्पत्तिप्रळयौ । विस्तरशः - प्रपंचेन । मया । श्रुतौ । अव्ययं - काळतोविषयत स्संख्यातः प्रकर्षतश्चावधिरहितम् । माहात्म्यंच - शेषत्व एत्व सर्वाधारत्वं सर्वप्रवर्तयितृत्वादि रूप स्त्वन्महिमाच । विस्तरशः । श्रुतः । हिशब्दोत्र वक्ष्यमाण भगवद्रूप दिदृक्षाहेतुत्व मेतदर्थं श्रवणस्य सूचयति ॥२॥

हेपरमेश्वर - ईश्वरत्वेन प्रसिद्धानां ब्रह्मरुद्रादीना मपीश्वर । अति विश्वसनीयवचनो हि भवानिति भावः । आत्मानं - त्वाम् । यथा - येन प्रकारेण कल्याण गुणविभूति विशिष्टत्व रूपेण । आत्थ - ब्रवीषि । एतत् - त्वत्स्वरूपस्य त्वदुक्ताकार विशिष्टत्वं । एवं - इत्थं, सत्यमेव - नान्यादित्यर्थः । हेपुरुषोत्तम । आश्रितजने तादिष्टप्रदान विरोधिदोषदर्शनंहि कापुरुषलक्षणं, भवांस्तूत्तमपुरुषतया ऽऽश्रितवत्सलत्वेन तत्प्रत्यनीकाकारइति भावः । ते - तव । ऐश्वरं - ईश्वरासाधारणम् । रूपं - कल्याणगुण विभूति विशिष्टं विग्रहम् । द्रष्टुं - चक्षुषासाक्षात्कर्तुम् । इच्छामि - अभिलषामि । पूर्वश्लोकद्वये भगवता पूर्वमुक्तानामर्थानां यथावदनुवादेनार्जुनस्य कृतज्ञतासूचिता । अस्मिन् श्लोकेतु - एवमेतदिति भगवदुक्तार्थे विश्वासकथनादास्तिक्यं सूचितम् । द्रष्टुमिच्छामीति भगवदुक्ताकारविशिष्ट तद्रूप दिदृक्षाकथनाद्भगवत्कल्याण गुणविभूतिश्रवणोचितभक्तिविवृद्धि स्सूचिता ॥ ३ ॥

नन्वशक्यार्थ विषयिणीयं त्वदिच्छेत्याशंक्याह -

हेप्रभो । योगेश्वर - योगः - ज्ञानशक्त्याद्गुणयोगः, तस्य ईश्वर - निर्वाहक - गुणपरिपूर्णेत्यर्थः । तत - त्वत्स्वरूपम् । मयाद्रष्टुं

श्रीभगवानुवाच ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनिच ॥ ५ ॥

साक्षात्कर्तुम् । शक्यमिति । मन्यसेयदि - संकल्पयसिचेत् । ततः - त्वत्संकल्पाद्धेतोः । आत्मानं त्वत्स्वरूपम् । अव्ययं - गुणविभूति विग्रहेषु द्रष्टुमिष्टेष्वशेषं यथातथा । मे - शरणागतस्य मम । त्वम् । दर्शय । स्वयत्नेन द्रष्टुमिच्छतां हिदुष्करं त्वद्दर्शनम्, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्माविवृणुतेतनूं स्वामिति श्रुत्युक्तरीत्या स्वसंकल्पेन त्वमेवत्वां दर्शयितुं प्रवृत्तश्चेत्किं तत्रदौष्कर्यमिति भावः ॥ ४ ॥

एवं कौतूहलान्वितेन सहर्षगद्गदकण्ठेन पार्थेन प्रार्थितोभगवानाह॥

हे पार्थ । शतशः सहस्रशः - शतानि सहस्राणिच, परव्यूह विभवाद्यनन्तावस्थावंतीत्यर्थः । नानाविधानि - प्रत्येकं भूषणायुध लांछन भुजसंख्यादि नानाप्रकारवन्ति । दिव्यानि - अप्राकृतानि । नानावर्णाकृतीनिच - नाना - अनेकप्रकाराः, वर्णाः - शुक्लरक्तादि रूपाणि, आकृतयः - सुरनरतिर्यगादि समान संस्थानानिच, येषांतानि तथोक्तानिच । नानावर्णाकृतित्वंच वासुदेवादिषु चतसृषु मूर्तिषु युग भेदेन सितरक्तपीत कृष्णरूप परिवृत्तेः, अवतारांतरेषु च तत्तत्फला र्थिना मनुसन्धानात्तु गुणरूपत्वेना वस्थानाच्च द्रष्टव्यम् । मे मम । रूपाणि - विग्रहाणि । पश्य - वीक्षस्व । यथाद्रक्षयसि तथाकरिष्यामी त्यभिप्रायः, रागप्राप्ते ऽर्जुनस्य भगवद्दर्शने प्रवर्तनायोगात् । अथ शब्दोत्र कार्त्स्न्यपरः । अथपश्य - कार्त्स्न्येन पश्येत्यर्थः ॥ ५ ॥

पश्यादित्यान् वसून रुद्रानाश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥
इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८

हे भारत । आदित्यान् - द्वादश । वसून् - अष्टौ । रुद्रान् - एकादश । अश्विनौ - द्वौ । मरुतः - एकोनपंचाशतंवायून् । पश्य ममरूपे साक्षात्कुरु । इदं जगति प्रत्यक्षदृष्टानां शास्त्रदृष्टानांचान्येषामपि वस्तूनामुपलक्षणम् । तथा, अदृष्टपूर्वाणि - इतःपूर्वं सर्वेषु लोकेषु शास्त्रेषु चादृष्टानि । बहूनि । आश्चर्याणि । पश्य । दर्शनक्रियाया स्सकृदुक्तयैव चारितार्थ्ये ऽप्यदृष्टपूर्वाणा माश्चर्यतया प्राधान्येन दर्शनीयत्वज्ञापनाय पुनरुक्तिः ॥ ६ ॥

प्रदर्शयिष्यमाणे स्वकीयरूपेकृत्स्नस्य जगतो निबिडवृत्तिशंकां निवर्तयतुमाह –

हे गुडाकेश । अद्य - इदानीं । इह - मया प्रदर्शयिष्यमाणे । मम । देहे - एकस्मिन्विग्रहे । एकस्थं - एकस्मिन् संस्थितम् । सचराचरम् - जंगम स्थावरसहितम् । कृत्स्नं अशेषम् । जगत् । पश्य । किंच । अन्यत् - उक्तादन्यत् । यत् । द्रष्टुं इच्छसि । तदपि पश्येत्यन्वयः ॥ ७ ॥

त्वंतु । अनेनैव - परिमितविषयग्राहिणा इतरनिरपेक्षेण । स्वचक्षुषा - त्वदीयेन मांसचक्षुषा । मां - मदुक्ताकारविशिष्ट मप्रमेयम्मद्रूपम् । द्रष्टुम् । नशक्यसे - नशक्तोभविष्यसि , नमांसचक्षु रभिवीक्ष्ये

संजय उवाच ।

एवमुक्त्वा ततो राजन् महायोगेश्वरोहरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥
अनेकवक्त्रनयन मनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

तमितिश्रुतेरितिभावः । तुशब्देन - अहन्तु मद्रूपं दर्शयिष्यामीति व्यज्यते । ते - तव । दिव्यं - अप्राकृतं मद्रूपदर्शन समर्थम् । चक्षुः - नेत्रं । ददामि । तेन दिव्यचक्षुषा । मे - मम । ऐश्वरं - असाधारणम् । योगं - अनन्तकल्याण गुण विभूति विग्रहयोगम् । पश्य ॥ ७ ॥

एवं प्रतिज्ञाय ततः कृष्णः किं कृतवानिति पृच्छन्तं धृतराष्ट्रं संजयउवाच -

हे राजन् धृतराष्ट्र । राज्ञां खल्वद्भुतवृत्तांतनिवेदन मुचित मितिभावः । महायोगेश्वरः - महतां - अत्याश्चर्याणां, योगानां - कल्याणगुणविभूत्यादि योगानां, ईश्वरः - नियन्ता, स्वायत्तीकृत सकलाश्चर्य योगइत्यर्थः । हरिः - तन्मातुलसुतत्व प्रयुक्तवात्सल्याति रेकेण तत्सारथ्ये ऽवस्थायापि तद्विरोधि निर्हरणे व्याप्रियमाणो भगवान् कृष्णः । एवं - पश्यमेपार्थ रूपाणीत्यादि प्रकारेण । उक्त्वा । ततः - तदनन्तरं । पार्थाय - पृथायाःपितृष्वसुः कुन्त्याःपुत्रायार्जुनाय । परमं - निरतिशयं । ऐश्वरं - स्वासाधारणं । रूपं - विविधविचित्र निखिलजगदाश्रयविग्रहं । दर्शयामास - दिव्यचक्षुर्विषयं चकार ॥ ९ ॥

तद्रूपं कीदृशमित्यत्राह —

अनेकवक्त्रनयनं - अनेकानि - बहूनि, वक्त्राणि - मुखानि, नयनानि - नेत्राणिच, यस्यतथोक्तं । अनेकाद्भुतदर्शनं - अनेकाद्भुतं दर्शनं यस्यतदनेकाद्भुतदर्शनं - अनवधिकाश्चर्यतया दृश्यमानमित्यर्थः । अनेक

दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनम् ।
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखम् ॥ ११ ॥
दिविसूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदिभाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

दिव्याभरणं - अनेकानि - अनेकजातीयानि , दिव्यानि - अप्राकृततया स्वोचितानिच ; आभरणानि - किरीटकुण्डलादीनिभूषणानि , यस्यतत् - अनेकादिव्याभरणं । दिव्यानेकोद्यतायुधं - दिव्यानि - अप्राकृतानि , अनेकानि - नानाजातीयानि , उद्यतानि - आश्रितविरोधिनिरसनोन्मुखीकृतानिच , आयुधानियस्यतत् - दिव्यानेकोद्यतायुधं ॥ १० ॥ दिव्यमाल्याम्बरधरं - दिव्यानि - स्वोचितानि , माल्यानि - कुसुमस्रजः , अम्बराणि वस्त्राणिच - धरतीति दिव्यमाल्याम्बरधरं । दिव्यगंधानुलेपनं - दिव्यगंधानि - अप्राकृतसौरभाणि , अनुलेपनानि - चंदनकुंकुमकस्तूरिकादीनि , यस्यतत् - दिव्यगंधानुलेपनं । सर्वाश्चर्यमयं - आश्चर्यभूत सर्वतत्त्वाश्रयमित्यर्थः । देवं - द्योतमानं । अनंतं - कालत्रयवर्ति निखिलजगदाश्रयतया देशकालपरिच्छेदानर्हं । विश्वतोमुखं - विश्वदिग्वर्तिमुखं । अनेकवक्त्रेत्युक्तमेवात्र विव्रियतइत्यपौनरुक्त्यं । एतादृशंरूपं दर्शयामासेति पूर्वेणान्वयः ॥ ११ ॥

देवशब्दनिर्दिष्टस्य भास्वरत्वस्य निरतिशयत्वरूपं विशेषमाह —

दिवि - आकाशे । सूर्यसहस्रस्य - सहस्रशब्दोऽत्रानन्त्यवाची , अनन्तसूर्याणामित्यर्थः । भाः - कांतिः । युगपत् - एककालएव । उत्थिता - उदिता । भवेद्यदि । सा - भाः । तस्य - भगवतः । महात्मनः - महतोविग्रहस्य । भासः - तेजसः । सदृशी - समा । स्यात् । अभूतोपमेयं । असदृशं तत्तेज इत्यर्थः । अत्र भगवद्भास

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्त मनेकधा ।
अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥
ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृतांजलि रभाषत ॥ १४ ॥

प्रसाद लब्धदिव्यचक्षुषा संजयेनाप्येतद्रूपं दृष्टमिति प्रतीयते - कथ मन्यथा - इत्थं भगवद्विग्रहकांत्यतिशयवर्णन मुपपद्यते ॥ १२ ॥

तत्र - अनन्तायामविस्तारे ऽपरिमित तेजस्के अनन्ताश्चर्यमये । देवदेवस्य - मनुष्याणां देववद्देवानामपि ब्रह्मरुद्रादीनां द्रष्टुमशक्यस्य भगवतः । शरीरे - देहे । एकस्थं - एकदेशस्थितम् । अनेकधा - विविध विचित्र भोक्तृ भोग्यभोगोपकरण भोगस्थानादि बहुप्रकारैः । प्रविभक्तं - भिन्नम् । कृत्स्नं , प्रकृतिपुरुषात्मकंसर्वम् । जगत् । तदा - तस्मिन्काले । पाण्डवः । अपश्यत् - भगवत्प्रसादलब्ध तद्दर्श नानुगुण दिव्यचक्षुषा ददर्श ॥ १३ ॥

सः । धनंजयः - अर्जुनः । ततः - तस्मात् , अदृष्टपूर्व भगवद्दिव्य विग्रहदर्शनाद्धेतोः । विस्मयाविष्टः - विस्मयेन - आश्चर्येण , अद्भुत रसदायिना , आविष्टः - आक्रान्तः । अतएव , हृष्टरोमा - हृष्टानि - स्तब्धानि , रोमाणि , यस्य , तथोक्तस्सन् । देवं - एकदेशेनैव कृत्स्न जगदाश्रयभूतं स्वासाधारणं विग्रहं प्रदर्शयितार माश्चर्यैक निधिं तपन्तम् । शिरसा - किरीटितया जगद्विदितेन मूर्ध्नासह । प्रणम्य - दण्डवत्पुनः पुनर्भूतले पतित्वा । कृतांजलिस्सन् । अभाषत - उवाच ॥ १४ ॥

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थ मृषींश्च सर्वा नुरगांश्च दिव्यान् ॥ १५ ॥
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोनन्तरूपम् ।
नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १६ ॥

हे देव । तव । देहे - दिव्यविग्रहे । सर्वान् - कर्मजानाजानजांश्च समस्तान् । देवान् - द्वादशादित्यान् , त्रयस्त्रिंशतंवा । तथा . सर्वान् भूतविशेषसंघान् - प्राणिविशेषसमूहान् । अत्रविशेषोपादानं क्रिमि कीटदंश मशकादि क्षुद्रजन्तुव्यावर्तनाय , तत्संबन्धस्य हेयत्वादस्म दादि प्राकृतशरीर साधारणत्वाच्च । ब्रह्माणं - अण्डाधिपतिं चतुर्मुखम् । कमलासनस्थं - कमलासने - ब्रह्मणि , स्थितं , तन्मतेस्थितम् । ईशं - रुद्रम् । ईशपद व्यवधाना दासनपदवैयर्थ्याच्च कमलासनस्थमित्यस्य ब्रह्मविशेषणत्वा योगात ; नचेशपदमपि चतुर्दश भुवननियंतृवाचि तया ब्रह्मविशेषणं , ब्रह्माणमिति पुंलिंग ब्रह्मशब्देनैव चतुर्मुखा साधारणेन तस्यार्थतस्सिद्धेः ; ब्रह्मशब्दवद्द्रष्टव्य देवतांतर परत्वे स्वारस्यातिशयाच्च । दिव्यान् - प्राकृतसर्वविलक्षणान् । सर्वान् । उरगांश्च - वासुकितक्षक प्रमुखान्सर्पांश्च । पश्यामि ॥ १५ ॥

विश्वेश्वर - विश्वस्य - चिदचिदात्मकस्य जगतः , ईश्वर - अन्तर्व्याप्यनियन्तः । अनेन विश्वरूपत्व हेतु शरीरित्वमुक्तम् , अन्तः प्रविश्यनियन्ताहि शरीरीतिभावः । हे विश्वरूप - विश्वशरीर । अनेक बाहूदरवक्त्रनेत्रं , अनेकानि - बहूनि , बाहवः - भुजाः , उदराणि - कुक्षयः , वक्त्राणि - मुखानि , नेत्राणि - चक्षूंषिच , यस्यतंतथोक्तम् ।

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ता द्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

अनन्तरूपं - अनन्तानि - देशकालपरिच्छेद रहितानि, रूपाणियस्यतं त्वाम् । सर्वतः - समन्तात् । पश्यामि । त्वत्प्रसादल्लब्ध दिव्यचक्षुष्ट्वा दितिभावः । अनन्तरूपत्व मेवोपपादयति, (नान्तमिति) तव । अन्तं पुनः - उत्तरावधिन्तु । नपश्यामि । आदिं - पूर्वावधिंच । नपश्यामि । मध्यंच नपश्यामि । आद्यन्तो भयनिरूपणीयत्वान्मध्यस्य तयो रभावे मध्याभावो प्यर्थसिद्ध इत्यर्थः । भवत्प्रसादल्लब्धदिव्यचक्षुषो ममयोग्यानुपलंभा दादिमध्यांतास्तव तुरंगस्य श्रृंगवन्नविद्यंत इत्यव धारयामीति भावः ॥ १६ ॥

तेजोराशिं - तेजसां समूहरूपम् । सर्वतोदीप्तिमन्तं - सर्वत्रापि प्रभायोगिनम् । दीप्तानलार्कद्युतिं - दीप्तानां, अनलानां - अग्नीनां, अर्काणां - सूर्याणांच, द्युतिरिवद्युतिर्यस्यतं तथोक्तम् । अत्रबहुवचनां तयोरनलार्कपदयो रितरेतरयोग द्वंद्वाश्रयणाद् द्वंद्वावगते तरेतर साहित्यस्य विवक्षितत्वाच्च परस्परसहितयुगपद्दीप्यमानानेकाग्नि सूर्य समद्युतिरवंलभ्यते, तेनपूर्वं दिविसूर्यसहस्रस्येत्य सदृशत्व मुक्त्वा इहानलार्क सदृशत्वमुच्यत इति शंकाचनास्ति । अत्र द्युतिशब्देन किरणरूपं तेजउच्यते, अतो नदीप्तिमन्त मित्यनेन पुनरुक्तिः । अप्रमेयं - ईदृश इयानिति परिच्छेत्तुमशक्यम् । दीप्ता नलार्क द्युतित्वादेव, समन्तात् - सर्वतः । दुर्निरीक्षं - क्वाचिदपि, विग्रहप्रदेशे निरीक्षितुमशक्यम् । एवमदृष्टपूर्वरूप दर्शनेपि त्वदसा धारणै श्चिह्नैस्त्वां स मन्मातुलसुत एवायमिति प्रत्यभि जानामीति भावः ॥ १७॥

त्वमक्षरं परमं वेदितव्यं त्वमस्यविश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषोमतो मे ॥ १८ ॥

वेदितव्यं - 'द्वेविद्येवेदितव्ये पराचापराचे'ति मुण्डकोपनिषदादिषु वेदितव्यतयानिर्दिष्टम् । परमं - ' अक्षरात्परतः पर ' इत्युक्तरीत्या प्रकृतेः पराज्जीवादपि परम् । अक्षरं - 'अथपरा, ययातदक्षरमधिगम्यत ' इत्यादिश्रुतिप्रसिद्ध मक्षरशब्दवाच्यं वस्तु । त्वमेव, नान्यः । अस्य - प्रत्यक्षादि प्रमाणसिद्धस्य । विश्वस्य - जंगमाजंगमात्मकस्यजगतः । परं - अनन्याधारं । निधीयते ऽस्मिन्निति निधानम् - 'सर्वाधारं विष्णुसञ्ज्ञं धाम' त्युक्तरीत्या आधारभूतंवस्तु । 'एवमेवैताभूतमात्राः प्रज्ञामात्रास्वर्पिताः' 'आधारभूतं विश्वस्य' इत्याद्युक्त जीवव्यवच्छेदार्थः परशब्दः । त्वमेव । अव्ययः - 'तदव्ययंयद्भूतयोनिं परिपश्यन्तिधीराः ' ' अनन्तमव्ययंकविं ' इत्यादौ व्ययरहिततयोक्तः, स्वरूपतोगुणतोविभूतितश्च सततैकरूपइत्यर्थः । शाश्वतधर्मगोप्ता - शाश्वतस्य - नित्यस्य, धर्मस्य - शास्त्रचोदितस्य वर्णाश्रमोचित धर्मस्य, गोप्ता - एवमादिभिरवतारैरक्षकः । त्वमेव । ' धर्मसंस्थापनार्थाय संभवामि युगेयुगे ' 'यदायदाहिधर्मस्य ' इतिहि त्वयोक्तमिति भावः। सनातनः - शाश्वतश्च । पुरुषः - 'येनाक्षरं पुरुषं वेदसत्यं ' ' वेदाहमेतं पुरुषम्महान्तं ' ' परात्परंपुरुषमुपैति दिव्यम् ' इत्यादिषु ज्ञेयतयोपास्यतया प्राप्यतयाच श्रुतः पुरुषशब्दवाच्यः । त्वमेव । मे मतः - मयाज्ञातः, साक्षात्कृतइतियावत । अत्रश्लोके त्वमिति प्राचीनमांसचक्षुः प्रतिपन्नाकारानुवादः, अक्षरमित्यादितः दिव्यचक्षुर्लाभ साक्षात्कृताकारकथनं, पूर्वमांसचक्षुर्विषयभूतो यदुकुलतिलक स्त्वमेवेदानीं परविद्यावेदितव्याक्षरत्व समस्त जगदाधारत्व शाश्वतधर्मगोप्तृत्वाव्ययत्व पुरुषत्वे रौपनिषदाकारै र्भवत्प्रसादा त्साक्षात्कृतो ऽसीति भावः ॥ १८ ॥

अनादिमध्यांत मनंतवीर्य मनंतबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्रं स्वतेजसा विश्वमिदं तपंतम् ॥ १९ ॥
द्यावापृथिव्यो रिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

अनादिमध्यान्तं - उत्पत्तिस्थितिनाशरहितम् । 'नान्तं नमध्य' मित्यादिकं स्वरूपविषयम् , इदंतु विग्रहविषयमि त्यपौनरुक्त्यम् । अनन्तवीर्यं दस्यतमनन्तवीर्यं , वीर्यशब्दो ज्ञानबलादे रुपलक्षणार्थः, अनवधिकातिशय ज्ञान बलैश्वर्यवीर्यशक्तितेजो निधिमित्यर्थः । अनन्त बाहुं - अनन्ताः - असंख्येयाः , बहवः बाहूदरवक्त्रनेत्रम् , यस्यतं तथोक्तम् । पूर्वं बाहूदरादिनानात्वमात्र मुक्तं , अनेकेत्युक्तेः , इहत्वनन्ते त्युक्ते बाह्वादीनां संख्यानिवृत्तिरिति नपुनरुक्तिः । शशिसूर्यनेत्रं - शशिवत्सूर्यवच्च प्रसादप्रतापयुक्तानि नेत्राणि यस्यतम् 'रक्षांसि भीतानि दिशोद्रवन्ति सर्वेनमस्यन्ति च सिद्धसंघाः ' इतिवक्ष्यमाण रीत्या नमस्कारादि प्रवणेषु देवादिषु प्रसादः , तद्विपरीतेष्वसुर राक्ष सादिषु च प्रताप इति विभागः । दीप्तहुताशवक्त्रम् - ज्वलितकालानल वत्संहारोन्मुखानि वक्त्राणि यस्यतं तथोक्तम् । स्वतेजसा स्वस्य पराभिभवनसामर्थ्येन । इदम् । विश्वम् - जगत् । तपन्तं - अभि भवन्तम् । त्वा-त्वाम् । पश्यामि । यथोपदेशं साक्षात्करोमीत्यर्थः । शाखामूल बहुत्वेपि कांडैक्याद्वृक्षवद्बाहूदरादिभेदेपि भेदाक्तरहित कटिप्रदेशैक्यादिह रूपकयमिति मन्तव्यम् ॥ १९ ॥

एवं भूतं त्वांदृष्ट्वा देवादयोऽ ऽत्यंतभीता भवामइत्याह -

द्यावापृथिव्योरित्यत्र द्युशब्देनो परितनलोकालक्ष्यन्ते , पृथिवी शब्देनाधस्त नलोकालक्ष्यन्ते , तथाच - द्यावापृथिव्योः - चतुर्दशाना

अमी हि त्वा सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिःपुष्कलाभिः ॥२१॥

मपि लोकानाम् । इदम् । अन्तरं - अवकाशः । एकेन त्वया - अति महाविग्रहेण भवता । व्याप्तम् - आक्रान्तम् । सर्वाः दिशश्च व्याप्ताः । हे महात्मन् - अपरिच्छेद्य मनोवृत्ते । उग्रत्वादि वदयमप्येको भयहेतुरित्याशयः। इदम्- अनन्तायामविस्तारम् । अद्भुतं - अत्याश्चर्यम् । उग्रं - अतिकराळम् । तव, रूपं - विग्रहम् । दृष्ट्वा । लोकत्रयं - लोकानां- लोकवर्तिनां युद्धदिदृक्षया ऽऽगतानां देवासुरयक्षराक्षसादीनाम्, त्रयं अनुकूल प्रतिकूल मध्यस्थरूपं त्रितयम् । प्रव्यथितं - अत्यन्त भीतम् । अहंच प्रव्यथितः, 'दृष्ट्वालोकाः प्रव्यथितास्त थाह'मिति वक्ष्यमाणानुसारात् । हिशब्दः पूर्वार्धस्योत्तरार्धे प्रतिहेतुत्वंद्योतयति। युद्धदिदृक्षया ऽऽगतानां देवासुराणामप्यर्जुनस्येव भगवताद्दिव्यचक्षुः प्रदानात्समस्त जगदाश्रय भगवद्रूप साक्षात्कार उपपद्यते, देवादी नामपि दिव्यचक्षुः प्रदानन्तु, तेषामपि भगवद्रूप दिदृक्षासंभवा त्सर्वेषा मपि युगपदेव भगवद्दिव्यरूप दर्शनप्रापकप्राग्भवीय सुकृतविशेष परिपाकसान्निपाता दर्जुनाय सर्ववंद्यत्व सर्वभूतभयावहत्वादि स्वकीय निरंकुशैश्वर्य प्रकाशरूप प्रकृतोपयोगाच्चेति मन्तव्यम् ॥ २० ॥

अमी । सुरसंघाः - देवसमूहाः । त्वा - त्वाम् । विशन्ति - प्रवि शन्ति । अत्रेदं भगवत्प्रवेशनं 'यत्प्रयत्यंभि संविशन्ती'त्यादाविव नप्र ळयार्थं स्तुत्यादि समभि व्याहारात्, धार्तराष्ट्राणामिवासन्नोप संहा राभावाच्च, अपितु समीपागमन रूपसेवामात्रम् । सुरशब्दश्चात्रनदेव मात्रवाची, केचिद्भीता इतिधाष्टर्यरहितानां पृथगभिधानात् । येत्व द्भुत भगवद्रूप दर्शने प्यक्षोभ्यहृदया हर्षवन्त उत्कृष्टा ब्रह्मादयः, तइह सुरशब्देनोच्यन्ते । तथाच, अमीब्रह्माद्युत्कृष्ट देवसमूहास्समस्त जगदाश्रयत्व दवलोकनहृष्टमनस स्त्वत्समीप मागच्छन्तीत्यर्थः ।

रुद्रादित्या वसवो येच साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गंधर्वयक्षा सुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥
रूपंमहत्ते बहुवक्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वालोकाः प्रव्यथितास्तथाऽहम् ॥ २३ ॥

हिशब्दो ऽवधारणार्थः , त्वामेवेत्यर्थः । केचित ब्रह्मादिवद्भाष्टचे रहितादेवाः । भीताः - अत्यद्भुतोग्रभवदाकार विलोकन जनित भीतयः । प्रगताः , अंजलयः , येषान्ते प्रांजलयः बद्धांजलयश्चसतः । गृणन्ति-स्वज्ञानानुगुणं स्तुतिरूपाणि वाक्यान्यक्रममुच्चारयन्तीत्यर्थः । केचिदित्यस्य सामान्यविषयस्यापि सुरसंघविषयेष्व न्यतमविषयत्वं , केचिदिति पृथक्करणस्य समुदाय विशेषव्यपेक्षायां जात्यन्तरानुपादाना त्सुरसंघानां प्रस्तुतत्वात्सुर व्यतिरिक्तानां भीत्यापलायनस्य वक्ष्यमाण त्वेनभीताः प्रांजलयो गृणन्तीत्यस्यान्यथा नुपपत्तचाच । महर्षिसिद्ध संघाः महर्षिसंघाः - भृग्वादिगणाः , सिद्धसंघाः - सनकसनंदनादयः । स्वस्तीत्युक्त्वा - मंगळाशासनंकृत्वा । पुष्कलाभिः - समग्राभिः , त्वदनुरूपाभिरित्यर्थः । स्तुतिभिः - गुणप्रकर्ष व्यजंकोक्तिभिः । त्वाम् । स्तुवन्ति ॥ २१ ॥

रुद्रादित्याः - एकादशरुद्राः , द्वादशादित्याः । वसवः - अष्ट वसवः । साध्यानामकेचन देवयोनयः । विश्वे - विश्वेदेवाः ! अश्वि नौद्वौ । मरुतः - एकोनपंचाशद्वायवः । ऊष्मपाः - पितरः , ऊष्मभागा हिपितर इतिश्रुतेः । गन्धर्वयक्षासुर सिद्धसंघाश्च । ये सन्ति । तेस- र्वेच । विस्मिताः - आश्चर्याविष्टास्सन्तः । त्वामेव वीक्षन्ते ॥ २२ ॥

हे महाबाहो । बहुवक्रनेत्रं - बहुमुखनयनम् । बहुबाहूरुपादम् - बहवः बाहवः - भुजाः , ऊरवः , पादाश्च , यस्यतंतथोक्तम् । बहूदरं- बहून्युदराणि यस्यतम् । बहुदंष्ट्राकराळं - बह्वीभिः , दंष्ट्राभिः ,

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥

कराळ - अतिभीषणाकारम् । महत् - अपरिच्छेद्यम् । ते - तव । रूपम् । दृष्ट्वा । लोकाः - पूर्वोक्ताः प्रतिकूलानुकूल मध्यस्थभेदेन त्रिविधा युद्धदिदृक्षयाऽऽगताजनाः । प्रव्यथिताः - अत्यन्तभीताः । तथा । अहंच - येन तद्रूपदर्शनं प्रार्थितं, यदर्थमिदं रूपं भगवता ऽदर्शि, तादृशो हंच । प्रव्यथितः ॥ २३ ॥

हे विष्णो - सर्वव्यापिन् । नभस्स्पृशं नभः स्पृशतीति नभस्स्पृक्, तंतथा । अत्रनभश्शब्देन 'तदक्षरे परमेव्योमन्नि' त्यादि श्रुतिसिद्धस्त्रि गुणप्रत्यतीतश्शुद्धसत्वमयः परमाकाश उच्यते, नतुप्राकृताकाशः, तत्स्पर्शस्य 'द्यावापृथिव्योरिद मन्तरं हिव्याप्त' मिति पूर्वमुक्तत्वेन पुन रुक्तिप्रसंगात् । दीप्तं - तेजाराशितया सर्वदेशव्यापि प्रभायोगिनम् । अनेकवर्णं - अनेके, वर्णाः - सितरक्तपीतादयः, यस्यतं तथोक्तम् । व्यात्ताननं - व्यात्तानि - विवृतानि, जगद्ग्रसनोन्मुखतयाऽवस्थितानि, आननानि - मुखानि, यस्यतम् । दीप्तविशालनेत्रं - दीप्तानि - आश्रिता नाश्रितरूपविषयभेदेन सौम्यासौम्य दीप्तिमन्ति, विशाळानि - विपुळानि, नेत्राणि यस्यतम् । त्वां दृष्ट्वा । प्रव्यथितः - अत्यन्तभीतः, अन्तरात्मा - मनः, यस्यसः, प्रव्यथितान्तरात्मासन् । धृतिं - शरीर धारणम् । नविन्दामि - नलभे, प्रशिथिल सर्वावयवोभवामीत्यर्थः । शमं - मनस इन्द्रियाणां शांतिंच । नविन्दामि । व्याकुलीभवामी त्यर्थः । अत्रात्मशब्द निर्दिष्टस्य मनसोऽन्तरत्वम् 'तस्माद्वा एतस्मात्प्राण मयात्, अन्योन्तरआत्मा मनोमय' इति श्रुत्युक्तरीत्या ऽन्नमयप्राणमयापेक्ष याद्रष्टव्यम् । अचेतनेपि मनसि चेतनधर्मभीव्यपदेशश्चेतनत्वारोपेण भीत्यतिशयद्योतनार्थः ॥ २४ ॥

दंष्ट्राकरालानिच ते मुखानि दृष्ट्वैव कालानल सन्निभानि ।
दिशोनजाने नलभेच शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥
अमी हि त्वा धृतराष्ट्रस्य पुत्राः सर्वेसहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्र स्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

अवयवांतरेभ्यो मुखाना मतिभयंकरत्वं व्यंजयन्नाह –

दंष्ट्राकरालानि – दंष्ट्राभिः, करालानि- अतिभीषणानि । कालानल सन्निभानिच - कालानलस्य - प्रळयकालाग्नेः, सदृशानिच । तद्वत्सर्व संहारे प्रवृत्तानीत्यर्थः । ते- तव । मुखानि । दृष्ट्वैव । नतुत्वत्तः किंचिदुपमर्दं प्राप्येत्यर्थः । दिशः । नजाने- नवेद्मि । यासु दिक्षु स्थित्वात्वद्दर्शनेन स्वस्थोभवेयमित्यर्थः । यद्वा दिक्छब्दोगत्यन्तरपरः । दिशः- त्वदन्यागती नंजानइत्यर्थः । शर्मच- सुखंच ।- नलभे- नप्राप्नोमि । एवं स्वावस्थां निवेद्यपथोपदेशं साक्षात्कृत भगवदाकारानुवादपूर्वक मात्मन स्स्वस्थताम्प्रार्थयते 'प्रसीदे'ति । हेजगन्निवास? जगतां - सर्वेषां, स्वविग्रहैकदेशेन निवासभूत । देवेश - देवानां ब्रह्मादीनामपि महेश्वर । प्रसीद - यथाऽहं स्वस्थो भवेयम् तथामयिप्रसादंकुरु ॥ २५ ॥

एवं सर्वस्य जगतस्स्वाधीनास्थिति प्रवृत्तितां दर्शयता भगवता पार्थसारथिना राजवेषकंचुकितानां धार्तराष्ट्राणां पाण्डवेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतरणे स्वमनीषिते स्वेनैव करिष्यमाणे पार्थायदर्शिते सच पार्थोभगवतस्सर्वं स्रष्टृत्वादिक मैश्वर्यंच साक्षात्कृत्यास्मिन्नेव सर्वात्मनि भगवति धार्तराष्ट्रादीना मुपसंहार मनागतमपि तत्प्रसाद लब्धेन दिव्येन चक्षुषा साक्षात्कुर्वन्निदं धार्तराष्ट्रविषयं वचनमाह –

अमी । सर्वे । धृतराष्ट्रस्य । पुत्राः - दुर्योधनादयः । भीष्मः । द्रोणः । तथा । असौ । सूतपुत्रः - कर्णश्च । अव

वक्त्राणि ते त्वरमाणाविशंति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥ २७ ॥

निपालसंघैस्सहैव - दुर्योधनादि पक्षीये राजसमूहे सर्वै स्सहैव । अस्मदीयैः - अस्मत्पक्षीयैः । कैश्चित् । योधमुख्यैरपि सह । त्वा हि - त्वामेव । विशन्तीत्युत्तर श्लोका दनुषंजनीयम् । त्वय्येवप्र लीयन्त इत्यर्थः । नास्यश्लोकस्योत्तरश्लोके नैकवाक्यता, अत्रत्वेति भगवतः कर्मत्वेन निर्देशा दुत्तरश्लोके वक्त्राणां कर्मत्वेन निर्देशात् ॥ २६ ॥

तेषां भगवति प्रवेशं विवृणोति –

अमी - दुर्योधनादयः । त्वरमाणाः – सत्वरास्सन्तः । अनेन विशेषणेन धार्तराष्ट्राणा मपराध क्रौर्यातिशय मूलकं भगवता शीघ्र संहरणं व्यज्यते । दंष्ट्राकरालानि - दंष्ट्राभिः ,करालानि· विकृतानि । भयानकानि- भयंकराणि । ते-तव । वक्त्राणि-आस्यानि । विशंति, नाशायवक्त्रेष्वंतः पतन्तीत्यर्थः । केचित्- तेष्वन्यतरेराजानः । चूर्णितैः- भगवद्दन्तघातेन चूर्णीकृतैः । उत्तमांगैः - शिरोभिः । उपलक्षिताः । दशनान्तरेषु – त्वदीयदन्तावकाशेषु । विलग्नाः – सक्तास्सन्तः । संदृश्यन्ते ॥ अत्र पूर्वश्लोके 'अमीसर्वे धृतराष्ट्रस्य पुत्रास्सर्वै स्सहैवाव निपालसंघै'रिति पाठस्तु' श्लोकद्वय मेकवाक्यमेव । अयमेवपाठोयुक्तः शब्दाना माकर्षोत्कर्षादि क्लेशाभावादिति सएवादृतश्श्री भाष्यकारैः, पाठान्तरमपि दृश्यते व्याख्यातंच कैश्चिदिति तदपि व्याख्यातम् ॥ २७ ॥

धार्तराष्ट्रादीनां सत्वरं भगवद्वक्त्र प्रवेशे दृष्टांत द्वयमाह यथेत्यादिश्लोकद्वयेन –

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवा भिमुखा द्रवंति ।
तथा तवामी नरलोकवीरा विशंति वक्त्रा ण्यभिविज्वलन्ति ॥ १८ ॥
यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशंतिलोका स्तवापिवक्त्राणि समृद्धवेगाः ॥ २९ ॥

यथा । बहवः- भूयांसः । नदीनाम् । अम्बुवेगाः, वेगशब्दोऽत्रवेगवत्प्रवाहपरः , जलप्रवाहाइत्यर्थः । समुद्रंप्रत्येव । अभिमुखास्सन्तः । नाशाय । द्रवन्ति - गच्छन्ति । नदीनां नाशोनाम पृथग्भूत प्रवाहाकार त्यागः । तथा । अमी । नरलोकवीराः- नरलोके - मनुष्यलोके, वीराः- योधाः, राजानइत्यर्थः । स्वयमेवत्वरमाणाः । अभिविज्वलन्ति- अभितो दीप्यमानानि । तव । वक्त्राणि । नाशाय । विशन्ति ॥ २८ ॥

यथा । पतंगाः- शलभाः । नाशाय- भस्मीभावाय । समृद्धवेगाः- सम्पूर्णवेगाः स्वयमेव त्वरमाणास्सन्त इत्यर्थः । प्रदीप्तज्वलनं- प्रदीप्तं- प्रकर्षेण दीप्यमानं, ज्वलनं - पावकम् । विशन्ति । पतंगादीनां प्रदीपादिषु पक्षवेगादिभि र्नाशकत्वस्यापि कदाचित्सम्भवात्तद्व्यवच्छेदाय प्रदीप्तविशेषणम् । तथैव । लोकाः- राजलोकाअपि । समृद्धवेगास्सन्तः । नाशाय- नाशंप्राप्तुम् । तव । वक्त्राणि विशन्ति । अत्र स्वेच्छया पुनर्निवर्तितुमशक्तत्वेन नदीप्रवाह दृष्टान्तः । नाशस्य स्वेच्छानुकूल व्यापारहेतुकत्वव्यंजनाय पतंग दृष्टान्तः । अपिच सर्वप्रवेशेप्य पूर्णत्वविवक्षया समुद्रनिदर्शनम् ॥ सहसाविध्वंसनाय ज्वलनोदाहरणम् ॥ २९ ॥

स्वयमेव त्वरमाणा इत्यनेन तत्संहरणे भगवतोऽत्यन्त निर्व्यापारत्व शंकां निराकरोति-

लेलिह्यसे ग्रसमान स्समंता ल्लोकान समग्रान् वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥
आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवंतमाद्यं नहि प्रजानामि तवप्रवृत्तिम ॥ ३१ ॥

समग्रान् - युद्धाय समवेतान्। लोकान् - राजजनान् । ज्वलद्भिः - दीप्यमानैः । वदनैः । ग्रसमानः - भक्षयन् । समन्तात् - सर्वतः । तद्रुधिरावसिक्तं सर्वमोष्ठपुटादि प्रदेशमित्यर्थः । लेलिह्यसे - कोप वेगेन जिह्वयापुनः पुनर्लेहनंकरोषि । हेविष्णो । उग्राः- अतिघोराः । तव । भासः- रश्मयः । तेजोभिः- स्वकीयप्रकाशैः । समग्रं- सर्वम् । जगत् । आपूर्य- आवृत्य । प्रतपन्ति- सन्तापयन्ति । ग्रसनार्थं पचन्तीत्यर्थः । संहरणे तत्तच्चेतनानां युद्धादि व्यापारविशेषोनिदानम् , तद्धेतुककोपादि विशिष्टस्तु भगवान् संहरतीति भावः ॥ ३० ॥

एवमत्यन्त घोराकारदर्शनं सोढुमशक्नुवन्नर्जुन स्स्वैश्वर्यप्रकाशन प्रवृत्तस्य भगवत एतादृश घोररूपाविष्कारे तात्पर्यकथनं पुनः प्रसन्नरूप परिग्रहार्थं प्रसादंच प्रार्थयते –

हेदेववर- ब्रह्मरुद्रादि समस्त देवता सार्वभौम । एतेन नमस्कार शेषित्वं व्यंजितम् । ते - तुभ्यम् । नमः । अस्तु । उग्ररूपः - अतिभयंकर विग्रहः । भवान् । कः । तवनिरंकुशैश्वर्यं साक्षात्कर्तु मर्थयमानस्य भक्तस्य मम घोररूपा विष्करणेकोवाऽ भिप्राय इति प्रश्नार्थः , उपदेश साक्षात्काराभ्यामेव स्वरूपेण भग वतः प्रतिपन्नत्वात । आद्यं - आदौ - सृष्टेः पूर्वं, विद्यमानं , स्रष्टारमि-त्यर्थः । अनेन स्वप्रार्थित भगवत्प्रदर्शित स्व साक्षात्कृत स्रष्टृत्वादि निरंकुशैश्वर्याणा मंशउक्तः । एवंविधं । भवन्तं - त्वाम् । विज्ञातुं- किंकर्तुं प्रवृत्तइति विशिष्यज्ञातुम् । इच्छामि - अभिलषामि । हि- यस्मात् कारणात् । तव । प्रवृत्ति - अभिप्राय विषयभूतं प्रयत्नम् ।

श्रीभगवानुवाच ।

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तु मिहप्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषुयोधाः ॥ ३२ ॥
तस्मात्त्वमुत्तिष्ठ यशोलभस्व जित्वाशत्रून् भुङ्क्ष्वराज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

न प्रजानामि । आख्याहि - अनेना भिप्रायेणेदं संहर्तृरूप माविष्कृत मित्युत्तरं ब्रूहि । प्रसीद - प्रसन्नरूपश्चभव ॥ ३१ ॥

एवं पार्थेन पृष्टो भगवान् पार्थसारथिः - त्व दुद्योगेन विनापि धार्तराष्ट्र प्रमुखा शेष राजलोकं संहर्तु महमेव प्रवृत्तइति तव ज्ञाप यितुं मम घोररूपा विष्करणं, तज्ज्ञापनं च त्वामुद्योजयितु मिति स्वा भिप्रायमाह "कालोस्मी"त्यादिना श्लोकत्रयेण ॥

लोकक्षयकृत् - लोकसंहर्ता । कलयति - गणयति, प्राणिना मायु रवसानमिति कालः - मृत्युः , तच्छरीरकः । अस्मि । अहम् । लोकान् - नृपजनान् । समाहर्तुं - आभिमुख्येन संहर्तुम् । अपरोक्षेण संहर्तुमित्यर्थः । अनेन भृत्यद्वारा शत्रुनिरसनव त्परोक्षसंहारो व्युद स्यते । प्रवृत्तस्सन् । इह कुरुक्षेत्रे । प्रवृद्धः - महता घोरेण रूपेण विजृम्भितः । अस्मि । अतः । प्रत्यनीकेषु शत्रुसेनासु । ये । योधाः - भीष्म द्रोणादियोद्धारः । अवस्थिताः । ते । सर्वे । त्वा - त्वाम् , त्वदु- द्योगम् । ऋते - विनापि । न भविष्यन्ति - मत्संकल्पादेव नष्टाभवि ष्यन्ति ॥ ३२ ॥

यदि मदुद्योगं विनापि धार्तराष्ट्रादयो नंक्ष्यन्ति - तर्हि किमर्थ म्मा मुद्योजयसी त्यत्राह –

तस्मात् - मत्प्रवृत्तेरेत दर्थत्वाद्धेतोः । त्वम् । उत्तिष्ठ , तैर्यो द्धुमिति शेषः । यशः - देवैरपि दुर्जया भीष्मादयोऽर्जुनेन निर्जिता

द्रोणंच भीष्मंच जयद्रथंच कर्णं तथान्यानपि योधवीरान् ।
मयाहतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

इत्येवं कीर्तिम् । लभस्व । शत्रून् । जित्वा - अयत्नेन निर्जित्य । समृद्धं - सर्वभोग्यादि सम्पन्नम् । राज्यम् । भुङ्क्ष्व । नन्वेवम्म मानृशंस्यभंगः - पापं च स्यात् , जयोप्य शक्य निश्चय इत्यत्राह (मयैवेति) एते - कृतापराधा धार्तराष्ट्रादयः । पूर्वमेव - त्वद्युद्धो द्योगात्प्रागेव । मयैव । निहताः - निहन्तुं संकल्पिताः । स्वसंक ल्पस्या मोघत्वा त्फल सिद्ध्यविनाभावेन निहता इत्युक्तिः । हेसव्य साचिन् - सव्येनापिकरेण , साचयितुं - शरसन्धानादिकं कर्तुम् , शीलमस्यास्तीति सव्यसाची , तस्य सम्बुद्धिः ; करद्वयेनापि योद्धुं समर्थ इत्यर्थः । भूभार निर्हरणार्थं तवेदृशं सामर्थ्यं मयासंकल्पित मिति भावः । निमित्तमात्रं - तेषा म्मत्कर्तृक हनने त्वं शस्त्रादिकरण स्थानीयः । भव । प्राधान्य व्यवच्छेदाय मात्र शब्दः । भगवानेवात्र शत्रुसंहरणे प्रधान कारणम् , अहन्तु तदुपकरण मित्यनुसन्दधानः पापनैर्घृण्य पराजय शंकां त्यजेति भावः । मद्भक्तस्य तव जय यशो राज्यलाभार्थं त्वदुद्योजनमिति श्लोक तात्पर्यम् ॥ ३३ ॥

अर्जुनस्या स्थान स्नेह कारुण्य धर्माधर्म भय मूलं - 'कथं भीष्म महं संख्ये ' इत्यादिकं साक्षात्प्रतिवदति -

मया - सर्वसंहर्त्रा । हतान् - हननाय संकल्पितान् । द्रोणम् । भीष्मम् । जयद्रथम् । तथा । कर्णम् । अन्यान् । योधवीरा नपि - योधश्रेष्ठानपि । त्वम् । जहि - हन्याः । मारितमारणे किं कारुण्यं का धर्मादि शंकेति भावः । ननु त्वया हननाय संकल्पि तानप्यादानीं जीवतो भीष्मादीन् कथं हन्यां, तथासति - मामयं लोको गुरुहन्ताबन्धुहन्तेति वक्ष्यति, एत ज्जयश्चाति दुर्लभ इत्यत्राह-

संजय उवाच ।

एतच्छ्रुत्वा वचनंकेशवस्य कृतांजलि र्वेपमानःकिरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतःप्रणम्य ॥ ३९ ॥

माव्यथिष्टाः - व्यथां माकृथाः । युद्धयस्व - स्ववर्णोचितं धर्मयुद्धं कुरु । रणे- युद्धे । सपत्नान्- आचार्य बन्धुरूपानपि प्रतिपक्षेतु प्रवेशेन शत्रुभूतान् । जेतासि - जेष्यसि । यदि द्रोणादीनुदासीनां स्त्वं हन्याः, तदातव लोकनिन्दास्यात्, प्रतिपक्षीभूय युध्यमानां स्तान् स्ववर्णोचितेन धर्मयुद्धेन निघ्नत स्तव लोकनिन्दागन्धः कश्चिदपि नास्ति । मदीयामोघसंकल्पेन तेषां मरणावश्यम्भा-वा जयोपि तवातिसुलभइति भावः ॥ ३४ ॥

एवमर्जुनाय भगवता स्वाभिप्राये कथिते तदनन्तरं किंवृत्त मिति धृतराष्ट्रेण पृष्टस्संजय उवाच -

किरीटी - अर्जुनः । केशवस्य - ब्रह्मरुद्रादेरपि नियन्तुर्भगवतः । एतत - स्वाभिप्राया विष्करणरूपं वचनम् । निशम्य । नमः - नम स्कारम् । कृत्वा । भीतभीतः - तद्रूपव त्तद्वचनस्यापि राजलोकसंहारा भिप्राय कथनरूपत्वेन भयजनकत्वा न्निरूपणाज्ञानेन पूर्वमेवभीतो वचनश्रवणा दतिभीतस्सन् । भूयएव । प्रणम्य - प्राणिपत्य । कृतां जलिः - संपुटीकृत करद्वयस्सन् । वेपमानः - कंपमानः । कृष्णं- आश्रित संसारकर्षणशीलं भगवन्तम् । सगद्गदं - गद्गदेन विकृत कण्ठस्वरेण सहितं यथातथा । आह ॥ अत्रनमस्कृत्वेत्यनेन स्वाभि प्रायावेदक भगवद्वचन श्रवणानन्तर मवश्यकर्तव्यः प्रथमनमस्कार उक्तः, भीतभीतस्य वक्ष्यमाणवाक्यप्रारंभार्थौ पुनःप्रणामांजली । केशवस्यैतद्वचन मित्यनेन - स्वयं सर्वस्मात्परोपि स त्रपेक्षामात्रेण

अर्जुन उवाच ।

स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यतेच ।
रक्षांसिभीतानि दिशोद्रवंति सर्वे नमस्यंतिच सिद्धसंघाः ॥ ३६ ॥

स्वविग्रहादि प्रदर्शनव त्स्वाभिप्रायाविष्करणमपि कृतवान् , अहो महदेतदाश्रितवात्सल्य मस्येति व्यज्यते । किरीटी नमस्कृत्वेति पदसंघट्टनया भगवच्चरणारविन्द संबन्धेन किरीट जुष्टं शिरः कृतार्थतां गतम् । अन्यथा " भारः परंपट्टकिरीटजुष्ट मप्युत्तमांगं नन मेन्मुकुन्दम् । " इत्याद्युक्तरीत्या तच्छिरसोभारमात्रंस्यादिति भावो व्यज्यते ॥ ३५ ॥

हे हृषीकेश । जगत् · युद्धदिदृक्षया ऽऽगत मनेकदेवगन्धर्वयक्ष विद्याधर किन्नर किंपुरुषादिरूपम् । तव । प्रकीर्त्या · त्वन्माहात्म्य प्रकीर्तनेन । प्रहृष्यति - प्रकृष्टंहर्षं प्राप्नोति । अनुरज्यतेच - अनु रागंचकरोति । त्वदानुकूल्येन त्वत्प्रसादविषयीभावादिति भावः । अत्र प्रहृष्यतीत्यनेन अतिथिलाभादिव तादात्विकप्रीति र्विवक्षिता , अनुरज्यत इतितु पित्रादिषु पुत्रादिवत्स्नेह इति न पुनरुक्तिः । रक्षांसि- राक्षसाः । भीतानि - त्वयिप्रातिकूल्येन त्वत्प्रतापविषयतया भया तुराणिसन्ति । दिशः । द्रवन्ति – पलायन्ते । दिश इति बहुवचनेन सर्वादिश इति लभ्यते । सर्वेषा मेकदिक्पलायने भगवदनुद्रवण शंकेतिभावः । वीक्षन्तेत्वामिति देववदसुराणामपि भगवद्रूपदर्शन सत्वाद्रक्षसां भयोपपत्तिः । सर्वे । सिद्धसंघाः - सिद्धाद्यनुकूलवर्गाः । त्वाम् । नमस्यन्तिच - प्रणमन्तिच । जगत्प्रहृष्यत्यनुरज्यतेच रक्षांसि दिशोद्रवन्ति सिद्धसंघानमस्यंति चेति, यत् - इदंसर्वम् । स्थाने - युक्तमित्यर्थः । अयंश्लोकः श्रीविष्णुपंजरादिषु विनियुक्तः प्रसिद्ध मन्त्रइत्याचार्याः ॥ ३६ ॥

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥
त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

युक्ततामेवोपपादयति —

हे महात्मन् - महाविग्रह । ब्रह्मणोपि - स्वेतरसमस्त देवजाते-र्मन्तव्यस्य हिरण्यगर्भस्यापि । आदिकर्त्रे - आदिभूतायकर्त्रे, उपादान निमित्तो भयकारणाय । ते - तुभ्यम् । कस्माच्च - हेतोः । ननमेरन्-ननमस्कुर्युः । ब्रह्मादय इतिशेषः । चकारेण कस्मान्नप्रहृष्येयुः , नानु रज्येरन् , कस्माच्च भीतानि रक्षांसि नद्रवेयुरिति समुच्चीयते । ब्रह्मा पेक्षया ऽऽदिकर्तृत्व मुपपादयति (अनन्तेति) हेअनन्त - अपरिच्छिन्नस्व रूप । देवेश - देवानामपि नियन्तः । जगन्निवास - जगति निवासोय स्येति विग्रहः, जगदाधारत्वस्योत्तरश्लोके प्रतिपादितत्वात् । सत् - असत् – 'असद्वाइदमग्र आसीत्ततोवै सदजायते' त्युक्तरीत्या भावविकार योगितया कार्यावस्थं सच्छब्दवाच्यं , अभावविकार योगितया कार णावस्थ मसच्छब्दवाच्यं , कार्यकारणभावेनावस्थितं प्रकृतितत्वम् । त्वमेव । तत्परं - तस्मात् - कार्यकारणोभयावस्था दचेतना त्तत्संसृष्ट चेतनाच्च , परं - उत्कृष्टम् । यत् । तदक्षरं - मुक्तात्मतत्वंच। त्वमेव ॥ ३७॥

नकेवलं प्रकृतिपुरुषात्मकतया त्वं चतुर्मुखस्यैव कारणभूतः , किन्तु कृत्स्नस्यापि जगतइतिवदन् पूर्वोक्त प्रकृतिपुरुषा दिसामानाधिकरण्ये निबन्धनमाह –

पुराणः – पुरापिनवः , सर्वदानूतन इत्यर्थः । पुरुषः – पुरिशयान इतिवा, पुरु - भूयिष्ठम् - सनोतीतिवा , पुरुषशब्दवाच्यः । यद्वा ' पूर्व

वायुर्यमोऽग्निर्वरुणश्शशांकः प्रजापतिस्त्वं प्रपितामहश्च ।
नमोनमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमोनमस्ते ॥ ३९ ॥

मेवाहमिहास्मिति तत्पुरुषस्य पुरुषत्वमि'ति श्रौतनिरुक्तिरीत्या पूर्वमप्यासीनइतिपुरुषः । त्वम् । आदिदेवः – आदिः – उपादानकारणं, देवः । अस्य - प्रत्यक्षादि प्रमाणसिद्धस्य । विश्वस्य - स्वशरीरस्यजगतः । परं– उत्कृष्टम् । आधारभुतं विश्वस्येत्युक्त जीवव्यावृत्त्यर्थः परशब्दः । निधानं – आत्मतया आधारभूतः । त्वमेव । अनेन त्व मक्षरमित्यादि सामानाधिकरण्यस्य पूर्वोक्तस्या त्मशरीरभाव एवनिबन्धनमित्युक्तं भवति । यद्वा – परंनिधानं – निधीयते - संहृत्यनिक्षिप्यते, ऽस्मिन्निति निधानं - लयस्थानमित्यर्थः ; त्वयाततंविश्वमित्यात्मतयाधारकत्वस्य वक्ष्यमाणत्वात् । अथवा परमक्षयं, निधानं - निधिः; यथानिधिः प्राणिनामभीष्टहेतुस्तथात्वमपी त्यनेनोच्यते । वेत्ता- ज्ञात्रात्मकः । त्वमेव असि । वेद्यं - ज्ञेयपदार्थजातंच । त्वमेव । परं - उत्कृष्टं । धाम – मुमुक्षूपास्यं वैकुण्ठादिस्थानंच । त्वमेव । अनन्तरूप - त्रिविधपरिच्छेदातीतस्वरूप । विश्वं - जगत् । त्वया । ततं– आत्मतया व्याप्तमित्यर्थः । सामान्यतोविशेषतश्च प्रवृत्तयोः पूर्वोत्तरसामानाधिकरण्ययो र्निबन्धनमात्म शरीरभाव एवेति तन्मध्यस्थितेनानेन विशेषणेनसूच्यते ॥ ३८॥

भगवता स्वप्रधान विभूतितयोक्तां स्तथैवसाक्षात्कृतान् पदार्थान् 'अहमात्मागुडाकेशे'ति तदुक्त्यैव तादात्म्यनिबन्धनेनात्म शरीरभावरूपेण तदात्मकतया नुवदन्नत्यद्भुताकार भगवद्दर्शन जनितसाध्वसावनतः साध्वसातिशयकृतं पौनः पुन्येन प्रणमनामित्यर्थं सूचयन्नाह –

'पवनः पवतामहं ' 'यमस्संयमतामहं ' 'वसूनां पावकश्चास्मि ' 'नक्षत्राणामहंशशी' 'धाताऽहंविश्वतोमुखः' इत्याद्युक्ताः पवनयमपाव

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥

कवरुण शशिप्रजापति प्रभृतयस्त्वमेव । इदं भगवत्प्रधानविभूतीनांसर्वासामप्युपलक्षणं । प्रपितामहश्च । त्वं । लोकस्यपितरः प्रजापतयः - प्रजापतीनामपि पिताहिरण्यगर्भ स्तासांपितामहः - हिरण्यगर्भस्यापि पितात्वं तासां प्रपितामहइत्यर्थः । यद्वा - प्रजानादि जनकजनकपरम्परायां प्रजा जनकजनकजनकपुरुषाश्च त्वामित्यर्थः । पूर्वं - 'त्वमक्षरं सदसत्तत्परंयदि'त्यादौ- 'अथवा बहुनोक्तेन किमि'त्यतिसंक्षेपोक्त पृथगुक्तव्यतिरिक्तविभूतिः स्थालीपुलाकन्यायेनोक्ता, इहतु - 'आदित्याना महंविष्णुर्ज्योतिषां रविरंशुमा' नित्यादि विवेचनीयं । अतएव 'त्वयाततं विश्वमनंतरूपे'ति 'सर्वंसमाप्नोषि ततोऽसि सर्व'इतिचोक्त वक्ष्यमाणा त्मशरीरभाव प्रतिपादक वाक्यद्वयस्य न पुनरुक्तिः । पूर्वंहि पृथगुक्त विभूतिसामानाधिकरण्य मुक्तम् , इदानीन्तु पृथगुक्तविभूति सामानाधिकरण्यनिबन्धनं । अतः सर्वात्मकस्य तवैव नमस्कार्यतोपपत्तेः । ते- तुभ्यं । सहस्रकृत्वः सहस्रसंख्याकावृत्तिमत् । नमोनमः - अनन्यार्ह नमस्कारः । अस्तु । पुनश्चभूयः - पुनरप्यधिकं, ततोप्यधिकमित्यर्थः । नमोनमोऽपि । अस्तु । प्रार्थनायां लोट् ॥ ३९ ॥

अथ दिग्भेदेन नमस्कारावृत्तिमाह –

सर्व - समस्तदेवतारूप । अस्यैव नमस्कार्यत्वोपपादकत्वा न्नमस्कार हेतुत्वाभिप्रायेणो पादानम् । ते - तुभ्यम् । पुरस्तात - अग्रे । नमः । अस्तु । अत्राद्वितीयमपि नमःपदमनन्यार्हत्व वाचकम् । अथ । तुभ्यम् । पृष्ठतः - पश्चात । नमः अस्तु । किंबहुना । ते - तव । सर्वतएव - सर्वास्वपिदिक्षु । नमोस्तु । सर्वात्मकत्वं किं स्वरूपेणेत्यत्राह – हे अनन्तवीर्य - अनन्तानवधिकातिशयज्ञान बलैश्वर्यादि गुणनिधे ।

सखेतिमत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥
यच्चावहासार्थ मसत्कृतोसि विहारशय्यासन भोजनेषु ।
एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४१ ॥

अमितविक्रमः – अमितपराक्रमस्त्वम् । सर्वं – तवशरीरतयाप्रमाण प्रतिपन्नं समस्तवस्तुजातं । समाप्नोषि – आत्मतया अन्तर्व्याप्नोषि । ततः - कारणात् । त्वम् । सर्वः - सर्वात्मकः । असि । सर्वेषां वस्तूनां त्वच्छरीरत्वे शरीरवाचकशब्दानां शरीरिपर्यन्तवाचकताया देव मनुष्यादि शब्देषु संमतिपन्नत्वा तन्न्यायेन सर्वेपि चेतनाचेतन वाचका श्शब्दास्त्वत्पर्यन्ताभिधायिन इति सर्वशब्दवाच्यत्वा त्त्वमेव सर्वइत्यर्थः । अत्रप्रथमान्त सर्वशब्दस्य चेतनाचेतनशरीरक भगवद्वाचितया सामाना धिकरण्योपपत्तिः, अन्यथाशरीर शरीरिणोरैक्याभावात् । द्वितीयां तु सर्वपदं शरीरतया निष्कृष्ट जगद्वाचि, भगवत्पर्यंतत्वे स्वस्यस्वेनैव व्याप्त्यनुपपत्तेः ॥ ४० ॥

भगवतः क्षमया निरसनार्ह मक्षमाविषयभूतं प्राकृतं स्वापराधवर्गं वदन् क्षमामर्थयते - "सखे"त्यादि श्लोकद्वयेन -

इमं – अनन्तवीर्यत्वा परिमित पराक्रमत्व सर्वान्तरत्व सर्व स्रष्टृत्वादि रूपम् । इदमिति पाठ लिंगव्यत्यय श्छान्दसः । तव । महिमानम् । अजानता । मया । प्रमादात् - मोहात् । प्रणयेन वापि - चिरपरिचयेनापिवा । सखेति – मम वयस्य इति मत्वा । हेकृष्णेति– 'कृषि र्भूवाचक श्शब्दोणश्च निर्वृति वाचक' इति निरुक्तं त्वां प्रति हे श्यामळांगेति । हे यादवेति- 'एक इद्राजा जगतो बभूवे' त्युक्तरीत्यो भयविभूति साम्राज्यवन्तं त्वां प्रति राज्यानर्ह यदुकुल प्रसूतेति । हे सखेति - स्वेतर समस्तवस्तुशेषिणं त्वां प्रति मदुपस

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव॥ ४३ ॥

र्जनभूत वयस्येति च सम्बोध्य । हे सखइति वक्तव्ये सखेति सन्धिरार्षः । प्रसभं - प्रसह्य । विनयापेतं यथातथा । यत् - वचनम् । उक्तं – जल्पितम् । हे अच्युत । सर्वदा सत्कारार्हस्त्वम् । अपहासार्थं - मातुल पितृष्वसृसुतयोः परस्परोचित परिहासार्थम् । विहार शय्यासन भोजनेषु - सहक्रीडा सहशयन सहोपवेश सहभोजनेषु । एकः - द्वितीय जनरहितः । अथवा । तत्समक्षमपि - द्वितीय जन सन्निधावपि । सत्समक्षमिति पाठे, सतां सन्निधावपीत्यर्थः । एकान्ते हि महतामपि परिहास श्शोभते - जनसन्निधौतु महत्सु परिहासवचन मत्यन्तानुचित मिति भावः । असत्कृतः - असत्कारं प्रापितः । असीतिच- यदस्तिममापराधजातम् । तत् - सर्वम् । अहं - आश्रिताग्रेसरः । अप्रमेयं - अपरिच्छेद्य गुणविभव माश्रितदोष भोग्यम् । त्वाम् । क्षामये - क्षमांकारयामि । सहविहारे भुजेन स्कन्धवेष्टनं सहशयने तदुपरि पादप्रसारणं सहासनेऽकनांक संघट्टनं सहभोजने स्वपात्रस्थ स्वादुतम व्यंजनादि प्रदानोद्यम प्रदर्शनमित्यादि रसत्कारोऽत्रविवक्षितः ॥ ४२ ॥

असत्कारानौचित्यं वदन् पुनरप्यपराध क्षमामेव प्रार्थयते– 'पितासी'त्यादि श्लोकद्वयेन -

अप्रतिमप्रभाव - अनुपमगुण विभव । त्वम् । अस्य - कृत्स्नस्य । चराचरस्य- जंगमाजंगम रूपस्य । लोकस्य । पिता - उत्पादकः । गरीयान् – गुरुतरः । पूज्यः - पूजार्हः । गुरुश्च - अज्ञातज्ञापन कृदाचार्यश्च । असि । लोकत्रयेपि - कृतकं - अकृतकं - कृतकाकृतकमिति त्रिविधेष्वपि लोकेषु । अन्यः- त्वदितरः । त्वत्समः-

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वा महमीश मीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

कारुण्यादिना केनापि निरतिशयगुणेन त्वत्सदृशः । नास्ति । त्वत्सदृशस्त्वमेवेत्यर्थः । मुक्तानां भोगसाम्य सद्भावेपि तद्भोगस्य प्रीतभगवत्प्रसाद मूलत्वेन सातिशयत्वान्न तत्साम्यम् । नित्यसिद्ध गुणानामपि भगवन्नित्येच्छाधीनत्वेन सातिशयत्वा त्तेषामपि न तः त्साम्यम् । अभ्यधिकः - त्वदपेक्षयाऽधिकस्तु । कुतः , न कुतोपि । अन्यस्त्व दधिकोनास्ति , त्वय्यपि न त्वदधिकत्व सम्भव इत्यर्थः ॥ ४३ ॥

तस्मात - सर्वस्य पितृत्वा त्सर्वस्य पूज्यतमगुरुत्वा त्स्वरूपगुण चेष्टितै स्सर्वाधिकत्वाच्च हेतोः । अहम् - अपराधैकभाजनभूतः । ईशं - जगन्नियन्तारम् । ईड्यं - जगत स्स्तोत्रार्हम् । त्वा - प्रणत वत्सलं भगवन्तम् । कायं - शरीरम् । प्रणिधाय- छिन्नमूलतरुमिव भूतळे प्रणिपात्य । प्रणम्य - प्रह्वीभूय । प्रसादये - प्रसन्नं प्रेर यामि । हे देव । पुत्रस्य - सम्बन्धिन मपराधम् । पितेव । सख्युः - मित्रस्य । अपराधम् । सखेव - मित्रमिव । प्रियाय - मह्यम् । प्रियः - मत्प्रीतिविषय स्त्वम् । तत्क्षामय इत्यत स्तदित्यनुषंजनीयम् । तत - अपराधजातम् । सोढुं - क्षन्तुम् । अर्हसि । यद्यपि प्रार्थनामात्रेण दिव्यचक्षुःप्रदानपूर्वकं स्वविश्वरूपं दर्शयतो भगवतः कोपप्रसंगाभावा त्प्रसादन मनपेक्षितम् , तथापि दिव्यचक्षुः प्रदानपूर्वक विश्वरूप प्रदर्शनस्य सापराधरक्षो सुरादि साधारण्यदर्शना त्प्रदर्शितस्य रूपस्य सापराध धार्तराष्ट्रादि राज लोक संहाराय प्रवृत्तत्वाच्च स्वापराधानु संधान भयेन प्रसादनमुचित मिति मन्तव्यम् ॥ ४४ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥
किरीटिनं गदिनं चक्रहस्त मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्त्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

प्राचीनरूपप्रदर्शनं सहेतुकमर्थयते -

हे देव । अदृष्टपूर्वं - पुरामयाकदाप्यदृष्टम् । इदं - रूपमित्यर्थ सिद्धम् । दृष्ट्वा - साक्षात्कृत्य । हृषितः - प्रहृष्टः । अस्मि । भयेन - तद्दर्शनजातेन । मे - मम । मनः । प्रव्यथितंच । अदृष्टपूर्वत्व भयानकत्वा भ्यां भयहर्षोभय जनकमिदं रूपमित्यर्थः । अतइदं रूपमुपसंहृत्य । मे - मह्यम् । तदेव - सौम्यतया हर्षैकजनकं मत्स्यंदनाभरणायमानं प्राचीनमेव देवकीवसुदेव नंदयशोदादितपः परिपाकरूपं सर्वचक्षुषा मपि सुनिरीक्षम् । रूपम् । दर्शय । हेदेवेश । ब्रह्मादि देवानामपीश्वर । जगन्निवास - निखिलजगदाश्रयभूत । प्रसीद - मयिप्रसादंकुरु ॥ ४५ ॥

तदेवरूपं विशेषयन्नाह -

तथैव - पूर्ववदेव । किरीटगदाचक्रादीना मस्मिन्नपि रूपे सत्त्वा त्तथैवेति विशेषणम् । एक किरीटादिमत्त्वं विवक्षितम् । इहतुमुखबाहु बहुत्वाद्बहवः किरीटादयः । किरीटिनं - किरीटवन्तम् । गदिनं - कौमोदकयाख्यगदायुक्तम् । चक्रहस्तं - सुदर्शनपाणिम् । पांचजन्यादीना मप्युपलक्षणमेतत् । त्वाम् । अहम् । द्रष्टुम् । हेसहस्त्रबाहो - सहस्रभुज । विश्वमूर्ते - सर्वजगच्छरीर । इदानीं सहस्रबाहुत्वेन विश्वशरीरत्वेनच दृश्यमान रूपेत्यर्थः । तेनैव-पूर्वसिद्धेनैव । चतुर्भुजेन-चतुर्बाहुना । रूपेण - विग्रहेण । भव - आविर्भव ॥ ४६ ॥

एवं प्रार्थितस्सन् तमर्जुनमाश्वासयन् भगवानाह "मये"त्यादि श्लोकत्रयेण -

भगवानुवाच ।

मयाप्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

न वेद यज्ञाध्ययनै र्न दानै र्नच क्रियाभि र्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

हे अर्जुन । मे- मम । यत्-रूपम् । तेजोमयं - तेजोराशि रूपम् । विश्वं - विविधविचित्र जगदात्मकम् । अनन्तं - आदिमध्यान्त रहितम् । आद्यम् - मद्व्यतिरिक्तस्य कृत्स्नस्य पूर्ववर्तिकारणभूत मित्यर्थः । त्वदन्येन - मद्भक्तात्त्वत्त इतरेणकेनापि । नदृष्टपूर्वंच - पूर्वं नदृष्टंच । इदम् । परं - निरतिशयोत्कृष्टम् । रूपं । प्रसन्नेन- त्वयिप्रसाद वता । मया - आश्रितवत्सलेन । आत्मयोगात्- आत्मनस्संकल्पयोगात कारणात । स्वप्रयत्नादिना कारणांतरेण द्रष्टुमशक्यत्वादिति भावः । तव । दिव्यचक्षुः प्रदानेन दर्शनविषयीकृतम् ॥ ४७ ॥

ऐकांतिक भक्तिव्यातिरिक्ते स्सर्वै रुपाये र्दुर्दर्शमिदं रूप मित्याह –

हे कुरुप्रवीर । शौर्यातिशयेनकुरुषुवीरः - तत्रापिमय्यैकान्तिक भक्तियोगेन प्रकृष्टवीर इत्याशयेन कुरुप्रवीरेति हेतुगर्भं संबोधनम् । एवंरूपः - एवं - इदानीं दिव्यचक्षुषस्तवैवं प्रदर्श्यमानाकारम्, रूपम्, यस्यसतथोक्तः । अहम् । नृलोके - मनुष्यलोके । त्वदन्येन - त्वत्त इतरेण, मद्भक्ति रहितेनेत्यर्थः । वेदयज्ञाध्ययनैः – वेदः – सांगसशि रस्कस्वाध्यायः, यज्ञाः – कल्पसूत्रादियज्ञविद्याः, तेषामध्ययनैः - ग्रहणधारणादिरूपै स्सर्वैरप्यध्ययनैः । द्रष्टुं नशक्यः । दानैरपि द्रष्टुम् नशक्यः । क्रियाभिश्च- अग्निहोत्रदर्शपूर्णमासादिभिःकर्मभिश्च । द्रष्टुं नशक्यः । उग्रैः – दुष्करैः । तपोभिः - कृच्छ्र चांद्रायणादिभि

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

संजय उवाच ।

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥

रपि । द्रष्टुं नशक्यः । अत्राध्ययनादीनां भक्तियुक्तत्वादिरहितानां केवलानां दर्शनसाधनत्वं प्रतिषिध्यते, नतुस्वरूपतः, तमेतंवेदानुवचनेनेत्यादि श्रुतिविरोधात् । शक्यअहमित्यत्र सन्ध्यभावआर्षः ॥ ४८ ॥

ईदृक् - ईदृशम् । घोरं - अतिभयंकरम् । इदं - इदानींप्रदर्शितम् । मम । रूपम् - विग्रहम् । दृष्ट्वा - तद्दर्शनपूर्विकेत्यर्थः । व्यथा - भयं । ते - तव । माभूत् । विमूढभावश्च - सूर्यदर्शनादुलूकस्येव वैक्लव्यंच । माभूत् । त्वम् । व्यपेतभीः - व्यपगतभयः । प्रीतमनाः - सन्तुष्टचित्तश्चसन् । तदेव - पूर्वंतवाभ्यस्तमेव । इदं - प्रदर्शयिष्यमाणम् । मे मम । रूपं - सौम्यंविग्रहम् । पुनः । प्रपश्य - नष्टलब्धमिव महामणिं प्रकर्षेणवीक्षस्व ॥ ४९ ॥

एवमुक्त्वा भगवानर्जुनाय प्राक्तनमेव रूपं प्रदर्शयामासेति संजयोधृतराष्ट्रं प्रत्याह –

वासुदेवः - वसुदेवसूनुः कृष्णः । तदा - प्रार्थनाकाले । इति- उक्तप्रकारेण । अर्जुनम् । उक्त्वा । भूयः - पुनरपि । स्वकं- स्वस्य वसुदेवसूनु त्वावस्थोचितमेव । रूपं- चतुर्भुजरूपम् । दर्शयामास । न केवलं तद्रूप प्रदर्शनमात्र मित्याह - किंच । महात्मा - महास्वभावः, स्वाश्रितो यथा यथा प्रार्थयते तथा तथाकरण स्वभाव इत्यर्थः । पुनः । सौम्यवपुः- सौम्य विग्रहः, भूत्वा । भीतं- अपरिचितासौम्य

अर्जुन उवाच ॥

दृष्ट्वेदं मानुषं रूपं तव सौम्य जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्यरूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥

विश्वरूप दर्शनात्तु भयाविष्टम् । एनं - अर्जुनम् । आश्वासयामास च- चतुर्भिरपि बाहुभि रंगाभिमर्शनेन तस्य भयमपाचकारे त्यर्थः । पूर्वं वाचिक माश्वासनम् , इदन्तु कायिकमिति मन्तव्यम् । वसुदेव सुनो श्चतुर्भुज मेवौत्पत्तिकं रूपम् , कंसात्तुबिभ्यतो वसुदेवस्य 'उपसंहर सर्वात्मन् रूपमेत च्चतुर्भुज' मिति प्रार्थनया ऽऽकंसवधात्तु भुजद्वय मुपसंहृतम् । पश्चात्पुनराविष्कृतम् । अत एवार्जुने नोक्तं तेनैव रूपेण चतुर्भुजेनेति ॥ ५० ॥

ततो निर्भयस्सन्नर्जुनउवाच

हे जनार्दन । इदं - अनवधिकातिशय सौन्दर्य सौकुमार्यादि कल्याण गुणशालि । मानुषं - मनुष्यसमान संस्थानम् । सौम्यं - प्रसन्नम् । तव । रूपं - विग्रहम् । दृष्ट्वा । इदानीं । सचेताः- प्रसन्नमनस्कः । संवृत्तः - जातः । अस्मि । प्रकृतिं - स्वस्थताम् । गतः - प्राप्तश्च ॥ ५१ ॥

स्वकृतानुग्रहस्या तिदुर्लभत्वं दर्शयन् श्री भगवानुवाच -

मम । यत् - विश्वात्मकं रूपम् । दृष्टवान् । असि । इदम् । रूपम् । सुदुर्दर्शं - अति दुर्लभ दर्शन मित्यर्थः । यतः । देवाः-

नाहं वेदै र्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधोद्रष्टुं दृष्टवानसि मां यथा ॥ १३ ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ १४ ॥

ज्ञान शक्त्यादि गुणै र्मनुष्येभ्योऽधिकतरा ब्रह्मादयोपि । अस्य । रूपस्य । नित्यं - अनवरतम् । दर्शन कांक्षिणः - दर्शनाभिलाषिणः । कांक्षामात्रमेव , नतु कदापि कांक्षितमे तद्रूप दर्शनं लब्धवन्तः इदानींतु त्वदनुग्रहाय प्रदर्शित मिदं रूपं प्रसंगानेपि दृष्टवन्त इति भावः । यद्वा सदा पश्यन्तीत्युक्तरीत्या नित्य दर्शनेपि नित्यं दर्शन साभिलाषा एव भवन्ति , नतु सकृद्दर्शन मात्रेण तृप्यन्तीति भावः ॥ ५२ ॥

ननु कथं देवानाम प्येतद्रूप दर्शन दौर्लभ्यम् , ते हि वेदानु वचन यज्ञ दान तपः प्रभृति भगवद्दर्शन साधन सामग्री सम्पन्ना इत्यत्राह -

यथा - मनुष्यत्वादि प्रमानर्हणाप्राकृतेन येनाकारेण विशिष्टम् । माम् । दृष्टवान् - मद्दत्तेनदिव्यचक्षुषा ऽध्याक्षितवान् । असि । एवंविधः - तदाकारविशिष्टः । अहम् । वेदैः - अध्ययनाध्यापन श्रवणजपाविषयैः केवलैस्स्वाध्यायैः । द्रष्टुम् नशक्यः । दानेन , केवलेन । द्रष्टुम् । नशक्यः । तपसा - केवलेन कृच्छ्रचांद्रायणादिना । द्रष्टुम् । नशक्यः । इज्ययाच-केवलेनयोगेनच। द्रष्टुम् नशक्यः। अत्रकेवलानामेव वेदादीनां दर्शनसाधनत्वनिषेधः , भक्त्यं गतापन्नेन स्वरूपेणतु तेषां दर्शनसामग्र्य नुप्रवेशस्य श्रुतिसिद्धत्वादित्युक्तं प्रागेव ॥ ५३ ॥

तर्हिकेनोपायेन द्रष्टुं शक्यइत्यत्राह -

हे अर्जुन । परंतप - नामश्रवणमात्रेण शत्रुसंतापकर । एवंविधः - विश्वरूपः । अहम् । अनन्यया - अनन्यदेवताकया , अनन्यप्रयोजन

मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः समामेति पांडव ॥ ५५ ॥

इति श्रीभगवद्गीतायां एकादशोध्यायः ॥

यावा । भक्त्यातु । ज्ञातुं - शास्त्रतो ऽवगन्तुम् । द्रष्टुं - साक्षात्कर्तुम् । प्रवेष्टुं - प्राप्तुंच । शक्यः । नकेवलं साक्षात्कारमात्रे साधनत्वेन भक्तिरपेक्षिता , किंतु 'शुद्धभावं गतोभक्त्या शास्त्राद्वेद्मि जनार्दन' मित्युक्तरीत्या साक्षात्कार पूर्वभाविनि शास्त्रार्थनिर्णये तदनन्तरभाविन्यां प्राप्तौचेत्यभिप्रायेण ज्ञातुंप्रवेष्टुं चेत्युभयमपि पूर्वश्लोकाप्रसक्त मिह प्रसंजितम् तत्त्वेनज्ञातुम् तत्वेनद्रष्टुम् तत्त्वेनप्रवेष्टुंचेति । तत्त्वतः प्रवेशोहिनाम परिपूर्णप्राप्तिः, यथावस्थित सर्वाकारेणानुभव इत्यर्थः , तेनव्यूह विभवादिमात्रप्राप्ति र्व्यवाच्छिद्यते । स्मर्यतेहि साक्षान्मुक्तेरर्वाचः प्राप्तौ पर्वभेदाः " लोकेषु विष्णोर्निवसन्ति केचित्समीप मृच्छन्तिच केचिदन्ये । अन्येतुरूपं सदृशं भजन्ते सायुज्यमन्ये नतुमोक्षमेतुम् ॥ " इति ॥ ननुतत्त्वज्ञानस्यापि भक्तिसाध्यत्वे तत्त्वज्ञान साध्याभक्तिः - भक्तिसाध्यंच तत्त्वज्ञानं- इत्यन्योन्याश्रय इतिचेन्न ;-भक्ते र्ज्ञानादि हेतुत्वेपर्वभेदात् । पूर्वजन्मसुकृतविशेष कारितसात्त्विक जनसंवादादिजनितं यथावच्छ्रवणानुगुण किंचिदानुकूल्यरूपं भक्ति मात्रं शास्त्रजन्यज्ञानोत्पत्तौ सहकारिभवति , उत्कटदिदृक्षागर्भातु पर भक्तिस्साक्षात्कारहेतुः , साक्षात्कृतेतु परिपूर्णानुभवाभिनिवेशलक्षण परमभक्ति र्हेतुरितिहिभक्तेः पर्वभेदाः ॥ ५४ ॥

नाहं वेदैरित्यादेः - तमेतं वेदानुवचनेनेत्यादि श्रुतिविरोध परिहाराय भक्त्यंगभावेन वेदानुवचनादीना मुपयोगंवदन् - प्रवेष्टुमित्युक्त प्राप्तिहेतुभक्त्यवस्थाविशेषं विवेचयति - (मत्कर्मेति)

हे पांडव । मत्कर्मकृत - अत्र नाहंवेदैरित्याद्युक्तानि वेदानुवचनादि कर्माण्येव भगवतिसमर्पितानि मत्कर्मशब्देन विवक्षितानि , तानिकरोतीति मत्कर्मकृत । मत्परमः - कर्मणःप्रसंगा त्साध्यं फलमिहबुद्धिस्थं परमशब्दविवक्षितम् , अहमेव - परमं - सर्वारंभफलं यस्यसतथोक्तः । मद्भक्तः - अत्रभजतिना भक्त्यंतर्गतानि कीर्तनस्तुतिध्यान प्रणामार्चनादीनि विवक्षितानि , लौकिक इवान्नपानादिभिर्मत्कीर्तनादिभिर्विना ऽऽत्मधारण मलभमान स्तदेकप्रयोजनतया कीर्तनादिरूप मद्भजनकृदित्यर्थः। संगवर्जितः-संगेन मदितरासक्त्या,वर्जितः त्यक्तः। मदितरसंगं तृषितस्या स्वाद्यमाना मृतधारायां तृणादिविरोधसदृशम्मन्यमानः ; संगएवैनं विरक्तं यथा वर्जयेत - तथा संगे जातोद्वेग इत्यर्थः । सर्वभूतेषु - सर्वजन्तुष्वपि । निर्वैरः - न केवलमपरिपक्व भक्तेरिव शास्त्र वश्यत्व कृतेयं निर्वैरता - अपितु भक्तिकाष्ठाप्राप्त्या वैरनिमित्ताभाव कृता ; विषयान्तर संश्लेष विश्लेषैकस्वभावत्वं स्वदुःखस्य परापराधनिमित्तत्वानुसन्धानम् भूतानां च परम पुरुष नियमनं विनापि किंचित्करत्व भ्रमः इत्येतानि हि भूतेषु वैरनिमित्तानि ; भक्ति काष्ठां प्राप्तस्यास्य मत्संश्लेष विश्लेष सुख दुःखैकस्वभावत्वात् स्वदुःखस्य प्रारब्ध रूपत्वा पराध मूलकत्वा नुसन्धाना त्सर्व भूतानां परमपुरुष पारतन्त्र्या नुसन्धानाच्चोक्त वैरनिमित्ताभावः । एवं भूतः । यः पुरुषधौरेयः । सः । माम् । एति- सवासन निवृत्त समस्त मदनुभव प्रतिबन्धको यथावस्थित सकलाकारेण मामनुभवतीत्यर्थः ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

एकादशोऽध्यायः ॥ ११ ॥

श्रीरस्तु ।

अथद्वादशोऽध्यायः ।

अर्जुन उवाच ॥

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
येचा प्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १

एवं भगवता भक्तियोग प्राप्यस्य स्वस्य परब्रह्मणो यथाव स्थितं निरं कुशैश्वर्यं दिदृक्षवेऽर्जुनाय प्रदर्शित तज्ज्ञान दर्शनप्राप्तीना मैकान्तिकात्यन्तिक भक्ति लभ्यत्व मुक्तम् । अथा त्मप्राप्ति साधन भूता दात्मोपासना द्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्य निष्पादने शैघ्र्यं भगवदुपासनोपायः - तद शक्तस्या त्मनिष्ठता वदपेक्षिताश्चो-च्यन्ते । तदुक्तं गीतार्थसंग्रहे - " भक्तेश्शैघ्र्य मुपायोक्ति रशक्तस्या त्मनिष्ठता । तत्प्रकारा स्त्वतिप्रीतिर्भक्ते द्वादश उच्यते ॥ " इति ॥

एवं - मत्कर्म कृदित्या द्युक्तप्रकारेण । सततयुक्ताः-त्वया सतत योगमेव सर्वारम्भ फल म्मन्वानाः । ये । भक्ताः । त्वां । पर्युपासते-अनवधिकातिशयानन्त कल्याण स्वरूप गुण विभूतिभिः परिपूर्ण मुपासते । किंच । येपि । अव्यक्तं - चक्षुरादिकरणै रनभिव्यक्तम् । अक्षरं - प्रत्यगात्म स्वरूपम् । उपासते । तेषां - उभयेषा मुपासकानां । अव्यक्त शब्दस्या क्षरशब्द समभिव्याहृतस्या चिद्विशेष प्रसिद्धि प्राचुर्या - अत्र यच्छब्दत्रयाभावा दुत्तरेचा व्यक्ताक्षर शब्दयो र्विशेषण विशेष्यभावव्यक्ते श्चो पास्यत्रय परत्वा नौचित्यात- " पंचविंश म व्यक्तं षड्विंशः पुरुषोत्तमः । एतज्ज्ञात्वा विमुच्यन्ते यतयश्शान्त बुद्धय " इति यमस्मृतिवचने पुरुषोत्तमादर्वाचीन एवा

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेता स्ते मे युक्ततमा मताः ॥ १ ॥
ये त्वक्षर मनिर्देश्य मव्यक्तं पर्युपासते ।
सर्वत्रग मचिन्त्यंच कूटस्थमचलं ध्रुवम् ॥ ३ ॥

व्यक्तशब्दप्रयोगा च्चा क्षरशब्द विशेषणत्व मेवा व्यक्तशब्दस्येति बोध्यम् । मध्ये । के । योगवित्तमाः - युज्यत इति योगः - प्राप्य, तं - विन्दन्ति - लभन्ते, इति योगविदः, अतिशयितायोगविदः योग वित्तमाः ; अतिशयश्च प्राप्तौ शैघ्रयम् ; - अचिरेण स्वसाध्यगामिन इत्यर्थः । अतएव - भवामिनचिरात्पार्थे त्युत्तरत्र शैघ्रयविषयमेव योगवित्तमत्वं व्यंज यिष्यते ॥ १ ॥

ये - उपासकाः । मनः - प्राप्यविषयकं चेतः । मयि आवेश्य - मदेक प्रियत्वेन मय्येव निवेश्य । परया - उत्कृष्टया । श्रद्धया - त्व रापर्यवसन्नयाऽऽस्तिक्य बुद्ध्या । उपेताः । नित्ययुक्ताः - मया नित्य योग माकांक्षतश्चसन्तः । माम् । उपासते । ते । युक्ततमाः- सुख मचिरा त्स्वसाध्यभूत मत्प्राप्त्ततयाऽ तिशयिता इति । मे । मताः - सम्मताः ॥ २ ॥

एवं भगवन्निष्ठस्य श्रैष्ठ्य मुक्त्वाऽ थाक्षर निष्ठस्या पकर्षमाह- " येत्वक्षर " मित्यादि श्लोकद्वयेन-

येतु - उपासकाः । अनिर्देश्यं - देहादि विलक्षणतया देहादि वाचकै र्देवादि शब्दै निर्देष्टुमनर्हम् । अतएव । अव्यक्तं - देहादि स्थूलाचिद्वस्तुग्राहकै श्चक्षुरादिकरणै रनभिव्यक्तम् । सर्वत्रगं । सर्वत्र - देवादिदेहेषु, वर्तमानम् । सर्वत्र पन्नयोश्चेति गमे डप्रत्ययः -

सन्नियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥

अचिन्त्यं - देवादि देहेषु विद्यमानत्वेपि तद्विसजातीयतया तेन तेन रूपेण चिन्तयितुमनर्हम् । अतएव । कूटस्थं - सन्तन्यमाना नेक देव मनुष्यादि देह साधारणतया पूर्वं भूतम् । सन्तन्यमानानेक पुरुष साधारण पूर्वपुरुष वाचीहि कूटस्थ शब्दः अत्र सन्तन्यमाना नेक साधारण्यमात्र परः । अचलं - नचलति - स्वा साधारणाका रान्नच्यवते इत्यचलं - अपरिणामीत्यर्थः । ध्रुवं - व्यापकीभूत परिणा मित्वनिवृत्त्या तद्व्याप्या नित्यत्व निवृत्ते र्नित्यत्वमित्यर्थः । एवं भूतम् । अक्षरं - प्रत्यगात्म स्वरूपम् । इन्द्रियग्रामं - चक्षुराद्येका- दशेन्द्रिय वर्गम् । सन्नियम्य - स्वव्यापारेभ्य स्सम्यङ्निगृह्य । सर्वत्र- देवमनुष्यादि विषमाकार शरीरावस्थितेषु सर्वेष्वात्मसु । समबुद्धयः- समा - ज्ञानाकारत्वे नैकप्रकारा, बुद्धिर्येषां ते तथोक्ताः । सर्व भूतहिते-सर्वेषांभूतानां, हिते - अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिरूपे । रताः - रतिमन्तः । आत्मनि देव मनुष्यादि विषमाकाराभिमानस्य तदरति निमित्तस्याभावादितिभावः । एव म्भूताश्चसन्तः । पर्युपासते । ते - तेपि । मां - मत्समानाकारं प्रत्यगात्मानम् । प्राप्नुवन्त्येव । तेषामपि स्वसाध्य सिद्धौ न सन्देह इत्यर्थः । नचैवं मामित्यस्य गौणत्वप्रसंग शंकाकार्या, प्रकारैक्येपि मुख्यतयैव सोऽयंव्रीहिः, 'रूपं तदोजस्वित देववीर्यं तदेव नैसर्गिकमुन्नतत्वम् ॥, ब्रह्मवेद ब्रह्मैवभवति ॥' इति लोकवेदयो स्तदभेद व्यवहार दर्शनात् । "निरंजनः परमंसाम्यमुपैति" 'भोगमात्र साम्य लिंगाच्च" "मम साधर्म्य मागता" इत्यादि श्रुतिसूत्र भगवद्वचनैर्मुक्तस्य भगवत्साम्यमात्रवचनात् । "ब्रह्मवेद ब्रह्मैव भवती" ति क्वाचिद भेदनिर्देशस्यापि बहुप्रमाणाविरोधेन परमसाम्यमात्रपर- त्वात्, " कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत "

क्लेशोऽधिकतरस्तेषा मव्यक्तासक्तचेतसाम् ।
अव्यक्ताहि गतिर्दुखं देहवद्भिरवाप्यते ॥ ५ ॥
ये तु सर्वाणिकर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥

इति भगवतैवं परमात्मनः कूटस्थाक्षरा द्वैलक्षण्यस्य वक्ष्यमाण त्वाञ्च ॥ ४ ॥

ननुतेपि चेत्स्वसाध्यं प्राप्नुवन्ति तेषां त्वदुपासकेभ्यः कथमप कर्ष इत्यपेक्षायां, क्लेशविशेष स्तेषामस्ति - मदुपासकानां तु सुकृत विशेषोऽस्ति अत स्तेषामपकर्ष इत्याह "क्लेश" इत्यादि श्लोक त्रयेण '

अव्यक्ते - अक्षरे, आसक्तं - साभिलाषं ; चेतः , येषां तेषां अव्य· क्ता सक्तचेतसां ; आत्म प्राप्ति कामानामित्यर्थः । क्लेशः - आयासः । अधिकतरः – अत्यन्त मधिकः । परमात्म प्राप्तिकामानामपि क्लेशो स्त्येवेति तद्व्युदासाया धिकतर इत्युक्तम् | कुतइत्यत्राह (अव्यक्तेति) हि - यस्मात्कारणात । देहवद्भिः - देहएषामस्त्यात्मतयेति देहवन्तः, तैः - देहात्माभिमानिभिरित्यर्थः । अव्यक्ता - अव्यक्तविषया ; विषय विषयिणोरभेदोपचारः । देहातिरिक्तात्म विषयेत्यर्थः । गतिः - उपा सनारूप मनोवृत्तिः । दुःखंयथातथा । अवाप्यते - निष्पाद्यते । अनादिदेहात्माभिमान वासनाबलेनोपासनादि रूप तदुपायनिष्पत्ते रतिक्लेशसाध्यत्वा त्तेषां स्वप्राप्तौ महान् विळंबो ऽस्तीति भावः ॥५॥

मत्प्राप्त्येक प्रयोजनतया मदुपासकानान्तु - 'सच ममप्रियः' 'ज्ञानीत्वात्मैवमेमतम्' इत्युक्तरीत्या ममात्यर्थप्रियत्वा न्मत्प्रसादादेव शीघ्रम्मत्प्राप्तिस्सिध्यतीत्याह " येत्वि " त्यादि श्लोकद्वयेन ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात ।
भवामि न चिरात्पार्थ मय्यावेशित चेतसाम ॥ ७ ॥
मय्येव मन आधत्स्वं मयि बुद्धिं निवेशय ।
निवसिष्यासि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

येतु । सर्वाणि - देहयात्राशेषभूतान्यशनादीनि लौकिकानि याग दान होमतपः प्रभृतीनि वैदिकानिच समस्तानि । कर्माणि । मयि - सर्वात्मनि । सन्नयस्य - सम्यक् - साकारंसोद्देश्यंच, निधाय, यत्करोषियदश्नासियज्जुहोषीत्यायुक्त विधयेतिभावः ॥ मत्पराः - अहमेव परः प्राप्यो येषान्ते तथोक्ताः । अनन्येनैव - प्रयोजनांतररहितेनैव । योगेन - भक्तिरूपेणोपायेन । ध्यायन्तः - ध्यानार्चन प्रणामादीनि कुर्वन्तस्सन्तः । मां उपासते ॥६ ॥

हे पार्थ । मयि । आवेशितचेतसाम् । तेषाम् । अहं - परमकारुणिक आश्रितवत्सलः। नचिरात् - अचिरेण - अविळंबेनैव। मृत्युसंसारसागरात् - मत्प्राप्तिप्रतिबन्धकतया मृत्युरूपात् स्थूलसूक्ष्मप्रकृति संबन्धलक्षण संसाराख्य समुद्रात् । समुद्धर्ता - सम्यगुद्धर्तासन् । भवामि - सत्तांलभे । ज्ञानीत्वात्मैव मे मतमित्युक्तरीत्या तैर्विना शरीरस्येवात्मनाविना - मम सत्ताया अनिर्वाहादिति भावः । अक्षरनिष्ठानामपि संसारसागरा दहमुद्धर्ता - नतुसमुद्धर्ता - समुद्धरणंहि संसारसागरा दुद्धृत्य परमप्राप्यदेशप्रापणं , तत्तु तेषां नविद्यते , तत्क्रतुन्याय विरोधादिति समुपसर्गं प्रयुंजानस्यभगवतोऽभिसन्धिः ॥ ७ ॥

एवं सामान्येनोक्तं कर्तव्यमर्थं श्रोतर्यर्जुनेनिवेशयति 'मय्येवे' त्यादिना ।

मय्येव - निरतिशय पुरुषार्थे सुलभे ऽचिरलभ्येच मय्येव । मनः । आधत्स्व , समाध्युपक्रमभूतं स्थिरम्मनस्समाधानं कुर्वित्यर्थः ।

अथ चित्तं समाधातुं न शक्नोषि मयिस्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥
अभ्यासे प्यसमर्थोऽसि मत्कर्मपरमोभव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धि मवाप्स्यसि ॥ १० ॥

मयि - विषये । बुद्धिं - परमप्राप्यत्वाध्यवसायम् निवेशय - कुरु । अतः - परमप्राप्यत्वा ध्यवसायपूर्वक मनस्समाधानात् । ऊर्ध्वं - अनन्त रमेव । सन्धयभावआर्षः । मय्येव । निवसिष्यसि - निवत्स्यसि । इडा गमआर्षः । अत्र मयिनिवसिष्यसीत्याधारतामात्रं नविवक्षितम् , तस्यास्सर्वदासत्त्वात् ; नापितद्बुद्धिः , तस्याश्श्रवणदशायामेव सिद्धत्वात् ; किन्तु तादृशमनस्समाधानानन्तरमेव मुक्तवन्मद्गुणा· नुभवैकप्रवणो भविष्यसीत्यर्थः । यद्वा - पृष्टसर्वप्रकारावस्थिते मय्या चार्यशिष्यइव पितरिपुत्र इवचस्थास्यसीत्यर्थः ॥ ८ ॥

एवं भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुखोपादान त्वाच्च श्रेष्ठ्यमुक्तं , तस्मिन्नधिकुरुष्वेति चार्जुनं प्रत्यनुशिष्टम् , अथ शब्दादिविषय वासनाकृष्टचेतसा मत्यन्ता दृष्टपूर्वेत्वयि कथंस्थिरं चित्तं समाधातुं शक्यमित्यर्जुनस्याशय मुन्नीय तदुपायमुपदिशति -

हे धनंजय - अर्जुन । मयि - स्वाभाविका नवधिकातिशया संख्ये यगुणसागरे निखिलहेयप्रत्यनीके मयि । चित्तं - मनः । स्थिरंयथा तथा । समाधातुम् । नशक्नोष्यथ - शक्तोनभवसियदि । अथशब्दोय द्यर्थः । ततः - तस्माद्धेतोः । अभ्यासयोगेन - मयिनिरतिशय प्रेमगर्भ स्मरणा वृत्त्युपायेन । माम् । आप्तुं - प्राप्तुम् । इच्छ ॥ ९ ॥

अभ्यासेपि - निरतिशय प्रेमगर्भस्मरणा वृत्तावपि । असमर्थः । असियदि । मत्कर्मपरमः - मत्कर्माणि - इतिहासपुराणादि प्रसिद्धा न्यालयनिर्माणोद्यानकरण प्रदीपारोपण सम्मार्जनाभ्युक्षणानु

अथैतद प्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान ॥ ११ ॥
श्रेयो हि ज्ञानमभ्यासा ज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्याग स्त्यागाच्छांति रनंतरम ॥ १२ ॥
अद्वेष्टा सर्वभूतानां मैत्रः करुणएवच ।
निर्ममो निरहंकारः समदुःख सुखःक्षमी ॥ १३ ॥

लेपन पुष्पाहरण पूजाप्रवर्तन नामसंकीर्तन प्रदक्षिणस्तुति प्रणामादि समाराधनात्मक कर्माणि, परमाणि - परमप्रयोजनानि , यस्यसतथोक्तः। भव । मदर्थं - केवलम्मत्प्रीणनाय । कर्माणि - उक्तरूपाणि । कुर्वन्नपि - आचरन्नपि । सिद्धिं - मत्प्राप्तिरूपाम् । अवाप्स्यसि ॥ १० ॥

मद्योगं - मयिनिरतिशय भक्तियोगम् ।आश्रितस्सन् । फलत्यागं - फलस्यत्यागोयस्मिन् तत्तथोक्तं - फलाभिसन्धिरहितं । सर्वकर्म - मदाराधनैक विषयज्ञानदानादि समस्तकर्म । कुरु - समाचर ॥ ११ ॥

हि - यस्मात्कारणात् । अभ्यासात - उक्तरूपात । ज्ञानं - आत्मसाक्षात्काररूपम् । श्रेयः - हितम् । ज्ञानात - तादृशात । ध्यानं - आत्मस्वरूपविषयकम् । विशिष्यते - हितंभवति । ध्यानात् - तादृशात् । कर्मफलत्यागः - फलत्यागपूर्वक कर्मानुष्ठानम् । श्रेयान् । त्यागात- तादृशात । अनन्तरं- अचिरादेव । शांतिः - रजस्तमोमूल रागद्वेषादि निवृत्तिः । भवति । शान्तेमनस्यात्मध्यानं संपत्स्यते , धानाच्चतदापरोक्ष्यम् , तदापरोक्ष्यात्पराभक्तिरितिभक्तियोगाशक्तस्यात्मनिष्ठैव श्रेयसी , आत्मनिष्ठस्याप्य शान्तमनसो निष्ठा प्राप्तये ऽन्तर्गतात्म ज्ञानानभिसंहित फलकर्मनिष्ठैव श्रेयसीत्यर्थः ॥ १२ ॥

अनभिसंहित फलकर्मनिष्ठस्योपादेयान् गुणानाह -

सर्वभूतानां - मनोवाक्कायैरपकुर्वतामपि सर्वजन्तूनाम् । अद्वेष्टा- मदपराधानुगुण मीश्वरप्रेरितान्येतानि भूतानि द्विषन्त्यप कुर्वन्तिचेत्य

संतुष्टः सततंयोगी यतात्माद्दढनिश्चयः ।
मय्यर्पित मनोबुद्धि र्यो मद्भक्तः स मे प्रियः ॥ १४ ॥
यस्मान्नोद्विजतेलोको लोकान्नोद्विजतेचयः ।
हर्षा मर्षभयोद्वेगै र्मुक्तो यः सच मे प्रियः ॥ १९ ॥

कृतद्वेषः । मैत्रः - तादृशसर्वभूतहितैषी । करुणः - तेषुद्विषत्स्वप कुर्वत्सुच दुःखितेषु करुणांकुर्वन् । निर्ममः - देहेन्द्रियेषु तत्संबन्धिषु च ममकाररहितः । अतएव । समदुःखसुखः - सुखदुःखयो रविकृत चित्तः । अतएव । क्षमी - अवर्जनोय शीतोष्णादि सहिष्णुः ॥ १३ ॥

सन्तुष्टः - यदृच्छोपगतेन येनकेनापि देहधारणद्रव्येण सन्तुष्टः । सततं - सन्ततम् । योगी - प्रकृतिविविक्तात्मानु सन्धानपरः । यतात्मा नियमितमनोवृत्तिः । दृढ़निश्चयः - अध्यात्मशास्त्रादिते ष्वर्थेषु दृढ़ निश्चयः । मयि - सर्वकर्माराध्येमयि । अर्पितमनोबुद्धिः - अर्पिताचित्ता ध्यवसायः , भगवान् वासुदेवो वसुदेवसूनुरेवा नभिसंहितफलेनानुष्ठिते न कर्मणा ऽऽराध्यते - आराधितश्च ममात्मापरोक्षं साधयिष्यतीति मय्यर्पित मनोबुद्धिरित्यर्थः । एवंभूतः । यः । मद्भक्तः - मयिभक्ति मान् । सः । मे - मम । प्रियः ॥ १४ ॥

यस्मात् - कर्मयोगनिष्ठा त्पुरुषान्निमित्तात् । लोकः - जनः । नोद्विजते - नबिभेति । योलोकोद्वेगकरंकर्म किंचिदपि नकरोतीत्यर्थः । लोकाच्च - निमित्तभूतात् । यः । नोद्विजते - यमुद्दिश्य सर्वलोको नाद्वेग करंकर्मकरोतीत्यर्थः । अतएव । यः । हर्षामर्षभयोद्वेगैः - कंचित्प्रति हर्षेण , कंचित्प्रति अमर्षेण - कोपेन , कंचित्प्रतिभयेन , कंचि त्प्रति , उद्वेगेन - कंपेनच । मुक्तः । एवंभूतः । सच - सोपि । मे - मम । प्रियः ॥ १५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभा शुभ परित्यागी भक्तिमान् यः स मे प्रियः ॥ १७ ॥
समः शत्रौच मित्रेच तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥

अनपेक्षः - आत्मव्यतिरिक्त कृत्स्नवस्तु न्यपेक्षारहितः । शुचिः- नियताहारेण शुद्धः , शास्त्रविहित द्रव्यवर्धित काय इत्यर्थः । दक्षः - युक्तायुक्त विवेकसमर्थः , शास्त्रीयक्रियोपादान समर्थइत्यर्थः । उदासीनः - अविहित क्रियायत्नरहित इत्यर्थः । गत व्यथः - अवर्जनीय शीतोष्णपरुषस्पर्शादिद्वन्द्वदुःखेषु व्यथारहितः । सर्वारम्भपरित्यागी - लौकिककर्मणि मनोवाक्काय व्यापाररहितः , शास्त्रीय व्यतिरिक्त सर्वकर्मारम्भ परित्यागीति यावत् । एवंभूतः - यः । मद्भक्तः । सच । मे - मम । प्रियः ॥ १६ ॥

यः । नहृष्यति - दैवादुपनतं प्रियमर्थं प्रति हर्षं न प्राप्नोति । नद्वेष्टि - अप्रियं प्राप्यापि द्वेषं न करोति । नशोचति - पशुपत्नी सुतादि वियोगादिरूप शोकनिमित्तं प्राप्यापि शोकं न करोति । न कांक्षति - अनागतं वस्तुनवांछति , तथाविध मर्थमप्राप्तं न कांक्षती त्यर्थः । शुभाशुभपरित्यागी - पुण्यपापरूप प्राप्तिप्रतिबन्धक कर्मनि- वृत्तिपरः । पापवत्पुण्यस्यापि बन्धहेतुत्वा त्तथानिर्देशः । यः । एव- म्भूतः । भक्तिमान् । सः । मे । प्रियः ॥ १७ ॥

शत्रौ - अपकारिणि । मित्रे - उपकारिणिच । समः । तथा । मानावमानयोः । सत्कारासत्कारयोः । शीतोष्ण सुखदुःखेष्वपि । समः - निर्विकारः । संगविवर्जितः - क्वचिदप्यासक्तिरहितः ॥ १८ ॥

तुल्यनिन्दा स्तुतिर्मौनी संतुष्टो येन केन चित् ।
अनिकेतः स्थिरमति र्भक्तिमान् मे प्रियोनरः ॥ १९ ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः ॥ २० ॥

इति श्रीभगवद्गीतायां द्वादशोध्यायः ॥

तुल्यनिन्दास्तुतिः - निन्दास्तुत्योरेकप्रकारः । मौनी - द्वेषप्रीति निबन्धन निन्दास्तुतिरूपवा गुच्चारणरहितः । येनकेनचित - यद्दच्छा गतेन । सन्तुष्टः - संजातहर्षः । स्थिरमतिः - अचंचलात्ममननशीलः । अनिकेतः - गृहक्षेत्रादिष्वसक्तः । एवंभूतः । यः । भक्तिमान् । नरः । सः । मे । प्रियः ॥ १९ ॥

अस्मादात्मनिष्ठाद्भक्तियोगनिष्ठस्य श्रैष्ठ्यंप्रतिपादयन् यथोपक्रमं उपसंहरति -

येतु - पुरुषाः । श्रद्धधानाः - श्रद्धावन्तः । मत्परमाः - मदेक प्रयोजनाः । यथोक्तं - मय्यावेश्य मनोयेमामित्यादिनामदुक्तप्रकारम् । धर्म्यामृतं - धर्मादनपेत ममृतवद्भोग्यभूतंच । इदं - भक्तियोगाख्यं मदुपासनम् । पर्युपासते - सपरिकरमनुतिष्ठन्ति । ते । भक्ताः । मे - मम । अतीव । प्रियाः , मदात्मभूता इत्यर्थः ॥२० ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर मुनिविरचितायां बालबोधिन्यपराभिधानायां गीतार्थसंग्रहदीपिकायां

द्वादशोऽध्यायः ॥ १२ ॥

श्रीरस्तु।

अथत्रयोदशोऽध्यायः ।

श्रीभगवानुवाच ।

इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥

अथप्रथमषट्के शास्त्रावतरणोपोद्घातभूत पार्थगतास्थान स्नेह कारुण्यादिनिवृत्तिहेतुभूत भगवत्प्राप्त्युपायभूत भक्तियोगांगभूत मात्मयाधात्म्यानुसंधानपूर्वक कर्मयोगसाध्यं प्रत्यगात्मनोदर्शनं सपरिकरमुक्तम् । द्वितीयषट्केच तदंगभूतो भगवत्प्राप्त्युपायभूत भक्तियोग स्सपरिकरः प्रतिपादितः । इदानीं तृतीय षट्केषट्कद्वयो दित मर्थजातं विशोधयिष्यन् - आदौ - गतासूनगतासूंश्चे त्यादिना प्रतिपादितं शरीरात्मतत्त्वं विशोधयितुं भगवानुवाच -

हे कौन्तेय । इदं - देवो ऽहंमनुष्योहमित्यहमर्थ सामानाधिकरण्येन प्रतीयमानम् । शरीरम् । क्षेत्रमिति - कर्मबीजफलोत्पत्ति हेतुत्वात्क्षेत्रमिति । अभिधीयते - आत्मयाथात्म्यविद्भिः प्रतिपाद्यते । एतत - शरीराख्यंक्षेत्रं । यः । वेत्ति - जानाति । तम् । तद्विदः - आत्मयाथात्म्यविदः । क्षेत्रज्ञइति - क्षेत्रंजानातीति क्षेत्रज्ञइति , वेद्यात् क्षेत्राद्वेदिता ऽन्यइति । प्राहुः - वदन्ति । यथाकेदारिणा - क्षेत्रमहं जानामीत्युक्ते ज्ञेयात क्षेत्रात्तज्ज्ञाता ऽन्यः प्रतीयते , एवं - शरीरमहं जानामीत्यनुभवेन ज्ञेयाच्छरीरात्तज्ज्ञाताऽन्यः - ज्ञातुश्चज्ञेयं शरीरमन्यदिति स्फुटंज्ञायते । ततएव - देवोऽहं - मनुष्योहं - इत्याद्यनुभवोप्य विनाभूत शरीरशरीरि

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

भावनिबन्धनः , योगसहकृत मनोगोचरतया ; केवलचेतसातदनवभा सेन मोहकप्रकृतिसान्निधानदोषेणकर्मबलेनापि लौकिकानां देहात्मा भेदप्रतीतिरूप इतिभावः ॥ १ ॥

एवं ज्ञेयत्वेन ज्ञातृत्वेनचात्यन्तविविक्तयोरेव क्षेत्रक्षेत्रज्ञयोः - भूमि रापोनलोवायुरित्यादि सप्तमाध्यायादिसिद्ध स्वशेषत्व प्रत्यभिज्ञापनेन स्वस्मादपि विविक्ततां ज्ञापयन्नतद्विवेकज्ञानं प्रशंसति -

हे भारत ! सर्वक्षेत्रेषु - सर्वेषुशरीरेषु। क्षेत्रज्ञंचापि - अत्रजातावेक वचनं , क्षेत्रज्ञान् सर्वानपीत्यर्थः । मां - मदात्मकान् । विद्धि , अपिश ब्दात्क्षेत्राण्यपि मदात्मकानि विद्धीतिगम्यते । यथासर्वाणि शरीराणि शरीरिणा मविनाभावेन विशेषणतया - देवोऽहं - मनुष्योऽहं - इत्यादि सामानाधिकरण्येनानुभूयन्ते , तथाक्षेत्रक्षेत्रज्ञयो रुभयोरपि पूर्वोक्त रीत्या मदविनाभावेन - क्षेत्रज्ञं मांविद्धि - क्षेत्रंच मां विद्धीत्यादि सामा नाधिकरण्य निर्देशावुपपन्ना वितिभावः । एवं - क्षेत्रक्षेत्रज्ञयोः - चेतना चेतनयोः। यज्ज्ञानं - परस्परविविक्ततया मच्छेषतयाच यज्ज्ञानम् । तत् - ज्ञानम् । मम । मतम् । ज्ञानं - मुक्तिहेतुत्वा द्वेदवत्तन्ममाभिप्रेतं प्र शस्तज्ञानम् । अन्यत्तु वृथापाण्डित्य मितिभावः । तथाचोक्तम् - "तत्कर्मयन्नबन्धाय साविद्याया विमुक्तय " इति । यद्यपि - "द्वासुपर्णास युजासखायासमानं—वृक्षंपरिषस्वजाते । तयोरन्यः पिप्पलंस्वाद्वत्त्यन श्नन्नन्यो अभिचाकशीति । " "पृथगात्मानं प्रेरितारंच मत्वाजुष्टस्ततस्ते नामृतत्वमेति " इत्यादि केवल भेदश्रुतयः , " ऐतदात्म्यमिदं सर्वंस आत्मातत्त्वमसि " "अहं ब्रह्मास्मि "इत्याद्यभेद श्रुतयश्चापाततः परस्पर विरुद्धाः प्रतीयन्ते ; तथापि " यःपृथिव्यां तिष्ठन् यस्यपृथिवीशरीरं "

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मेशृणु ॥ ३ ॥
ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम् ॥ ४ ॥

" यआत्मनितिष्ठन् यस्यात्माशरीरम् " इत्यादिना समस्तचिदचिद्वर्गस्य परमात्मशरीरता मुपपाद्य , " एष सर्वभूतान्तरात्माऽ पहतपाप्मादिव्योदेव एकोनारायणः " इतिनारायणस्य शरीरित्वंचाभिधाय सामानाधिकरण्यश्रुतीनां भेदश्रुतीनांच शरीर शरीरिभाव मादाये ककण्ठयस्य ममाभिमततया मच्छरीरतया विविक्ततया ज्ञानमेव प्रशस्तमिति भावः २ ॥

क्षेत्र क्षेत्रज्ञ ज्ञानमेव प्रपंचयति -

तत् - शरीरात्मकम् । क्षेत्रम् । यत् - यद्द्रव्यम् । यादृक्च - जडोपादानकं - अजडोपादानकं वेति यावत , येषामाश्रयभूतमित्यर्थः । यद्विकारि - यद्विकारयुक्तम् । येचास्यविकारा इत्यर्थः । यतः - यस्मात्प्रयोजनात , यत्प्रयोजनसिद्ध्यर्थ मुत्पन्नमित्यर्थः । यत् - यत्स्वरूप मित्यर्थः । जडद्रव्य संघात एकदेशोवेत्यर्थः । सच - क्षेत्रज्ञः । यः - यत्स्वरूपः । यत्प्रभावश्च - प्रकृष्टाभावाः प्रभावाः , येप्रभावायस्यसः - यत्प्रभावः - यैर्यैस्स्वभावैर्युक्तइत्यर्थः । तत - सर्वम् । समासेन - संक्षेपेण । मे - मत्तः । शृणु - आकर्णय । शृणिवति सावधानता द्योतनाय ॥ ३ ॥

कुत्र विस्तरेणोक्तस्य भवतासंक्षेपेण कथनमित्यत्राह

ऋषिभिः - पराशरादिभिः । बहुधा - बहुभिःप्रकारैः । गीतं - क्षीरनीरवदतिदुर्विवेचतया बहुविधं विवेचितमित्यर्थः । विविधैः -

महाभूतान्यहंकारो बुद्धिरव्यक्तमेवच ।
इंद्रियाणि दशैकंच पंच चेंद्रियगोचराः ॥ ५ ॥
इच्छाद्वेषः सुखं दुःखं संघातश्चेतनाधृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥

ऋग्यजुस्सामादि बहुप्रकारैः । छन्दोभिः - वेदैश्च । पृथक् - असंकीर्णयथातथा । गीतम् । हेतुमद्भिः - स्वाभिमतार्थसाधकयुक्तिसम्पन्नैः । विनिश्चितैः - विशेषेण निश्चितार्थैः । ब्रह्मसूत्रपदैः - ब्रह्मसूत्राणि - ब्रह्मसूचकानि , पदानि - पद्यते - ब्रह्मज्ञानोपयोगितया प्रतिपद्यते क्षेत्र क्षेत्रज्ञ तत्त्व मेभिरिति पदानि , ब्रह्मसूत्राणि च तानि पदानिच ब्रह्मसूत्रपदानि , तैः । गीतम् " नावियदश्रुतेः " " नात्माश्रुतेः " इत्यादिना क्षेत्रक्षेत्रज्ञतत्त्वे भेदेनोपादाय " परात्तुतच्छ्रुतेः " इत्यादिना तत्प्रवर्त्यत्वोपपादनादित्यर्थः । एवंभूतं तत्क्षेत्रक्षेत्रज्ञमाहात्म्यं समासेन शृणिवति पूर्वेणान्वयः ॥ ४ ॥

अथभगवानेव तत्क्षेत्रमिति स्वेनैवोपदिष्टा नर्थान्विवेचयति -

एतद क्षेत्रं - शरीरात्मकंक्षेत्रम् । महाभूतानि - पृथिव्यादीनि पंच । अहंकारः - तत्कारणप्रकृति परिणामविशेषः । बुद्धिः - महत्तत्त्वम् । अव्यक्तमेवच - प्रकृतिश्च । प्रकृत्याद्याकाशपर्यन्त जडमयमित्यर्थः । अनेन - यदितिप्रथम निर्दिष्टांशोविवेचितः । द्वितीयं यादृगित्येतदंशं विवेचयति । दश - ज्ञानेंद्रिय कर्मेंद्रियात्मकानि । इन्द्रियाणि । एकंच - मनश्च । पंच । इन्द्रियगोचराश्च - इन्द्रियविषयाश्शब्दादयश्च । एतद्रूपं क्षेत्रमित्यन्वयः , तदाश्रयभूतमित्यर्थः ॥५॥

यद्विकारीति तृतीयांशं विवेचयति (इच्छाद्वेषस्सुखंदुःखमिति) तत् क्षेत्रम् , एतत्कार्यमित्यर्थः । यदितिनिर्दिष्टं पंचमांशं विवेचयति (संघातइति) पूर्वोक्तजडसंघातरूपं तत्क्षेत्रमित्यर्थः । यत्तइत्युद्दिष्टंचतुर्थ

अमानित्व मदंभित्व मांहिंसा क्षांतिरार्जवम ।
आचार्योपासनं शौचं स्थैर्य मात्मविनिग्रहः ॥ ७ ॥
इंद्रियार्थेषु वैराग्य मनहंकार एवच ।
जन्म मृत्यु जराव्याधि दुःखदोषानुदर्शनम ॥ ८ ॥

मंशं विवेचयति (चेतनाधृतिरिति) चेतनस्य - भोक्तुरात्मनः, आधृतिः - आधारः । सुखदुःखानुभवार्थ मयनभूतं तत्क्षेत्रमित्यन्वयः । अनेनशरीरस्य सुखदुःखानुभव एवप्रयोजनंमित्युक्तंभवति । एवम् । एतत्क्षेत्रम् । समासेन - संक्षेपेण । सविकारं - सकार्यं सस्वभावंच । उदाहृतम् - उपन्यस्तम् ॥ ६ ॥

अथक्षेत्रकार्येष्वात्मज्ञानसाधनतयो पादेयान् गुणानाह -

अमानित्वं - मानः - विद्यावित्ताभिजनादि जनितगर्वः, तद्रहितत्वम् । अदंभित्वं - दंभः - धार्मिकत्वयशः प्रयोजनतया धर्मानुष्ठानं, तद्राहितत्वम् । अहिंसा - मनोवाक्कायैः परपीडानाचरणम् । क्षान्तिः - परैः पीड्यमानस्यापि तान्प्रतिद्वेषरहितत्वम् । आर्जवं - वाङ्मनः कायानामेकरूपता । आचार्योपासनं - आत्मज्ञानप्रदायिन्याचार्ये प्रणिपातपरिप्रश्न सेवादिनिरतत्वम् । शौचं - अशुचित्वराहित्यम् । रागादिकम्मनसो ऽशुचित्वं, अनृतंवाचो ऽशुचित्वं, अभक्ष्यभक्षणादिकंकायस्या शुचित्वं, तद्राहितत्वमित्यर्थः । स्थैर्यं - अध्यात्मशास्त्रोक्तेष्वर्थेषु निश्चलत्वम् । आत्मविनिग्रहः - आत्मनः - मनसः, विनिग्रहः - प्रत्यगात्म व्यतिरिक्तविषयेभ्यो निवर्तनम् ॥ ७ ॥

इन्द्रियार्थेषु - इन्द्रियाणां - चक्षुरादीनाम्, अर्थेषु - विषयेषु रूपादिषु सांस्पर्शिकेषु । वैराग्यं - सदोषत्वानुसन्धानेन विरक्तिः । अनहंकारः - देहात्माभिमान राहितत्वम् । इदमुपलक्षणम् - अस्वे स्वत्वबुद्धिराहितत्व मप्यनेन संगृहीतम् । जन्ममृत्युजराव्याधि दुःख

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ।
नित्यंच समचित्तत्व मिष्टानिष्टोपपत्तिषु ॥ ९ ॥
मयिचानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्व मरतिर्जनसंसदि ॥ १० ॥
अध्यात्म ज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानं मितिप्रोक्त मज्ञानं यदतोन्यथा ॥ ११ ॥

दोषानुदर्शनं - जन्ममृत्युजराव्याधिषु शरीरसंबन्धिषु दुःखरूपस्य दोषस्य, अनुदर्शनं - पुनःपुनरालोचनम् ॥ ८ ॥

असक्तिः - गृहारामक्षेत्रादि स्वाभिमानिके स्वासक्तिरहितत्वम् । ननुगृहाद्युपकरणेषु संगविरहे कथं गृहस्थधर्म निष्पत्तिरित्यत्राह (अनभिष्वंगइति) पुत्रदारगृहादिषु । अनभिष्वंगः - शास्त्रोक्त धर्मसाधनत्वेन विना स्वभोगसाधनत्वानुसन्धानेनातिप्रीतिरहितत्व मित्यर्थः । इष्टानिष्टोपपत्तिषु - इष्टानिष्टानां सांकल्पिकानां, उपपत्तिषु प्राप्तिषु । नित्यं । समचित्तत्वंच - एकरूप चित्तत्वंच, हर्षोद्वेगरहि तत्वंचेति यावत ॥ ९ ॥

अनन्ययोगेन - अन्ययोगः - प्रयोजनांतरस्पर्शः, तदभावेन । मयि - सर्वेश्वरे । अव्यभिचारिणी - न व्यभिचरितुं - देवतांतरं स्प्रष्टुं, शीलमस्या इत्यव्यभिचारिणी-अतिस्थिरा। भक्तिश्च। विविक्तदेशसेवित्व - पवित्रदेश सेवित्वम् । जनसंसदि - असात्त्विकसभायाम् । अरतिः - अप्रीतिः ॥ १० ॥

अध्यात्मज्ञाननित्यत्वं - आत्मनि - विविक्तात्मविषये, यज्ज्ञानं तदध्यात्मज्ञानम्, तस्मिन्नित्यत्वं - तदेकनिष्ठत्वम् । तत्वज्ञानार्थ चिन्तनं - तत्वज्ञानं - प्रत्यगात्मयाथात्म्यज्ञानं, अर्थः - प्रयोजनं, यस्य

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

तत् , एवंभूतं चिन्तनं - आलोचनम् । एतत् - अमानित्वादिप्रत्यगात्मालोचनपर्यन्तं क्षेत्रकार्यजातम् । ज्ञानमिति - ज्ञायतेप्रत्यगात्मतत्वमनेनेतिज्ञानं - प्रत्यगात्मज्ञानसाधनं , तदिति । प्रोक्तम् । अतः - तस्मात् । अन्यथा - अन्यत् । यत् - क्षेत्रकार्यमानित्वदंभित्वादि । तत् । अज्ञानं - आत्मज्ञानविरोधीत्यर्थः ॥ ११ ॥

पूर्वं ' क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानम्मतं ममे ' तिज्ञेयतया प्रक्रांतयोः क्षेत्रक्षेत्रज्ञयोर्मध्ये क्षेत्रस्वरूपं शोधितं । अथावशिष्टस्य वेदितुः स्वरूपंशोधयति -

ज्ञेयं - उक्तामानित्वादिभिः क्षेत्रविविक्ततयावेद्यम् । यत् - प्रत्यगात्मस्वरूपम् । तत् । प्रवक्ष्यामि - प्रकृष्टंयथातथाकथयिष्यामि । एवंश्रोतुस्सावधानताद्योतनाय प्रवक्ष्यामीति प्रतिज्ञायादरातिशयाय फलंनिर्दिशति (यदिति) यत् - प्रत्यगात्मस्वरूपम् । ज्ञात्वा - तत्वतोविज्ञाय । अमृतं - जरामरणादि विरहितं परिशुद्धात्मस्वरूपम् । अश्नुते - प्राप्नोति । अनादि - नविद्यते , आदिः - उत्पत्तिः , यस्यतत् । इदमुपलक्षणम् । अनन्तमपि । मत्परं - अहमेव , परः - शेषी , यस्य तत् ; मच्छेषभूतमित्यर्थः । अनेन सप्तमाध्याये ' इतस्त्वन्यां प्रकृतिंविद्धिमेपरां । जीवभुता ' मित्यत्रमइति षष्ठ्यानिर्दिष्ट स्सम्बन्धश्शेषत्वरूप इतिशोधितंभवति । ब्रह्म - संसारदशायां कर्मणासंकोचेपि - सचानन्त्यायकल्पतइति श्रुतिसिद्धापरिच्छिन्न ज्ञानस्वभावम् । नसत् - कर्मकृतकार्यावस्थावत्वेपि स्वरूपतःकार्यावस्थारहितम् । नासत् - कारणावस्थारहितंच । उच्यते - नजायतेम्रियतेवाविपश्चिदित्यादि श्रुतिभिरित्यर्थः ॥ १२ ॥

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥
सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृच ॥ १४ ॥

तत् - परिशुद्धात्मस्वरूपम् । सर्वतःपाणिपादं - सर्वतः - सर्वेषु देशेषु, पाणयःपादाश्च - यस्यतत् । अत्रपाणिपादग्रहणं कर्मेन्द्रियमात्रोपलक्षणम् । सर्वदेशगतकर्मेन्द्रियकार्यं शक्तमित्यर्थः । सर्वतोऽक्षिशिरोमुखं - सर्वतः - सर्वदेशेषु, अक्षीणिशिरांसिमुखानिचयस्यतत् । सर्वतः- सर्वदेशेषु । श्रुतिमत् - श्रोत्रयुक्तम् । अत्राक्षिश्रुतिग्रहणंज्ञानेन्द्रियमात्रोपलक्षणम् । सर्वदेशव्यापि सर्वज्ञानेन्द्रिय मूर्धमुखादि कार्यशक्तमित्यर्थः । अतएव । लोके । सर्वं - विषयजातम् । आवृत्य - ज्ञानद्वाराऽधिष्ठाय । तिष्ठति । अयम्भावः - यथा 'अपाणिपादोजवनोग्रहीता' 'पश्यत्य चक्षुस्सश्रृणोत्यकर्णः' इतिकर्मेन्द्रिय ज्ञानेंद्रियाद्यभावेऽपि परमात्मा तत्कार्यशक्त इत्युपपन्नं, तथा जीवस्यापिमुक्तदशायां 'निरंजनः परमंसाम्य मुपैति' तिश्रुत्या 'ममसाधर्म्यमागता' इति वक्ष्यमाणस्वसूक्त्याच जगद्व्यापारवर्जं सर्वशक्त्यादि प्रतिपादनेन, सच्चानन्त्यायकल्पतइति व्यापकज्ञानाविर्भावोक्त्याच परमात्मवत्सर्ववस्तुजातव्याप्तिरुक्तैवेति ॥ १३

सर्वेन्द्रिगुणाभासं - सर्वेषाम् - विषयाणाम्, इन्द्रियगुणैः - चक्षुरादिवृत्तिभिः, आभासः - प्रकाशः, यस्यतत्; इन्द्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थमित्यर्थः । सर्वेन्द्रियविवर्जितं - स्वभावतस्सर्वेन्द्रियैर्विवर्जितम् । इन्द्रियव्यापार नैरपेक्ष्येणापि सर्वसाक्षात्कार समर्थमित्यर्थः । असक्तं - स्वभावतो देवादिदेह संगरहितमित्यर्थः । अथापि। सर्वभृच्चैव - ऐच्छिकदेवादि सर्वदेहभरण समर्थंचैव 'सएकधा भवति त्रिधाभवती' त्यादिश्रुतेः। निर्गुणं- स्वभावतो गुणसंबन्ध रहितम् ।

बहिरंतश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तद विज्ञेयं दूरस्थं चांतिके च तत् ॥ १५ ॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृच तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

गुणकार्यप्राकृतभोग रहितमित्यर्थः । अथापि । गुणभोक्तृच - संसार दशायां कर्माधीनप्राकृत गुणभोगसमर्थं चेत्यर्थः ॥ १४ ॥

तत - विविक्तात्मतत्वम् । भूतानां - पृथिव्यादीनाम् । बहिः - बहिर्देशे । वर्तते । पृथिव्यादीनिभूतानि विहायाशरीरं बहिस्तिष्ठतीत्यर्थः । अन्तश्च । वर्तते - " जक्षत्क्रीडन् रममाणस्त्रीभिर्वायानैर्वा ज्ञातिभिर्वे " त्युक्तप्रकारेण स्वेच्छया प्राकृतभूतान्तर्वर्तित्वेनापि तिष्ठतीत्यर्थः । तथास्वभावतः । अचरंच । चरमेवच – देहित्वदशायां चरमेवच । तत् - एवं सर्वशक्ति सर्वज्ञमपि विविक्तात्मस्वरूपम् । सूक्ष्मत्वात् - शरीरेवर्तमानत्वेप्यति सूक्ष्मत्वात् । अविज्ञेयं - योगासंस्कृतमनोभि स्संसारिभिः पृथक्त्वेनदुर्विभाव्यम् । अतएव । तत् । दूरस्थं - अमानित्वादि गुणविराहिणां योजनतोऽप्यन्तरितमिवतिष्ठति । तदेव । अन्तिकेच – अमानित्वादि गुणोपेताना मतिसान्निधौ भवति ॥ १५ ॥

भूतेषु - शरीरात्मनापरिणतेषु पृथिव्यादिषु । अविभक्तंच - विदुषांज्ञातृत्वैकाकारतयैकरूपम् । विभक्तमिवच - अविदुषां - देवोऽहम्मनुष्योहमित्यादिना देवाद्याकारेण नानारूपमिवच । स्थितम् । एवं विलक्षणं शुद्धरूपमुपवर्ण्य विशिष्टरूपस्यापि क्षेत्रज्ञस्यप्रकरणारम्भइव क्षेत्राद्भेदंदर्शयति (भूतेति) तत - जीवतत्वम् । भूतभर्तृ - भूतानां - शरीरात्मनापरिणतानां पृथिव्यादीनाम् । भर्तृ - पोषकम् । ज्ञेयं - ज्ञातुंशक्यम् । अनेनपोष्यात्पोषकस्यभेदस्सिद्धः । ग्रसिष्णु - अत्र

ज्योदिषामपि तज्ज्योतिस्तमसः परमुच्यते ।

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।

मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

त्मनापरिणतानां भूतानांग्रसनशीलम् । ज्ञेयम् । अनेनग्रस्यमानाद्
ग्रसितुर्भेदः । प्रभविष्णुच - भक्षितानां रूपान्तरेणोत्पादनं प्रभवः,
तच्छीलं - तत्कारणंच । ज्ञेयम् । अन्नादीनांपरिणामादप्यर्थान्तरं
तत्कारणमात्मतत्त्वमिति सिध्यति । मृतशरीरे भरणग्रसनप्रभवानामद
र्शनं तेषांजीवैकहेतुकत्वादित्यवगन्तव्यम्॥ १६ ॥

तद - आत्मतत्त्वम् । ज्योतिषामपि - प्रकाशकानां - दीपादि
त्यादीनामपि। ज्योतिः - प्रकाशकम्। दीपादित्यादिः स्वप्रभाद्वाराघटादि
कमिव प्रभास्थानीय स्वज्ञानद्वारा दीपादित्यादिक मप्यात्माप्रकाशयती
त्यर्थः। तमसः-मूलप्रकृतेः। परं विविक्तम्। उच्यते- आत्मतत्त्वविद्भिः प्रति
पाद्यते। अतएव। ज्ञानगम्यं-ज्ञायते आत्मतत्त्वमेभिरिति ज्ञानानि ज्ञानसाध
नानि, अमानित्वादीनि; तैर्गम्यं - प्राप्यम्। ज्ञानं - ज्ञानैकाकारम्। ज्ञेयं -
अनुसंधेयम् । सर्वस्य - लोकस्य । हृदि - हृद्देशे । विष्ठितं - विशेषेण
सन्निहितम् ॥ १७ ॥

क्षेत्रक्षेत्रज्ञयाथात्म्य मुपसंहरन्नुक्तस्य फलं दर्शयति –

इति - पूर्वोक्तरीत्या । क्षेत्रं - शरीरतत्त्वम् । तथा । ज्ञानं -
ज्ञायते आत्मतत्त्वमनेनेति ज्ञानं- अमानित्वाद्यात्मया थात्म्यज्ञानसाधनम् ।
ज्ञेयंच - क्षेत्रज्ञतत्त्वंच । समासतः - संक्षेपेण । उक्तम् । एतत -
त्रितयं । विज्ञाय । मद्भक्तः – विविक्तात्मज्ञानानुकूल भक्तिमान् ।
मद्भावाय - ममयोभावः - स्वभावः - असंसारित्वम् , तस्मै । उप

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

पद्यते - उपपन्नोभवति । तताश्चितयज्ञानेन मुक्तियोग्यो भवती त्यर्थः ॥ १८ ॥

अथात्यंतविविक्तयोः प्रकृत्यात्मनोरनादिसंसर्गं तत्कार्य भेदांश्चाह –

प्रकृतिं त्रिगुणात्मिकां मायाम् । पुरुषंचैव - ज्ञातारंचैव । एतावुभावपि । अनादी - विद्धि - इतरेतरयोगपरश्चकारः, परस्परं संसृष्टतयैवानादी जानीहि । विकारान् - बन्धहेतू निच्छाद्वेषसुख दुःखात्मकान् दोषान् । गुणान् - मुक्तिहेतूनमानित्वादींश्च । प्रकृति संभवान् । विद्धि । पुरुषेणानादिकाल संसृष्टा ऽनादिक्षेत्र प्रवाह रूपेण परिणता प्रकृतिरेव पुरुषस्य बन्धार्थ मिच्छाद्वेषसुखदुःखात्म कान् विकारानपवर्गार्थ ममानित्वादीन् गुणांश्च कल्पयतीत्यर्थः ॥ १९ ॥

ननुजडायाः प्रकृतेः कथमेवं शक्तिरित्यत आह –

प्रकृतिः - गुणत्रयमयीमाया । कार्यकारणकर्तृत्वे - कार्य - शरीरं, कारणानि - मनःप्रभृत्येकादशेंद्रियाणि , तेषाम् , कर्तृत्वे । हेतुः – आश्रयतया प्रयोजकभूतः । उच्यते – प्रतिपाद्यते । शरीरेंद्रियरूपेण परिणता भोक्तृपुरुषाधिष्ठिता प्रकृतिरेव भोगसाधनशरीरेंद्रिय व्यापा राश्रयभूतेत्यर्थः । ननुप्रकृतेरेव भोगसाधनक्रियाश्रयत्वे भोक्तृत्व मपि तस्याएवस्यादित्यत्राह (पुरुषइति) पुरुषः – प्रकृत्यधिष्ठाता चेतनः । सुखदुःखानां – शरीरेंद्रिय जन्यानामित्यर्थः । भोक्तृत्वे तदनुरूपेभोगे । हेतुः – आश्रयः । उच्यते । परस्परसंसृष्टयोः प्रकृति

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ।
कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

पुरुषयो र्मध्ये जडायाः प्रकृतेः भोगसाधनक्रियाप्रयोजकत्वं तदधिष्ठातुश्चेतनस्य •शास्त्रफलं प्रयोक्तरीतिन्यायेन क्रियाफलभोक्तृत्वं चेत्यर्थः । अनेन क्षेत्रक्षेत्रज्ञयोः कार्यभेदश्चोक्त इतिवेदितव्यम् ॥२०॥

ननु परिशुद्धस्य स्वानुभवैकसुखस्य वैषयिकसुख दुःखानुभवो नतात्त्विकस्स्यात् - स्फटिकस्य जपाकुसुम लौहित्यवदारोपित एव च स्यादित्यत्राह -

पुरुषः - स्वानुभवैकसुखोपि प्रत्यगात्मा । प्रकृतिस्थः - शरीरसंसृष्टस्सन् । प्रकृतिजान् - तत्संसर्गप्रयुक्तान् । गुणान् - सत्त्वादिगुणकार्यसुखदुःखादीन् । भुंक्ते - अनुभवतिहि । अनेन स्वानुभवैकसुखस्यापि प्रकृतिसम्बन्धएव बाह्यसुखदुःखानुभवे जलौष्ण्यानुभवे वह्निसंसर्गइव हेतुरित्युक्तंभवति । ननुशुद्धस्य तस्यप्रकृतिसम्बन्धएव कथमित्यत्राह (कारणमिति) अस्य - परिशुद्धस्याप्यात्मनः । सदसद्योनिजन्मसु - सदसत्सु - साध्वसाधुषु , योनिषु - ब्रह्मक्षत्रचण्डालादिरूपेषुयोनिषु , जन्मानि - शरीरसम्बन्धरूपाणि , तेषु । गुणसंगः - सत्त्वादिकार्यसुखाद्यासक्तिः । कारणम् । अयम्भावः - देवमनुष्यादिपूर्वपूर्वशरीरसंसृष्टो जीवस्तत्तत्प्रयुक्त सुखादीननुभूय तद्वासनावशात्पुनःपुनः पुण्यपापादिकर्माचरति - तदनुभवार्थं पुनःपुनस्सदसद्योनिषुजायते - पुनःपुनस्सुखाद्यनुभवतीति बीजांकुरवदनादिरियंगुणसंगशरीर सम्बन्धपरम्परेतिभावः । अत्रगुणसंगस्य प्रकृतिसम्बन्धहेतुत्वोक्त्यैव कदाचिदसंगकर्मानुष्ठानादि कृतसुकृतसंगमस्यामानित्वादि गुणसम्पत्तौसत्यां गुणसंगनिवृत्त्या प्रकृतिसम्बन्ध निवृत्तिरपि संभवतीत्यपवर्गार्थव्यापारोपि प्रकृतिकार्यसंभवतीतिद्योतितंभवति ॥२१॥

उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेस्मिन पुरुषः परः ॥ २२ ॥
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

सदसद्योनि जन्मांतर भाविपुरुष स्वभावानाह -

अस्मिन् । देहे - कार्यकारणसंघाते । स्थितः । अपरिच्छिन्न ज्ञानशक्तिरपि । पुरुषः । उपद्रष्टा - उप - समीपे , द्रष्टा - शरीर संसृष्टत्वाज्जीवस्यापि शरीरस्य प्रवृत्त्यनुकूल संकल्परूप दर्शनवान् । अनुमन्ता - प्रेरकः , नियन्तेत्यर्थः । भर्ता - देहस्यापिधारकः । भोक्ता - शरीरव्यापारफलभाक् । अनेनशरीरस्य पुरुषविशेषणत्व मुक्तम् । एभिर्विशेषणैर्नियमन धारणशेषित्वादिभि श्शरीरं प्रतिपुरुषस्य परत्व मुक्तम् । अतएव , महेश्वरश्च - शरीरेंद्रियमनसा मधिष्ठाताच । पर मात्मेतिचापि उक्तः - एतद्देहेंद्रियमनांसि प्रतिपरमात्मेत्यप्युक्तः । अपिशब्दान्महेश्वर इत्यप्युक्त इतिगम्यते । देहमनस्सुचात्म शब्द प्रयोगाज्जीवोपि तदपेक्षया परमात्माभवति । स्वतो ऽपरिच्छिन्न ज्ञान शक्तिरप्ययं पुरुषो ऽनादिप्रकृति संसर्गगुणसंगाभ्यां देहमात्र महेश्वरो देहमात्र परमात्माच भवतीत्यर्थः ॥ २२ ॥

अथ विवेकानु संधानप्रकारंवक्ष्यन् तत्रात्यादराय तत्फलं प्रथमं दर्शयति -

यः-पुमान्। एवं- उक्तस्वभावम्। पुरुषम् । प्रकृतिंच । गुणैः - वक्ष्य माणस्वभावैः सत्त्वादिभिः । वेत्ति - यथावद्विवेकेन जानाति । सः - पुमान् । सर्वथा – देवमनुष्यादि नानाविधदेहसंसर्गप्रयुक्त योग विरोधि विचित्रक्लेशाविष्टतया । वर्तमानोपि । भूयः - पुनरपि

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते ।
तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

नाभिजायते - सदसद्योनि संबन्धं नप्राप्नोति, किन्तुज्ञानाग्नि दग्धकर्मत्वा त्तद्देहावसान एवापरिच्छिन्नज्ञानं परिशुद्धात्मानं प्राप्नोतीत्यर्थः ॥ २३ ॥

उक्तमेवार्थं श्लोकद्वयेन विवृण्वन्नात्मज्ञानस्य पर्वभेदानाह -

केचित - निष्पन्नयोगाः - पुमांसः । आत्मनि - शरीरे । स्थितम् । आत्मानं - परिशुद्धात्मानम् । आत्मना - मनसान्तःकरणेन । ध्यानेन - समाधिना । पश्यन्ति - विशदमनुभवन्ति । अन्ये - अनिष्पन्नयोगाः । सांख्येन - संख्या - ज्ञानं, संख्यैवसांख्यं - तेन । योगेन । आत्मानम् । पश्यन्ति । ज्ञानयोगेनसमाधियोग्यमनः कृत्वा परिशुद्धात्मानं साक्षात्कुर्वन्तीत्यर्थः । अपरेच - कर्मयोगाधिकारिणस्तु । कर्मयोगेन- असंगकर्मानुष्ठानेन । आत्मानंपश्यन्तीत्यन्वयः । दुष्करज्ञानयोगाधिकारिण स्सुकरोपायसक्ताश्शिष्टा एवान्तर्गतज्ञानेन कर्मयोगेन मनःसमाधियोग्यतामापाद्यात्मानंपश्यन्तीत्यर्थः ॥ २४ ॥

अनिष्पन्नकर्मयोगाना म्मुमुक्षूणां कर्मयोगोपक्रमदशोच्यते -

अन्येतु - कर्मयोगादि ष्वप्यनधिकृताः । एवम् - पूर्वोक्तरीत्या । अजानन्तः - आत्मानंसाक्षात्कर्तुमशक्ताश्शिष्टाः । अन्येभ्यः - आत्मतत्त्वदर्शिभ्यः । श्रुत्वा - आत्मश्रवणंकृत्वा । उपासते - आत्मानंध्यायन्ति । तेपिच, अत्रापिचशब्दाभ्यामेषां निकृष्टत्वमन्येषां श्रेष्ठत्वंच सूच्यते ।

यावत्संजायते किंचित्सर्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगा त्तद्विद्धि भरतर्षभ ॥ २६ ॥

समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् ।
विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥ २७ ॥

श्रुतिपरायणाः - श्रवणमात्रनिष्ठास्सन्तः । मृत्युं - संसारम् । अतितर न्त्येव - अतीत्यवर्तन्तएव । श्रवणनिष्ठाविध्वस्तपापाःक्रमेणकर्मयोगज्ञा नयोगद्वारा समाधियोग्यतामासाद्य मुच्यन्तएवेतिभावः ॥ २५ ॥

अथप्रकृतिसंसृष्टात्मनो विवेकानुसन्धानप्रकारं वक्तुं स्थावरजंग मात्मकस्य प्रपंचस्य चिदचित्संसर्गं जन्यत्वमाह -

हेभरतर्षभ । यावत । किंचित - किंचिदपि । स्थावरजंगमम् । सत्त्वं - जन्तुजातम् । संजायते । तत् - सर्वम् । क्षेत्रक्षेत्रज्ञसंयोगा देव विद्धि - अनादिपरस्परसंयुक्त क्षेत्रक्षेत्रज्ञसंयोगजं विद्धि ; नतु मातापित्रादि संसर्गादेव कदाचित्संसर्गादेववा जायत इत्यर्थः ॥ अतो दुर्विवेचतया परस्परविवेकानुसन्धान मुपदेष्टव्य मिति भावः ॥ २६ ॥

सर्वेषु भूतेषु - देवमनुष्यादिरूपेषु । तिष्ठन्तं - मृत्सुवर्णादि घटेषु गंगाजळमिव तत्तद्विविक्ताकारतया स्थितम् ; नतु रुमानिक्षिप्त काष्ठवत्तद्रूपतामापन्नम् । अतएव । समं - ज्ञातृत्वैकाकारतयैक रूपम् । अतएव, परमेश्वरं - तत्तच्छरीराधिष्ठातृतया त्यन्ततद्विविक्ता कारम् । तेषु । विनश्यत्सु - विनाशंप्राप्नुवत्सुसत्सु । अविनश्यन्तं - विना ज्ञानैकस्वभावतया नाशरहितम् । यः । पश्यति - अनुसंदधाति । सः ।

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९॥

पश्यति - यथावत्साक्षात्करोति । यस्तु मनुष्यादिदेहवैषम्ये नात्मानमपि विषमाकारं जन्मनाशवन्तं चानुसन्दधाति सतु नित्यं संसरतीति भावः ॥ २७ ॥

उक्तसमदर्शन मेव फलद्वारा स्तूयते –

हि - यस्मात्कारणात् । सर्वत्र - देवमनुष्यादि देहेषु । समव स्थितं - सम्यगवस्थितं , शेषत्वेनाधारतया नियंतृतयाचावस्थितं । ईश्वरं - जीवम् । समम् - ज्ञातृत्वैकाकारतया एकरूपम् । पश्यन् । आत्मना - मनसा । आत्मानं - स्वात्मानम् । नहिनस्ति - संसारार्णवेनिक्षिप्य ननिहन्ति , किंतुसंसारसागरादुत्तार्यो ज्जीवयतीत्यर्थः । तदेवाह (ततइति) ततः - ज्ञातृत्वैकाकारतया सर्वत्र समत्वदर्शनात् । परां - उत्कृष्टाम् । गतिं - गम्यत इतिगतिः प्राप्यं , तां - परिशुद्ध स्वरूपमात्मानम् । याति - प्राप्नोति । अनेनस्वस्वाकारयथावद्दर्शन द्वारा बन्धहेतुत्वमोक्षहेतुत्वाभ्यां विवेक उक्तो भवति ॥ २८ ॥

अथैतयो स्साक्षात्क्रियाश्रयत्व तदभावाभ्यां विवेकमाह -

यः - योगी । सर्वशः कर्माणि - सर्वप्रकाराणिकर्माणि । प्रकृत्यैवच । क्रियमाणानीति । पश्यति - ' कार्यकारणकर्तृत्वेहेतुः प्रकृतिरुच्यत ' इति

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥

अनादित्वान्निर्गुणत्वा त्परमात्मा यमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

पूर्वोक्तरीत्या प्रकृतिक्रियमाणतया ऽनुसन्धत्ते । तथा । आत्मानम् । अकर्तारं - ज्ञानैकाकारतया उदासीनम् । यः पश्यति । तस्यप्रकृति संसर्ग तदधिष्ठानसुखाद्यनुभवादिकंच कर्मरूपा विद्याकृत मित्यपि पश्यतीति बोध्यम् । सः । पश्यति - यथावस्थितमात्मानं जाना तीत्यर्थः ॥ २९ ॥

अथैतयोः परिणामित्वा परिणामित्वाभ्यां विवेकंदर्शयति -

यदा - यस्मिन्काले । भूतपृथग्भावं - भूतेषु - तिलतैलवद्दारुव ह्निवद्दुर्विवेच प्रकृतिपुरुषद्वयात्मकेषु देवमनुष्यादिषु , पृथग्भावं - देवोहम्मनुष्योहं स्थूलोहंकृशोह मित्याद्यनुभूयमानं जातिगुणादिरूपं भेदम् । एकस्थं - प्रकृतिमात्रनिष्ठम् , नत्वात्मनिष्ठम् । ततएवच - प्रकृतितएवच । विस्तारं - पुत्रपौत्रादिवृद्धिंच । पश्यति । यद्यपि - आत्मावैपुत्रनामासी त्यात्मनएव पुत्रादिरूपेणपरिणामः श्रूयते , तथापि अंगादंगात्सम्भवतीति मन्त्रलिंगात्पित्रादिशरीरा त्पुत्रादि शरीरोत्पत्ति र्निर्णीयतइतिभावः । तदा - तस्मिन्काले । ब्रह्म - अपरिच्छिन्नज्ञान रूपमात्मानम् । सम्पद्यते - प्राप्नोति । सत्समानाकारोभवतीत्यर्थः ।

पूर्वोक्तेष्वात्मनो नित्यत्वा कर्तृत्वा परिणामित्वेषु हेतुमाह -

हेकौन्तेय । अयम् । परमात्मा - शरीरान्निष्कृष्य स्वस्वभावेन निरूपितः प्रत्यगात्मा । शरीरस्थोऽपि । अनादित्वात् - आरम्भक

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देही तथात्मा नोपलिप्यते ॥ ३१ ॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रंक्षेत्री तथाकृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

द्रव्यशून्यत्वात् । अव्ययः - नाशरहितः । आरभ्यमाणमेवहिनश्यति, आत्मात्वनारभ्यमाणत्वा न्ननश्यतीति भावः । निर्गुणत्वात् - सत्त्वा दिगुणरहितत्वात् । नकरोति - कर्तानभवति । तस्मात् । नलि प्यते - देवादिदेहस्वभावैः, लिप्तः - बाधितोनभवति ॥ ३१ ॥

ननुनित्यं कश्मलशरीरसंयुक्तो विविक्तात्मा रुमानिक्षिप्तकाष्ठ वत्संसर्गस्वभावैः किमिति नलिप्यते, किंच " यंप्राप्याति पवित्राणि वस्त्राण्याभरणानिच । अशुचित्वं क्षणाद्यान्तिकोन्यो ऽशुचितमस्ततः " इत्यभियुक्तोक्तरीत्या क्षणमात्रेणा शुचित्वापादकस्य शरीरस्य नित्ययोगेपि कथं नलिप्यते ? तत्राह -

सर्वगतं- अनन्तविचित्र स्वभाव नानावस्तुसंसर्गमपि । आकाशम् । सौक्ष्म्यात् - सूक्ष्मत्वात् ; आत्मनो ऽसंगस्वभावत्वादिति यावत् । यथा । नोपलिप्यते - तत्स्वभावोपरक्तं नभवतीत्यर्थः । तथा । सर्वत्र । देहे - देवमनुष्यादिदेहेषु । अवस्थितोपि । आत्मा । नोप लिप्यते - परिशुद्धतया - आकाशादप्यतिसूक्ष्मतया देहस्वभावैर्नोप लिप्यत इतिभावः ॥ ३२ ॥

अथाध्यायादावेवोक्तं क्षेत्रक्षेत्रज्ञयो र्वेद्यत्ववेदितृत्वादिभेदं सदृ ष्टान्तं विशदं वदन्नुपसंहरति -

हे भारत । एकः । रविः । कृत्स्नम् । विचित्रभेदाभिन्नम् । इमम् । लोकम् । प्रकाशयति - स्वप्रभया विशदी करोति । तथा - क्षेत्री - क्षेत्रज्ञोपि । कृत्स्नं - क्षेत्रं - नानाविधं शरीरम् । प्रकाशयति ।

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

इति श्रीभगवद्गीतायां त्रयोदशोऽध्यायः

बाहिरंतश्च स्वज्ञानव्याप्त्या विशदीकरोति । अतः प्रकाश्याल्लोकात्प्रकाशयिता ऽऽदित्य इव वेद्यात्क्षेत्राद्विदिता ऽन्यइतिभावः ॥ ३३ ॥

अथैतदध्याय प्रधानप्रतिपाद्य हेयोपादेय विज्ञानस्य फलमाह –

एवं - उक्तप्रकारेण । क्षेत्रक्षेत्रज्ञयोः । अन्तरं - भेदम् । भूतप्रकृतिर्मोक्षंच – भूतानां - अचित्संसृष्टजीवानाम् , प्रकृतिः - प्रकृति परिणामभूतं शरीरम् । मोक्ष्यते · त्यज्यते - अनेनेति – भूतप्रकृति मोक्षः – अमानित्वादि साधनवर्ग इति यावत् , तम् । ज्ञानचक्षुषा - ज्ञानं विवेकरूपं , तदेव - चक्षुः , तेन - येविदुः यथावज्जानन्ति । ते । परं - परिशुद्धात्मानम् । यांति - प्राप्नुवन्ति । उक्तेनक्षेत्रक्षेत्रज्ञ विवेकेनामानित्वादिसाधन संपत्त्याच विगतबन्धाः परिशुद्धात्मानं प्राप्नुवन्तीत्यर्थः। ३४॥ ।

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीरस्तु ।

अथ चतुर्दशोऽध्यायः ।

श्रीभगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयस्सर्वे परां सिद्धिमितोगताः ॥ १ ॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायंते प्रलये न व्यथंतिच ॥ २ ॥

पूर्वं त्रयोदशाध्याये तिलतैलवत्परस्परं संसृष्टयोः प्रकृतिपुरुषयो[illegible]स्स्वरूपयाथात्म्यं विज्ञाय भगवद्भक्त्यनुगृहीतामानित्वा[illegible] वर्गेण बन्धान्मुच्यते, पूर्वपूर्वसत्त्वादिगुणकार्यसुखादिसंगम [illegible] इति चोक्तम् । इदानीं चतुर्दशाध्याये गुणानां बन्धहेतुत्वप्रकारं गुणनिवर्तनप्रकारंच प्रपंचयिष्यन् भगवानुवाच ।

परं - पूर्वोक्तादन्यत । ज्ञानानां - प्रकृतिविषयाणामेव ज्ञानानां मध्ये । उत्तमं - श्रेष्ठम् । ज्ञानं - प्रकृतिगुणसत्त्वादिविषयमेवज्ञानम् । भूयः - पुनरपि । प्रवक्ष्यामि - प्रकर्षेण कथयिष्यामि । यत - ज्ञानम् । ज्ञात्वा - सविशेषं विज्ञाय । मुनयः - तन्मननशीलाः । सर्वे - ज्ञानिनः । इतः - अस्मात्संसारमण्डलात । परां - उत्तमाम् । सिद्धि - परिशुद्धात्मप्राप्तिरूपाम् । गताः - प्राप्ताः ॥ १ ॥

पुनरपितदेवज्ञानं - विशिनष्टि । (इदमिति)

इदं - वक्ष्यमाणम् । ज्ञानम् । उपाश्रित्य [illegible] मम । साधर्म्यं - अकर्मवश्यत्वादिना साम्यम् । आगताः पुमांसः ।

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
संभवस्सर्वभूतानां ततो भवति भारत ॥ ३ ॥
सर्वयोनिषु कौंतेय मूर्तयस्सम्भवंति याः ।
तासां ब्रह्म महद्योनि रहं बीजप्रदः पिता ॥ ४ ॥

सर्गेपि - सृष्टिकालेपि । नोपजायन्ते - ब्रह्मादिषूत्पद्यमानेष्वपि नोत्पद्यंत इत्यर्थः । प्रळयेपि - ब्रह्मादीनां प्रळये । नव्यथन्ति - प्रळयदुःखंना नुभवन्ति ॥ २ ॥

अथ सत्त्वादीनां बन्धहेतुत्वं वक्तुं कृत्स्नस्य स्थावर जंगमात्मकस्य प्रपंचस्य प्रकृतिसंसर्गजन्यत्वं स्वेनैव कृतमित्याह ।

हे भारत। योनिः- 'भूमिराप' इत्यादिना· 'अपरेयमित स्त्वन्या' मित्य न्तेनोक्तं जगत्प्रकृतिभूतम् । महत - अपरिच्छिन्नम् । ब्रह्म - महदादि कार्यं बृंहणम् , तत्प्रादुर्भावकारणम् । मम - मत्सम्बन्धि , मच्छेष भूतमित्यर्थः । तस्मिन् - भोगक्षेत्रेप्रधाने । अहं । गर्भं - ब्रह्मादिप्रा- णिवर्गबीजभूतं भोक्तृपुञ्जरूपं गर्भम् । दधामि - निक्षिपामि , भोगक्षेत्र भूतयाऽचेतनप्रकृत्यासह भोक्तृपुंजरूपां चेतनप्रकृतिं संयोजयामीत्यर्थः । ततः - चेतनाचेतनसंसर्गात् । सर्वभूतानां · ब्रह्मादि स्तम्बपर्यन्तानां प्राणिनाम् । सम्भवः - उत्पत्तिः । भवति ॥ ३ ॥

कारणावस्थचिदचित्प्रकृतिद्वयसंसर्गस्य स्वकृतत्वमुक्त्वा कार्या वस्थचिदचित्प्रकृतिद्वयसंसर्गस्यापि स्वकृतत्वमाह ।

हे कौन्तेय । सर्वयोनिषु · देवयक्षराक्षसमनुष्यपशुपक्षिसरीसृ- पादियोनिषु । याः । मूर्तयः- कार्यभूततत्तद्व्यक्तयः । सम्भवन्ति- जायन्ते । तासां - मूर्तीनाम् । महत - महदादिपृथिव्यन्तपरिणतम् । ब्रह्म - प्रकृतिः । योनिः - मातृस्थानीयकारणम् । अहं - सर्वज्ञः ।

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥
तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसंगेन बध्नाति ज्ञानसंगेनचानघ ॥ ६ ॥

बीजप्रदः - तत्तत्कर्मानुगुण्येन जनिष्यमाणभोक्तृवर्गरूपगर्भाधान हेतुः । पिता - जनकः ॥ ४ ॥

एवं प्राचीन कर्मवशात्सर्गादौ सत्त्वादिगुणसंसर्गेण देवादियोनिषु जातानां भूतानां पुनःपुनर्देवादिभावेन जन्महेतुमाह -

हे महाबहो - महांतौ - प्रकृतिगुणायत्तबन्धनिबन्धनायोधनसमर्थौ, बाहूयस्येति प्रकृतिगुणैर्युध्यमानपुरुषबन्धे निदर्शनतया सम्बोधनम् । रजस्तमइति । गुणाः - पृथिव्यादीनां गन्धादयइव प्रकृत्याख्यद्रव्यस्वरूपानुबन्धिनः स्वभावविशेषाः । प्रकृतिसम्भवाः - प्रकृतितः स भवन्ति - महदादिष्वाविर्भवंतीति तथाभूतास्सन्तः । पृथिवीतः पुष्पादिषु गन्धादय इवेतिभावः । अव्ययम् - स्वभावतो नविद्यते - व्ययः - सत्वादिकृतज्ञानसंकोचः - यस्यतं । तथापि - देहे - वर्तमानम् । देहिनं - महदादिपृथिव्यन्ततत्त्वारब्धदेहसन्ततिमंतं पुरुषम् । निबध्नन्ति - पुनःपुनर्देवमनुष्यादिरूपेणोत्पादयं तीत्यर्थः ॥ ५ ॥

सत्त्वादीनां निबन्धनप्रकारमेवाह - (तत्रेति)

तत्र - सत्त्वरजस्तमसाम्मध्ये । सत्त्वम् - सत्त्वगुणः । निर्मलत्वात् - प्रकाशविरोधितमस्स्वभावरूपमलरहितत्वात , प्रकाशमात्र जनन स्वभावत्वादिति यावत । प्रकाशकं - वक्ष्यमाणरीत्या प्रकाशसुखहेतु भूतमित्यर्थः । अनामयं - नविद्यते , आमयः - कार्यभूतोव्याधिः , यस्य तत । रजस्तमसोर्व्याधिहेतू इदं त्वारोग्यहेतुरित्यर्थः । हेअनघ - न

रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् ।
तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

विद्यते, अयं- पापरूपबन्धहेतुसुखसंगः, यस्यतथाभूत ; ' किंनोराज्येन गोविन्द किंभोगै ' रित्युक्तेः सुखसंगराहितेति भावः । सुखसंगेन सुखासक्त्या । ज्ञानसंगनच ज्ञानासक्त्याच । बध्नाति, देहिनामित्यत्राप्यनु षज्यते । सत्त्वं पूर्वकर्मानुगुण्येन पुरुषस्य सुखासक्तिं ज्ञानासक्तिंच जनयति । सुखज्ञानसंगेजाते तत्साधनेषु लौकिकवैदिककर्मसुप्रवर्तते, पुनस्त त्फलानुभवार्थं योनिसंबन्धइति बीजांकुरवदनादिरयंबन्धः सुख ज्ञानसंगद्वारेण सत्त्वसाध्य इति भावः । अनेन ज्ञानसुखजनकं सत्त्वमित्युक्तं भवति ॥ ६ ॥

हे कौन्तेय । रजः - रजोगुणः । रागात्मकं - रागः - योषित्पुरुषयो रन्योन्यस्पृहा, तदात्मकं - तद्धेतुभूतम् । तृष्णासंगसमुद्भवं - तृष्णा- शब्दादिसकलविषय स्पृहा, संगः - पुत्रमित्रादिसंबन्धिषु संश्लेष स्पृहा, तयोः - समुद्भवं - उत्पत्तिस्थानम् । विद्धि - जानीहि । तत् - रजः । कर्मसंगेन - तद्धेतुभूतक्रियासु स्पृहा जननद्वारेण । देहिनं निबध्नाति । विषयस्पृहया तद्धेतुभूतक्रियास्पृहातया तदनुष्ठानम्, त- त्फलानुभावार्थं पुनःपुनः योनिसंबन्ध इति कर्मसंगद्वारेण रजो बन्धहेतुरित्यर्थः ॥ ७ ॥

तमस्तु - तमोगुणस्तु । अत्रतुशब्देन पूर्वोक्तगुणद्वयापेक्षयाऽस्या त्यंतपरिहरणीयत्व मुच्यते । अज्ञानजं - अज्ञानं - वस्तुतत्त्वज्ञान व्यतिरिक्तं विपरीतज्ञानं, तस्माज्जातं, वस्तुविपरीतज्ञानजन्यपापा नुष्ठान कार्यमित्यर्थः । सर्वदेहिनां - ब्रह्मादिप्राणिनाम् । मोहनं -

सत्त्वं सुखे संजयति रजः कर्माणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजस्सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा ॥ १० ॥

विपरीतज्ञान जनकंच । विद्धि । हेभारत । तत् - तमः । प्रमादाल-स्य निद्राभिः - प्रमादः - अनवधानता , विहितादन्यत्र प्रवृत्तिरिति यावत् ; आलस्यं - विहितेषु यथाकालमप्रवृत्तिः ; निद्रा - इन्द्रिय प्रवर्तनश्रान्तस्य पुरुषस्य सकलेन्द्रिय व्यापारो परतिः ; तत्र बाह्येंद्रिय व्यापारो परति स्स्वप्नः , मनसोपि व्यापरो परति स्सुषुप्तिरिति विवेकः ; ताभिः । देहिनम् । निबध्नाति । पूर्वपूर्वविपरीतज्ञानेन पापानुष्ठानं - तेनतमः - इत्यादि प्रकारेण बन्धकं तम इत्यर्थः ॥ ८ ॥

बन्धहेतुत्वे सत्त्वादीनां प्रधानव्यापारानाह -

हे भारत । सत्त्वं - सत्त्वगुणः । सुखे संजयति - दुःखशोकादि हेतुसत्त्वेपि तदभिभवेन सुखेतद्धेतुज्ञानेच संश्लेषयतीत्यर्थः । रजः - रजोगुणः । कर्मणि । सुखदुःखादिहेतुसत्त्वेपि तदभिभवेन रागतृष्णादिद्वारा ऽभिमतहेतुकर्मण्येव संश्लेषयतीत्यर्थः । तमस्तु - तमोगुणस्तु । ज्ञानं - वस्तुयाथात्म्यज्ञानम् । आवृत्य - आच्छाद्य । प्रमादउत । संजयति । विपरीतज्ञानजननद्वारा कर्तव्यविपरीतव्यापारेपि संगंजनयतीत्यर्थः । उतशब्दादालस्यादावपीत्यर्थः ॥ ९ ॥

ननु देहाकारपरिणतायाः प्रकृतेस्स्वरूपानुबन्धिन स्सत्त्वादयो गुणाः कथमेवं परस्परविरुद्धकार्यकरा भवन्तीत्यत्राह (रजइति)

हे भारत । सत्त्वं - सत्त्वगुणः । रजः . रजोगुणम् । तमश्च - तमोगुणंच । अभिभूय - तिरस्कृत्य । भवति - उद्भवति । यथावातपित्तकफानाम्मध्ये तत्तदुद्रेककराहारसेवात स्तत्तत्कर्मानुगुण्येन चैकै

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ॥ ११ ॥
लोभः प्रवृत्तिरारंभः कर्मणामशमस्स्पृहा ।
रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥

कस्योद्भवः इतरयोस्त्वभिभवः, तथासात्त्विकाहारसेवया कर्मानुगुण्ये नच कदाचित्सत्त्वस्यैवोद्भवः - इतरयोस्त्वभिभवश्चेत्यर्थः । एव मुत्तरयोरपि द्रष्टव्यम् । तथा । रजः - रजोगुणः । सत्त्वं - सत्त्वगुणम् । तमश्चैव । अभिभूय । भवति - उद्भवति । तमः - तमोगुणः । सत्त्वं - सत्त्वगुणम् । रजः - रजोगुणंच । अभिभूय । भवतीत्यन्वयः ॥ १० ॥

एतच्च यथानुभवं कार्योपलब्धेरेवावगच्छतीत्याह -

अस्मिन् - आत्मनोभोगायतने । देहे । सर्वद्वारेषु - सर्वेष्वपि द्वारेषु श्रोत्रादिषु । ज्ञानं - शब्दादिज्ञानात्मकः । प्रकाशः । यदा - यस्मिन्काले । उपजायते - उत्पद्यते । तदोत - तस्मिन्कालेपि । सत्त्वं सत्वगुणः । विवृद्धः । इति विद्यात - प्रकाशलिंगेन सत्त्वोद्भवं जानीयात । उतशब्देन - सुखेनापि जानीयादित्यर्थः । अतस्सुखप्रकाशादि कार्यमपि तद्वृद्धिदशायामेवेति भावः ॥ ११ ॥

हे भरतर्षभ । रजसि - रजोगुणे । विवृद्धे - उद्भूतेसति । लोभः- स्वकीयद्रव्यस्यात्यागशीलता । प्रवृत्तिः - प्रयोजनमनुद्दिश्यापि च पलस्वभावता । कर्मणां - फलसाधनभूतानां कर्मणाम् । आरम्भः - उपक्रमः । अशमः - इन्द्रियाणामनुपरमः, इदंकृत्वेदमिदंकरिष्या मीत्यादिसंकल्पविकल्पानुपरमः । स्पृहा - विषयेच्छा । इत्येतानि कार्याणि जायन्ते । यदालोभादयोजायन्ते - तदा रजःप्रवृद्धमिति जानीयादित्यर्थः ॥ १२ ॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एवच ।
तमस्येतानि जायंते विवृद्धे कुरुनन्दन ॥ १३ ॥
यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत ।
तदोत्तमविदाँल्लोकानमलान् प्रतिपद्यते ॥ १४ ॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते ।
तथा प्रलीनस्तमसिमूढयोनिषुजायते ॥ १५ ॥

हे कुरुनन्दन । अप्रकाशः - विषयेज्ञानानुदयः । अप्रवृत्तिः - स्तब्धता । प्रमादः - अकार्यप्रवृत्तिहेतु श्चित्ते कार्यत्वाभावः । मोहएवच - विपरीतज्ञानंच । इत्येतानि । तमसि विवृद्धे जायन्ते । एभिस्तु तमो वृद्धिं जानीयादित्यर्थः । वातादिव्याधीना मुल्बणता मिव सांसारिकगुणत्रयस्योल्बणतां तत्तत्कार्यविशेषोद्भवेन ज्ञात्वा चिकित्सां कुर्यादितितात्पर्यम् ॥ १३ ॥

अन्त्यकाले रजस्तमस्समुद्भवहेतूनामाहारादीनां परिहारार्थ मन्त्यकाले प्रवृद्धानां गुणानां पृथक्फलान्याह -

यदा - यस्मिन्काले । देहभृत - चेतनः । सत्त्वेतु - सत्वगुणेतु । प्रवृद्धे - उल्बणेसति । प्रळयं - देहनिवृत्तिरूपम्मरणम् । याति - प्राप्नोति । तदा - तस्मिन्काले । अमळान् - परिशुद्धान् । उत्तमविदां - सर्वोत्तरात्मतत्त्वविदाम् । लोकान् - समूहान् । प्रतिपद्यते - प्राप्नोति । यदा सत्त्वं प्रवृद्धंभवति- तदैव जीवोम्रियतेचेत् - आत्मयाथात्म्यविदायतनेषु जनित्वाऽऽत्मयाथात्म्यज्ञानसाधने परमपुण्येऽ धिकारीभवतीत्युक्तं भवति ॥१४॥

अत्र श्लोके प्रवृद्धइतिपदं पूर्वश्लोकादनुवर्तते । रजसि - रजोगुणे । प्रवृद्धेसति । प्रळयं - मरणम् । गत्वा - प्राप्य । कर्म

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलं ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥
सत्वात्संजायते ज्ञानं रजसो लोभ एवच ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेवच ॥ १७ ॥

संगिषु - फलसंगेन कर्म कुर्वत्सु । जायते । यदा रजः प्रवृद्धं - तदा मृतः काम्यकृदायतनेषु जनित्वा काम्यकर्मस्वेवाधिकारीभवतीत्युक्तं भवति । तथा । तमसि - तमोगुणे । प्रवृद्धे सति । प्रलीनः - मृतः । मूढयोनिषु - चंडालपश्वादियोनिषु । जायते । सकलपुरुषार्थानर्हजातिषूत्पद्यतइत्यर्थः ॥ १५ ॥

एवं अन्तकाले सत्त्वादिगुणविवृद्धिफल मात्मविदायतनोत्पत्त्यादिकमुक्त्वा तत्फलमाह-

सुकृतस्य - आत्मवित्कुलोत्पन्नकृतस्य फलाभिसन्धिरहितस्य । कर्मणः - मदाराधनरूपस्य । सात्त्विकं - इतो ऽधिकसत्वप्रधानम् । निर्मलं - दुःखलेशसम्बन्धरहितम् । फलम् । आहुः । सत्वगुणपरिणामतत्त्वविदइत्यर्थः । रजसस्तु - अन्तकालप्रवृद्धरजोगुणस्यतु । दुःखं - दुःखप्रायकाम्यकर्मानुष्ठानपरम्पराम् । फलम् । आहुः । रजःपरिणामतत्त्वविदोवदन्तीत्यर्थः । अन्तकाले रजःप्रवृद्ध्या राजसगृहजन्म - तेन पुनःपुनः काम्यकर्मानुष्ठानं - इत्येवं परम्परया दुःखमिश्रमेवफलं भवतीति भावः । तमसः - अन्त्यकालप्रवृद्धतमोगुणस्य । अज्ञानं - अन्त्यजातीय जन्मादिनाऽज्ञानपरं पराऱूपं - फलम् । आहुः - तमःपरिणामतत्त्वविदो वदन्तीत्यर्थः ॥ १६ ॥

एवमुत्तरोत्तराधिकसत्त्वादिजनितनिर्मलफलादिकं किमित्यत्राह -

सत्त्वात् - आत्मवित्कुलजन्मादिक्रमेणोत्पन्नादधिकसत्त्वात् । ज्ञानं - आत्मयाथात्म्यापरोक्षरूपं ज्ञानम् । जायते । तथा - रजसः

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठंति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

एवच - राजसकुलजन्मादिना प्रवृत्ताद्रजोगुणादेव। लोभः - स्वर्गादिष्वति संगरूपः। जायते। एवम्। तमस एवच। प्रमादमोहौ — प्रमादः - असत्कर्मप्रवृत्तिहेतुरनवधानता, मोहः - विपरीतज्ञानंच त्युभौ। भवतः। अज्ञानं - ज्ञानाभावश्च। भवतीति वचन व्यत्ययेन योज्यम्। विपरीतज्ञानाच्चण्डालपश्वादियोनिषु जन्म, ततश्चज्ञानाभाव इत्यर्थः ॥ १७ ॥

ततोपि किंनित्यत आह -

सत्वस्थाः - अधिकसत्वगुणनिष्ठाः। ऊर्ध्वं—उत्तरोत्तरोत्कृष्ट पदम्। गच्छन्ति। आत्मवित्कुलासंगकर्मानुष्ठानशुद्धसत्वादिपरंपरानिःश्रेणिकासमारोहणेन मुक्तिं प्राप्नुवंतीत्यर्थः। राजसाः - रजोगुणनिष्ठाः। मध्ये-ऊर्ध्वाधोलोकमध्यदेशएव। तिष्ठन्ति। विषयाभिलाष तत्साधनानुष्ठान तत्फलानुभवार्थ जन्मपुनर्विषयाभिलाषादि वात्यामण्डलोद्भ्रान्ता अन्तरालएव तिष्ठन्तीत्यर्थः। तामसाः-तमोगुणनिष्ठाः। जघन्यगुणवृत्तिस्थाः -जघन्यासु-नीचान्नीचतरासु, गुणवृत्तिषु - तमोगुणपरिणामेषु तिष्ठन्तीति तथाभूतास्सन्तः। अधः-निकर्षकाष्ठाभूतपदं। गच्छन्ति। तमसाविपरीतज्ञानं-तेन पापानुष्ठानं तेनचण्डालपशुतिर्यक्क्रिमि कीट तरुगुल्मलताकाष्ठ शिलादिमयाधोगतिभाजो भवन्तीत्यर्थः ॥ १८ ॥

ननु-ऊर्ध्वं गच्छन्ति सत्वस्था इति सत्वनिष्ठानां मुक्तिरुच्यते, गुणानेतानतीत्य त्रीनमृतमश्नुतइति गुणत्रयातीतानाम्मुक्तिरित्यनन्तरमेव वक्ष्यते, कथं विरुद्धमुभयंघटत इत्याशंक्य विषयव्यवस्थया घटयति -

नान्यंगुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परंवेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्म मृत्यु जरा [दुःखैर्वि] व्याधि विमुक्तोऽमृतमश्नुते ॥ २० ॥

यदा - यस्मिन्काले । सात्त्विकाहारसेवया ऽसंगकर्मानुष्ठानेनच रजस्तमोभिभवेनसत्त्वविवृद्धिदशायामित्यर्थः । द्रष्टा - विविक्तदर्शी जीवः । गुणेभ्यः - स्वानुगुणप्रवृत्तिषु कर्तृभ्यो गुणेभ्यः । अन्यम् । कर्तारम् । नानुपश्यति , गुणाएव सांसारिकप्रवृत्तिषु कर्तारः नान्यइति पश्यतीत्यर्थः । ननु आत्मवि दामपि तत्तद्गुणोल्बणतासमये प्रकाशादि तत्तत्कार्याणा मनुभव सिद्ध तया गुणकर्तृताज्ञानसम्भवात्तेषामपि भवद्भावापत्तिस्स्यादित्यत्राह - (गुणेभ्यश्च परंवेत्तीति) गुणेभ्यः - तत्तत्सांसारिक प्रवृत्ति कर्तृभ्यो गुणेभ्यः । परंच - अन्यमकर्तृस्वरूपमात्मानंच । वेत्ति - पश्यति । सः । मद्भावम् । अधिगच्छति । अयम्भावः आत्मनः परिशुद्धस्वभावस्यापि पूर्वपूर्व कर्ममूल गुण फल सङ्गनिमित्तं विविधकर्मसु कर्तृत्वं , स्वरूपत स्सकल सांसारिक प्रवृत्तिष्वकर्तेतिच यदासत्त्वविवृद्धया पश्यति , तदा स मद्भावं प्राप्नोतीति । अतएव विवृद्धसत्त्वस्य मुक्तिहेतुत्वं सांसारिक प्रवृत्तिहेतो रशुद्धसत्त्वस्य त्याज्यत्वंचे त्युभयमविरुद्धमिति विवेचनीयम् । ॥ १९ ॥

अयम्मद्भावः कीदृश इत्यत्राह -

देही - चेतनः । देहसमुद्भवान् । एतान् - पूर्व सविशेषं निरू पितान् । त्रीन् । गुणान् - सत्त्वादीन् । अतीत्य - सात्त्विकाहारसेवा द्युपबृंहितात्मज्ञानबलेनातिक्रम्य । जन्ममृत्युजरादुःखैः - जन्म - उत्पत्तिः , मृत्युः - मरणं, जरा - जीर्णता, तत्कृतैः दुःखैः । विमुक्त

अर्जुन उवाच ।

कैर्लिंगै स्त्रीन्गुणानेता नतीतोभवति प्रभो ।
किमाचारः कथं चैतां स्त्रीन्गुणा नतिवर्तते ॥ २१ ॥

श्रीभगवानुवाच ।

प्रकाशं च.प्रवृत्तिं च मोहमेवच पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥

त्यक्तस्सन् । अमृतं- परिशुद्धमात्मानम् । अश्नुते- अनुभवति । अयमेव तु मद्भाव इत्यर्थः ॥ २० ॥

अथ स्वावस्थाजिज्ञासया गुणातीतस्यान्तर बाह्यलक्षणानि पृच्छ न्नर्जुनउवाच –

हे प्रभो । कैः लिङ्गैः- कीदृशैरान्तरचिह्नैः । त्रीन् । गुणान् सत्त्वरजस्तमांसि । अतीतः । भवति । गुणातीतइति ज्ञेयइत्यर्थः । किमाचारः - कः आचारः यस्य सः । भवति । केनाचारेण बाह्यं चिह्नेनच गुणातीत इति ज्ञेयइत्यर्थः । कथंच- केनोपायेन । त्रीन् । गुणान् । अतिवर्तते - अतीतोभवति ॥ २१ ॥

द्वितीयाध्याये स्थितप्रज्ञस्यकाभाषेत्यादिना पृच्छतोऽर्जुनस्योत्तरे दत्तेपि पुनः प्रश्नो विशेषान्तरबुभुत्सयेति मत्वा प्रकारान्तरेणोत्तरं श्री भगवानुवाच । तत्रात्म व्यतिरिक्तानि वस्तूनि द्विविधानीष्टान्य निष्टा निच , तत्र गुणवश्यस्या निष्टतत्साधनेषु द्वेषः इष्टतत्साधनेषु निवृ त्तेषु पुनराकांक्षा लोकसिद्धा , गुणत्रयातीतस्य तद्विपरीत वृत्तरेव लक्षणमित्याह –

हे पाण्डव । संप्रवृत्तानि- स्वस्वविषयप्रसृतानि , अनिष्ट तत्साधन विषयाणीति यावत ; नद्वेष्टीतिक्रियान्वय स्वारस्यात् । प्रकाशच - सत्त्व कार्यभूत मवध्दवस्त्वा घ्यनिष्टावभासंच । मोहमेवच - तमः कार्यभूतं तेष्वेवेष्टतत्साधनत्व भ्रमंच । प्रवृत्तिंच - रजः कार्यभूतां तादृशभ्रमा

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३ ॥

धीनां तेषु प्रसक्तिंच । एतानि । नद्वेष्टि । निवृत्तानि - स्वस्वविषया प्रसृतानि - इष्टतत्साधन विषयाणीति यावत् ; नकांक्षतीतिक्रिया न्वयस्वारस्यात् । प्रकाशंच सत्त्वकार्यभूतमिष्ट वस्त्ववभासंच । मोहमेवच-तमःकार्यभूतां तेष्वत्यासक्तिंच । प्रवृत्तिंच - रजः कार्य भूतां तदधीनां तेषु प्रसक्तिंच। एतानि ; इष्टवस्त्ववभास तदासक्ति तद धीन तत्प्रसक्तीनां निवृत्तिमिति यावत् । नकांक्षति - पुनःपुन र्नाभिलषति । आत्ममात्रसक्तस्य तदतिरिक्तेष्टानिष्टप्राप्ति परि हाराभ्यां प्रयोजनाभावादिति भावः । 'एते वैनिरयास्तात स्थानस्य परमात्मन' इति स्वर्गस्वाराज्यपर्यंत सुखस्य तत्त्वतो ऽनिष्टत्वा त्तदिष्टत्वज्ञानं भ्रमरूपमिति ज्ञेयम् ॥ २२ ॥

गुणान्वितस्यापि शरीरस्य सतः कथमिष्टानिष्टसन्ततौ नवि क्रियत इत्यत्राह -

यः । उदासीनवत्- उदासीनेन तुल्यम् । आसीनः - तूष्णींस्थित इत्यर्थः । आत्मावलोकनतृप्त्या तद्व्यतिरिक्ते ऽनासक्त इतिभावः । अतएव । गुणैः - सत्त्वादिभिः । नविचाल्यते । एतदेव विवृणोति - (गुणाइति) गुणाः - सत्त्वादयः । गुणेषु - स्वस्वकार्येषु । वर्तंते - प्रव र्तते । इत्येव - एवमेवा नुसन्धाय । अवतिष्ठति - तूष्णीमवतिष्ठत एव। उदासीनव दित्यस्येदं विवरणम् । नविचाल्यत इत्येतदपि विवृणोति (नेंगतइति) गुणकार्यद्वेष कांक्षानुगुणं नप्रवर्तत इत्यर्थः ॥ २३ ॥

समदुःखसुखस्स्वस्थ स्समलोष्टाश्मकांचनः ।
तुल्यप्रियाप्रियोधीर स्तुल्यनिंदात्मसंस्तुतिः ॥ २४ ॥
मानावमानयोस्तुल्य स्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भ परित्यागी गुणातीतः स उच्यते ॥ २५ ॥

स्वस्थः - स्वस्मिन्नेवस्थितः, स्वात्मैकप्रियः । अतएव । समदुःख सुखः - समे - एकरूपे, दुःखसुखे- यस्यसः, पुत्रजन्ममरणाभ्या मप्य विकृतचित्त इत्यर्थः । अतएव । समलोष्टाश्मकांचनः - समानि - एक रूपाणि, लोष्टं - मृत्पिंडः, अश्मा - शिला, कांचनं - सुवर्णं, इत्येतानि यस्यसः । अतएव । तुल्यप्रियाप्रियः - तुल्यौ, प्रियाप्रियौ – इष्टानिष्ट विषयौ, यस्यसः । धीरः - धियं प्रकृत्यात्मविवेकं, राति - आदत्त इतिधीरः, प्रकृत्यात्मविवेक कुशलइत्यर्थः । एभिर्विशेषणैरांतर लक्षणान्युक्तानि । अथतत्कार्य बाह्यलक्षणान्याह (तुल्येति) तुल्य निन्दात्मसंस्तुतिः- तुल्ये - एकरूपे, निंदा- देहस्य रूप्यादिख्यापनं, आत्म संस्तुतिः - देहसौन्दर्यादिख्यापनंच, एते यस्यसः ; विविक्तात्मदर्शिन स्तस्मादत्यन्त विविक्तदेह निन्दास्तुत्योः परनिन्दास्तुत्यो रिवनाप्रीत्यादि संभवइतिभावः । अतएव । मानावमानयोस्तुल्यः - मूर्खाः पूजित पूजकाः इतिन्यायेन स्तुतिनिन्दाप्रयुक्त पुरस्कारतिरस्कारयो रविकृत चित्तः । अतएव । मित्रारिपक्षयोरपि तुल्यः । देहात्मदर्शिनां मान यितामित्रं भवति, अमानयिता ऽरातिर्भवतीति लोकसिद्धम्, विवि क्तात्मदर्शिनांतु देहमानावमानाभ्यां परमानावमानाभ्यामिव चित्त विकारा भवादितिभावः । अतएव । सर्वारंभपरित्यागी, आरभ्यन्त इत्यारंभाः - कृतप्रतिकृतरूपाणि कार्याणि, सर्वारम्भान् परित्यक्तुं शीलमस्येति तथाभूतः । एवं भूतः । यः । सः । गुणातीतः । उच्यते । एवंबाह्यांतरलक्षणै गुणातीत इति जानीयादित्यर्थः ॥ २५ ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥
ब्रह्मणो हि प्रतिष्ठाह ममृतस्याव्ययस्यच ।
शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्यच ॥ २७ ॥

इति चतुर्दशोध्यायः ।

अथैवं रूपगुणात्यय हेतुमाह,

यः- अनादिकाल प्रवृत्तविपरीतज्ञानवानपि योगी । अव्यभिचारेण- देवतांतरास्पर्शिना । भक्तियोगेन । मांच - सत्यसंकल्पं परमकारुणिक माश्रितवात्सल्यैक जलधिंच । सेवते । अत्र चशब्देन देहात्म विवेकस्समुच्चीयते । सः । एतान् गुणान् - दुरत्ययानापि सत्त्वादि गुणान् । अतीत्य - अतिक्रम्य । ब्रह्मभूयाय - ब्रह्मभावाय । कल्पते - योग्योभवति । यथावस्थितमात्मान ममृत मव्ययं प्राप्नोतीत्यर्थः । देहात्मविवेकमात्रस्या नादिकाल प्रवृत्तविपरीत वासना बाधनासामर्थ्या न्मद्भक्तियोगः प्रधानसहकारितया ऽऽवश्यक इतिभावः ॥ २६ ॥

अत्रहेतुमाह,

हि-यस्मात्कारणात्। अहं-अव्यभिचारिभक्तियोगविषय इत्यर्थः। अमृतस्य- नित्यस्य । अव्ययस्य च- ज्ञान संकोच रहितस्य च । ब्रह्मणः- परिशुद्धात्मनः । प्रतिष्ठा- प्रकाशनेनधारकः, तत्प्रापक इत्यर्थः । शाश्वतस्य- मद्भजनरूपस्य । धर्मस्य च- धर्मफलस्य च, इन्द्रप्रजापत्यैश्वर्यादप्युत्कृष्टैश्वर्यस्य चेत्यर्थः । प्रापकवचनोपि धर्मशब्दोऽत्र प्राप्य साहचर्यात्फलवचनः। ऐकान्तिकस्य- एकान्तिभिः- ज्ञानिभिः, प्राप्यस्य । सुखस्य च - रसोवैसः रसँह्येवायंलब्ध्वानन्दीभवतीति श्रुतिप्रति

पाद्य निरतिशय सुखस्य चेत्यर्थः । अहं । प्रतिष्ठा- धारकतया प्रापक इत्यर्थः । अत्र मध्यम षट्कप्रपंञ्चितैश्वर्य कैवल्य भगवल्लाभप्रदानं विविक्तात्म प्राप्तिहेतुत्वस्थापनार्थं मुक्तमिति मन्तव्यम् । एतदुक्तम्भवति - पूर्वत्र " दैवीह्येषागुणमयी मम मायादुरत्यया । मामेवये प्रपद्यन्ते मायामेतान्तरन्तिते ॥ " इत्यारभ्य गुणातिक्रमस्य तत्पूर्वकाक्षरैश्वर्य भगवत्प्राप्तीनां च भगवत्प्रपत्तिमात्र साध्यतायाः प्रतिपादितत्वा देकान्तभगवत्प्रपत्त्यैव गुणातीतत्वं तत्पूर्वक ब्रह्मप्राप्तिश्च भवतीति ॥ २७ ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर मुनिविरचितायां बालबोधिन्यपराभिधानायां गीतार्थसंग्रहदीपिकायां

चतुर्दशोध्यायः ॥ १४ ॥

श्रीरस्तु ।

अथ पञ्चदशोऽध्यायः ।

श्रीभगवानुवाच ।

ऊर्ध्वमूलमधश्शाख मश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

पूर्व त्रयोदशे प्रथम षट्कोदित प्रकृतिपुरुष याथात्म्यविवेचनं तत्र परिशुद्धस्यापि जीवस्य बीजांकुरव दनादिभ्यां भगवदाज्ञाति लंघन रूप दुष्कर्मानुष्ठान गुणफलसंगाभ्यां बन्धः प्रकृतिपुरुष विवेकसह कृतभगवद्भजनेन तन्निवृत्तिरिति चोक्तम् , इदानीं भजनीयस्य मध्य मषट्कोदितस्य परमात्मनो माहात्म्यं शोधयितुं बद्धमुक्तरूप विभूति मत्तां ताभ्यामपि व्यापनभरणस्वामित्वादिभि रत्यन्तवैलक्षण्यंच वक्ष्यन् संगमूलस्य बन्धस्या संग शस्त्रच्छेद्यत्व सिद्ध्यर्थं वृक्षरूप तां निरूपयन् श्रीभगवानुवाच –

ऊर्ध्वमूलं - ऊर्ध्वः - सप्तलोकोपरि निविष्ट श्चतुर्मुखः , मूलं - निदानं , यस्यतम् । अधश्शाखं , अधः - सत्यलोका दधोलोकाः पृथिव्यादयः , तेषु प्रसृताः नरपशुमृगादि रूपाश्शाखाः , यस्यतम् । अव्ययं , वैराग्यमूलकतत्त्वज्ञानपर्यन्तं प्रवाहरूपेणानुवर्तमानतया नाश रहितम् । अश्वत्थं - श्वः प्रातरपि स्थास्यतीति निश्चेतुमशक्यं संसारवृक्षमि त्यर्थः । उत्तरश्लोक वक्ष्यमाणस्य असंगशस्त्रेण छित्त्वेति वैराग्यछेद्यत्वस्य संगमूलक संसारस्यैवान्वय स्वारस्यात् । प्राहुः" ऊर्ध्वमूलो ऽवाक्शाखएषो ऽश्वत्थस्सनातन " इत्याद्याश्श्रुतय इत्यर्थः । छन्दांसि - ' वायव्यंश्वेतमाल

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।
अधश्चमूला न्यनुसन्ततानि कर्मानुबंधीनि मनुष्यलोके ॥ २ ॥

भैतभूतिकाम' इत्यादिकाम्य कर्मप्रतिपादकवेदाः। यस्य-संसार वृक्षस्य। पर्णानि- पत्रवद्वर्धकानि। तत्प्रतिपादितैः काम्यकर्मभिर्हि संसारोवर्धते। तं - संसाररूप मश्वत्थवृक्षम्। यः। वेद- यथावज्जा नाति। सः - पुमान्। वेदवित् - वेदयत्यपवर्गोपाय मिति वेदः - उत्तरभागः, तंवेत्तीतिवेदावित्। वेदोहि संसारवृक्षच्छेदनोपायं ज्ञानं वदति, छेद्यवृक्षस्वरूपज्ञानंच छेदनोपायज्ञानोपयोगीति संसार तत्त्वज्ञ एव वेदविदितिभावः ॥ १ ॥

एवंनैमित्तिकव्यष्टि सृष्टिमुक्त्वा नित्यसृष्टिप्रकारमाह -

तस्य - मनुष्यादि शाखस्य संसारवृक्षस्य। शाखाः - पूर्वशा खाभ्यः प्रसृताअपरशाखाः। अधश्च - मनुष्यलोकादिषु च। ऊर्ध्वंच- देवलोकादिषुच। प्रसृताः - तत्कर्मद्वारा तत्पुत्रपौत्रादि रूपेण पशु मनुष्य देवगन्धर्वादि रूपेण चोपशाखा उद्भूता इत्यर्थः। गुण प्रवृद्धाः, गुणैः - सत्त्वादिभिः, प्रवृद्धाः - जलसेकादिभिरिव वर्धिताः। विषयप्रवाळाः, विषयाः - शब्दादयएव, प्रवाळाः - पल्लवाः, यासा- न्ताः। पल्लवाहि वृक्षाग्रसंबन्धिनः, शब्दादयोपि संसारवृक्षाग्र भूत मनुष्यादीनां भोग्यतया संबन्धिनइतिभावः। तथाभूताश्च भवन्ती त्यन्वयः। ननूर्ध्वमूलस्य वृक्षस्याधश्शाखत्वम्मूलानुसाराद्भवतु, अधश्शाखानामूर्ध्वप्रसरणं कथमतआह (अधश्चेति) अधश्च - मनुष्य लोकेच। कर्मानुबन्धीनि - कर्मरूपाण्यनुबन्धीनि, वासनया ऽविच्छि न्नानि। मूलानि - शाखामूलानि। अनुसंततानि - व्याप्तानि। यथा प्रासादादि शिखरोत्पन्ना अधोलंबिन्योलताः क्षितिसंसर्गेण पुनस्सं चितमूला ऊर्ध्वं प्रसरन्ति, तद्वदेव मनुष्यादिशाखाअपि भूलोक

न रूपमस्येह तथोपलभ्यते नांतो नचादि र्नच संप्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूल मसंगशस्त्रेण दृढेन छित्वा ॥ ३ ॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंतिभूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

मागम्य तत्र संचितकर्मरूप मूलाः काश्चित्तत्रैव प्रसरन्ति काश्चिच्च देवलोकादौ प्रसरंतीतिभावः ॥ २ ॥

ननु सर्वप्रत्यक्षसिद्धे ऽस्मिन् संसारे ' यस्तं वेदे ' ति दुर्लभत्वाभिधानमयुक्तं , अतआह –

इह - संसारे । वर्तमानैः पुरुषैः । अस्य - संसारवृक्षस्य । रूपं- स्वरूपम् । तथा - पूर्वोक्तप्रकारेण । नोपलभ्यते । चतुर्मुखमूलत्वं तत्सन्तान परंपरया मनुष्यादि रूपेणाधोलोक संबन्धः मनुष्यत्वाव स्थायां संचितैः कर्मरूपमूलैः पुनरप्यधश्चोर्ध्वंच शाखोपशाखान्यायेन प्रसृतिरित्येवंविधं रूपं केनापि संसारस्य वैराग्येण विनाशप्रकारश्च नोपलभ्यते । आदिश्च - गुणफलसंगे नोत्पत्तिश्च । नोपलभ्यते । तथा । संप्रतिष्ठाच - स्थितिकारणंच , संसारमूलगुणफल संगस्यापि निदानं क्षेत्रादिस्थानीय मनात्मन्यात्मबुद्ध्यादिरूप मज्ञान मित्यर्थः ; तच्च । नोपलभ्यते । सर्वोऽपि संसारे मनुष्योऽहं देवदत्तपुत्रोहं , यज्ञदत्त पिता , अनुरूपभार्यो ऽहम् इत्येतावन्मात्रं जानाति नातो धिकं संसार यथावस्थित रूपमितिभावः । अतस्सर्वदा दुर्विज्ञेय स्वभावत्वा यथाशास्त्रमेव तन्निवर्तनयत्नं कुर्यादित्याह (अश्वत्थमित्यादि) सुविरूढमूलं - सुविरूढानि - सुष्टु- अनादि , विविधेचरूढानि , दुरुच्छेदानि विविधानि कायिकवाचिक मानसिकादिभेदेन विहितनिषिद्धादिभेदेन च बहुविधं निरूढानि, मूलानि - कर्मरूपाणि , यस्यतम् । एवं - पूर्वोक्तप्रकारम् । अश्वत्थं - संसारवृक्षम् । दृढेन - सम्यज्ज्ञानमूलत्वेनाति दृढेन । असंगशस्त्रेण - असंगः - गुणमयभोगेषु वैराग्यं , सएव शस्त्रं - कुठारः , तेन । छित्वा पृथक्कृत्य ॥ ३ ॥

ततः - असंगादेव । यस्मिन् - परिशुद्धात्मस्वरूपे । गताः - यत्स्वरूपं प्राप्ताः । भूयः - पुनरपि । ननिवर्तन्ति - नावर्तन्ते । तत्पदं-

निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ता स्सुखदुःखसंज्ञै र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

प्राप्यस्वरूपम् । परिमार्गितव्यं - 'वेदानिमंच लोकममुंच परित्यज्या त्मान मन्विच्छे' दिति श्रुत्युक्तरीत्या ऽन्वेषणीयमित्यर्थः । ननु अनादि कालप्रवृत्तो भोगसंगः तन्मूलविपरीतज्ञानंच कथं निवर्तत इत्यत्राह (तमेवेति) आद्यं - मया ऽध्यक्षेणप्रकृतिरित्या द्युक्तप्रकारेण जगत्कारण भूतम् । तमेवच - पूर्व षट्कप्रतिपादितं परमात्मानमेव । प्रपद्य - शरणमुपगम्य । अत्रैवकारेण यदाज्ञोल्लंघिता, स एवप्रसादद्वारा बन्ध निवर्तनाय शरणतया वरणीयइति सूच्यते । तथैव प्राचीनाचार माह (इयतइति) इयतः - अज्ञाननिवृत्त्यादेः कृत्स्नस्य संबन्धिनी, तत्साधनभूतेत्यर्थः । प्रवृत्तिः । पुराणी - चिरन्तनीसती । प्रसृता- अनुस्यूता । पुरातनाहिमुमुक्षवः 'तेषामेवानुकम्पार्थ महमज्ञान जन्तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वते' त्याद्युक्तरीत्या मच्छरणागतेरेवा ज्ञाननिवृत्त्यादि हेतुत्वमवगम्य तेनैव मार्गेणनिवृत्ता ज्ञाना विनिर्मुक्तबन्धा जाता इत्यर्थः । अनेनाशिष्टाचारः प्रदर्शितः । प्रपद्येयतःप्रवृत्तिरिति पाठेतु, यतः - यस्मात्परमपुरुषात् । प्रवृत्तिः - गुणमयभोग संग प्रवृत्तिः । पुराणी- पुरातनीसती । प्रसृता । आद्यं तमेवच, शरणम् । प्रपद्येत् - प्रपद्येतेत्यर्थः । प्रपद्येदिति परस्मैपदंछा न्दसम् । "दैवीह्येषागुणमयी मम माया दुरत्यया । मामेवये प्रपद्यन्ते मायामेतांतरन्तिते ॥" इत्याद्युक्तरीत्या, गुणमय भोग संगप्रवृत्तिमूल कारणं तमेव पुरुषमाद्यन्तन्निवृत्तयेपि शरणमुपगच्छेत, नान्योस्ति कश्चिदुपाय इतिभावः ॥ ४ ॥

तमेवार्थ प्रपंचयति -

निर्मानमोहाः - निर्गतः - मच्छरणागत्यानिवृत्तः, मानः - देहात्मा भिमानः, तद्रूपः - मोहः - येभ्यस्ते । अतएव । जितसंगदोषाः -

न तद्भासते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥ ६ ॥

जितः - संगः - गुणमयभोगा सक्तिरेव , दोषः - यैस्ते । अतएव । अध्यात्मनित्याः - अध्यात्मं- आत्मनिवर्तमानं, स्वात्मविषयं ज्ञानमित्यर्थः , तत्र , नित्याः - निरताः । अतएव । विनिवृत्तकामाः - विनिवृत्तः - विशेषेणानिवृत्तः , कामः - तदितरविषया संगः , येषान्ते । अतएव । सुखदुःखसंज्ञैः - सुखदुःखे इतिसंज्ञायेषान्तैः , अनुकूलप्रतिकूळ स्वभावै रित्यर्थः । द्वंद्वैः - शीतोष्णादिभिः । विमुक्ताः । अमूढाः - आत्मानात्म तत्त्वज्ञतया - सर्वभ्रमरहिताः । योगिनः । अव्ययं - ज्ञान संकोचरहितम् । तत् । पदं - अविच्छिन्नज्ञानै काकारमात्मानम् । गच्छन्ति - प्राप्नुवन्ति । मच्छरणागताना मेव तास्सर्वाः प्रवृत्तय स्सुशका स्सिद्धिपर्यन्ताश्च भवन्तीत्यर्थः ॥ ५ ॥

तदेव पदं विशिनष्टि -

तत् - प्रकाशरूपमात्मस्वरूपम् । सूर्यः । नभासयते-नप्रकाशयति । शशांकः - चन्द्रश्च । नभासयते । पावकः - अग्निश्च । नभासयते । किन्तुयोग एवावभासयतीति भावः । आदित्यादयोहि जडान् भास यन्ति , तानपिज्ञान मेव भासयति , आत्मानंतु योगएव भासयतीति भावः । संसारिणां त्वनादि कर्म योगविरोधि , तद्विरोधिच मच्छरणा गतिमूलक प्रसंगादिक मितिभावः । यत् - परिशुद्धात्मस्वरूपम् । गत्वा - प्राप्य । ननिवर्तन्ते - नपुनरावर्तन्ते । धाम - प्रकाशरूपम् । परमं - आदित्यादीनापि भासकम् । तत् - वस्तु । मम - मत्संबंधि विशेषणतया मदंशः । परमसाम्या पत्तिदशायापि मच्छेषभूत मेवेति भावः ॥ ६ ॥

ननुयदि जीवास्त्वदंशाः - तर्हि नित्यसूरिवर्गव त्सर्वेषां परि शुद्धाकारयोगः किं नस्यादित्यत्राह -

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनः षष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥

सनातनः - पूर्वोक्तरीत्या ऽनादिरनन्तः । मम । अंशएव - चिदचिद्विशिष्टे मयिविशेषणतयैकदेश श्चिदंश एव । जीवलोके - संसारे । जीवभूतः - अनादिकर्मरूपा विद्यावेष्टनेन जीवभावं प्राप्तस्सन् । प्रकृतिस्थानि - शरीरात्मक प्रकृतिनिष्ठानि । मनष्षष्ठानि - मनः - षष्ठं - येषान्तानि । इन्द्रियाणि । कर्षति । कश्चिदुक्तेन मार्गेणा विद्यायामुक्तः स्वरूपेणा वतिष्ठते , कश्चित्त्वनादिकर्मवेष्टित श्शरीरेंद्रिया द्यधिष्ठाता कर्मानुगुणं शरीरेंद्रियादिकं स्वभोगार्थं प्रेरयतीत्यर्थः ॥ ७ ॥

एवं परिशुद्धस्वरूपस्यात्मनो ऽनाद्यविद्यावेष्टनेन बन्धमुक्त्वा शरीरोत्क्रांति शरीरांतर गति प्रवाहक्लेश संतति सूचयन्नुत्क्रांत्यादि प्रकारमाह -

ईश्वरः - शरीरेंद्रियाधिष्ठाता जीवः । यत - यदा । शरीरं - देहांतरं । अवाप्नोति । यच्च - यदाच । उत्क्रामति - एकस्माच्छरीरादुत्तिष्ठति । तदा । वायुः । आशयात-कस्तूरिका कुंकुमचन्दनादिस्थानात । गन्धानिव - स्वाश्रयान् गन्धानिव । एतानि - मनः प्रभृतीनीन्द्रियाणि स्वाश्रयाणि । गृहीत्वा संयाति । यथा पुष्पादिकान्निष्क्रान्तो वायुः पेटिकां विहायातिसूक्ष्मान् पुष्पाद्यवयवानादाय गच्छति - एवमेव शरीरं विहायातिसूक्ष्म भूतसूक्ष्मेंद्रियादि संपरिष्वक्त एव शरीरान्तराणि प्रविशतीत्यर्थः ॥ ८ ॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेवच ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥
उत्क्रामंतं स्थितंवापि भुंजानं वा गुणान्वितं ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१० ॥

कानि पुनस्तानींद्रियाणि , यदर्थंच तत्संग्रहः , तद्वाकिमित्यत्राह-

श्रोत्रं , चक्षुः , स्पर्शनंच - स्वगींद्रियंच , रसनं , घ्राणमेवच - घ्राणेंद्रियंच , मनश्च , एतानींद्रियाणि । अधिष्ठाय - स्वस्वविषयोन्मुखानि कृत्वा । अयं - जनः । विषयान् - शब्दादीनेव । उपसेवते - उपभुङ्क्ते । नकदाचिदात्मान मित्यर्थः ॥ ९ ॥

अत्रहेतुमाह -

विमूढाः - देहात्माभिमानिनः । गुणान्वितं - गुणपरिणामशरीरसंसृष्टम् । स्थितंवापि - कर्मनिगळ बद्धतया कळेबराकारकारा गृहावस्थितंवापि । अतएव । उत्क्रामन्तं - प्रारब्धक्षये तस्माच्छरीरान्निष्क्रामंतं , तच्छरीरोत्क्रांति शरीरान्तर प्रवेशक्लेशा ननुभवंतमित्यर्थः । भुंजानं - विषसंसृष्ट मधुवच्छब्दादि विषया ननुभवंतंवा । नानुपश्यन्ति - कस्यांचिदप्यवस्थायां ज्ञानैकाकारतया ऽऽत्मानंनानुभवन्ति । स्वात्मान मपहरन्तीति यावत् । अत्रविमूढानानुपश्यन्तीति - स्वरूपतो मत्समानानपि मन्मायामोहयतीति भगवतस्सानुक्रोशवचनम् । ननुचेतनानां सर्वावस्था स्वनुपलब्धस्या सद्भाव एवेत्यत्राह (पश्यन्तीति) ज्ञानचक्षुषः- ज्ञानं- आत्मानात्मविवेकः , तदेवचक्षुर्येषांते , तेतु ज्ञानचक्षुषः । पश्यन्ति - सर्वावस्थासु ज्ञानैकाकार मात्मानं साक्षात्कुर्वन्त्येव । अत आत्मविषये जात्यंधानां देहात्माभिमानिना मनुपलब्धस्य तावन्मात्रेण नासद्भावएवांगी कार्य इति भावः ॥ १० ॥

यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं ।
यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥ ११ ॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥

ननु परिशुद्धात्मविषये जात्यंधानां संसारिणां कथं भगवल्लाभ इत्याशंक्य - नमेवचाद्यं पुरुषं प्रपद्येति पूर्वोक्तमेवार्थं मन्वयव्यतिरेकाभ्यां प्रपंचयति (यतन्तइति)

यतंतः - मत्प्रपत्तिपूर्वकं कर्मयोगाद्यनुतिष्ठंतः । अतएव । योगिनः - निर्मलेन मनसा ऽऽत्मावलोकनंकुर्वन्तः पुमांसः । आत्मनि - देहे । अवस्थितमपि । एनम् । पश्यन्ति - तद्विविक्तं परिशुद्धात्मानं पश्यन्ति । एतदेव व्यतिरेकेण दृढयति (यतंतइति) यतंतः - स्वातन्त्र्येण कर्माद्यनुतिष्ठंतः । अतएव । अकृतात्मानः असंस्कृतमनसः। अतएव । अचेतसः - आत्मावलोकन समर्थचित्तरहिताः । पुमांसः । एनं - देहादिविविक्तमात्मानम् । नपश्यन्ति । अतो मत्प्रपत्ति पूर्वककर्मयोगांजनोन्मिषित योगचक्षुषा विविक्तात्मा साक्षात्कर्तव्य इति भावः ॥ ११ ॥

एवं सूर्यादीना मपि भासकस्य ज्योतिरात्मनो मुक्तावस्थस्य बद्धावस्थस्य च विभूतित्वमुक्तम् ॥ इदानीमचित्परिणामसूर्यादिगत मपि तेजस्स्वविभूति रित्याह (यदिति)

आदित्यगतं-सूर्यायत्तमित्यर्थः । यत् । तेजः । अखिलं - कृत्स्नम् । जगत् । भासयते · प्रकाशयति । तथा । चन्द्रमसि । यत् । तेजः । जगत् । भासयते । अग्नौच । यत् । तेजः । जगत् । भासयते । तत् । तेजः । मामकं-मत्संबन्धि । विद्धि । सूर्यचन्द्राग्निभ्योपि मयैव दत्तं विद्धीत्यर्थः ॥ १२ ॥

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥
सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञान मपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ १५ ॥

रसात्मकस्य सोमस्यौ षधिपोषकत्व शक्तिरपि च भूतधारिण्याः पृथिव्या आधारत्वशक्तिरपि मदीयैवेत्याह –

अहम् । गां - भुवम् । आविश्य - अधिष्ठाय । ओजसा - अप्रतिहतसामर्थ्येन । भूतानि । धारयामि । रसात्मकः - अमृतांशुः । सोमः भूत्वा - तच्छरीरोभूत्वा । सर्वाः । ओषधीः - तृणगुल्मलता प्रभृतीः । पुष्णामिच - वर्धयामिच ॥ १३ ॥

जाठराग्नि गतपाकशक्तिरपि मदीयेत्याह –

अहम् । वैश्वानरः - जाठराग्निः, तच्छरीरः । भूत्वा । प्राणिनां – प्राणभृताम् । देहं - शरीरम् । आश्रितः - शरीरस्यांतः प्रविष्टः । प्राणापान समायुक्तः-प्राणापानाभ्यां - जाठरोद्दीपकाभ्यां प्राणवृत्ति विशेषाभ्यां, समायुक्तः – सहितः । ' समन्वित स्समानेन सम्यक्चरति पावक ' इतिशास्त्रानुसारा त्समानवृत्ति सहित स्सन्नपीतिबोध्यम् । चतुर्विधम् - खाद्यचोष्य लेह्यपेयादिकम् । अन्नम् ! पचामि-पक्वंकरोमि, रूपांतर परिणतं करोमीत्यर्थः ॥ १४ ॥

पूर्वंसोमजाठरयोः-सोमोभूत्वा - वैश्वनरोभूत्वेति-स्वविभूतित्वमुक्त्वा कृत्स्नस्यापि भूतजातस्या विशेषेण शरीरतया विभूतित्वमाह –

अहम् । सर्वस्यच-भूतजातस्यच । नकेवलं सोमवैश्वानरयोः, अपितुसर्वस्यापि । हृदि- ' पद्मकोशप्रतीकाशँ हृदयंचा

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते ॥ १६ ॥

प्यधोमुखम् ॥ ' इति , ' यदिदमस्मिन् दहरं पुण्डरीकं वेश्म ' इतिच श्रुतिप्रतिपादिते सकलप्रवृत्तिमूलज्ञानोदयदेशे । सन्निविष्टः- ' तस्य शिखाया मध्येपरमात्मा व्यवस्थितः ' इति, ' दहरो ऽस्मिन्नन्तर आकाशः ' इतिचानन्तर वाक्यद्वये परमात्माकाश शब्दाभ्यां दहर पुण्डरीक निष्ठतया निर्दिष्टश्चाहमित्यर्थः । अतएव । मत्तः । स्मृतिः- पूर्वानुभूत वस्तु विषयकं पूर्वानुभव जनित संस्कारमात्र जन्यं ज्ञानम् । अपोहनंच - अनेनैवं भविष्यतीत्यादि वस्तुस्वरूपयोग्यता पर्यालोचनंच । जायतइत्यर्थः । अत स्सोमाग्नीन्द्रादीना म्मच्छरीर तया - तत्प्रतिपादकैः - ' वायव्यँश्वेत मालभेते ' त्यादिभिः सर्वैः वेदैश्च । अहमेव - सर्वांतर्यामि भूतोऽहमेव । वेद्यः-ज्ञेयः । वेदांत कृत-वेदानां - इन्द्रं यजेत-वरुणंयजेतेत्यादीनाम् , अन्तः-फलम् , फलपर्यवसायिनोहिवेदाः , तत्करोतीति वेदान्तकृत । ' यो यो यां यां तनुं भक्त' इत्यारभ्य 'लभतेच ततःकामान् मयैव विहितान् हिता नि ' त्युक्तरीत्या फलप्रदाताचाहमेव। अहमेवच । वेदवित्- वेदतत्त्वार्थ वित् । अतो मत्त एव वेदसारार्थो ज्ञातव्य इतिभावः ॥ १५ ॥

एवं बद्धमुक्तयो स्सप्रपंचं स्वविभूतितां मुक्त्वा ताभ्यां मप्य व्ययत्व व्यापन भरणनियमनैरतिविलक्षणतया पुरुषोत्तमत्वं स्थाप यितु मुपक्रमते-

द्वौ - क्षरश्चाक्षरश्चेत्येव मुपाधिभ्यामेव द्वित्वसंख्या संख्यातौ , नतुस्वरूपत एव द्वावितिभावः , बद्धानां ' त्वंनेनो जनाधिपाः ' इत्यादौ , मुक्तानांच - ' बहवो ज्ञान तपसा पूतामद्भाव मागताः ' इत्यादौच बहुत्वप्रतिपादनात । एवंविधौ । पुरुषौ । लोके - लोक्यते सर्वमनेनेति लोकः- प्रमाणम् , तस्मिन् । क्षरश्च । अक्षरएवच ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

... थितौ- प्रमाण सिद्धावित्यर्थः । तत्र । सर्वाणि । भूतानि- अचि ... ब्रह्मादि स्तम्बपर्यन्तजीवाः । क्षरः- क्षरति- अचित्सम्बन्धेन ... स्वभावाच्च्यवत इति क्षरइति उच्यन्ते, क्षरशब्देनोच्यन्त ... । बद्धानां बहुत्वे ऽप्यचित्सम्बन्धरूपे कापाधि सम्बन्धवशा ... इत्येकवचन निर्देशः । कूटस्थः - कूटवात्तिष्ठति निर्विकारतयेति कूटस्थः- मुक्तपुरुषः । अक्षरः-नक्षरति-स्वप्रकाशत्वादि स्वभावान्नच्य वत इत्यक्षरः । इति उच्यते - अक्षरशब्देनोच्यत इत्यर्थः । अत्रापि मुक्तानां बहुत्वे ऽप्यचिद्वियोगरूपे कोपाधिसम्बन्धादक्षर इत्येकवचन निर्देशः । ॥ १६ ॥

परमात्मेति - सर्वेषामात्मेति । उदाहृतः - सर्वान्तरात्मत्वेन श्रुतिस्मृत्यादि प्रसिद्धः । उत्तमः पुरुषस्तु । अन्यः - परमात्मत्वा दुत्तमपुरुषत्वा देव च बद्धान्मुक्ताच्चार्थान्तर भूत इत्यर्थः । एतदेवार्था न्तरत्वं हेतुगर्भविशेषणै विशदयति (यइति) अव्ययः - स्वरूपान्यथा भाव स्वभावान्यथाभावादि व्ययरहितः । अनेन स्वरूपान्यथाभाववतो ऽचेतनात्तत्संबन्धेन तदनुसारिणो बद्धात्पूर्व स्वभावान्यथाभाव योग्या न्मुक्ताच्चान्यत्वसिद्धिः । ईश्वरः - सर्वनियता । अनेननियाम्यात्रित्रयादु न्यत्वसिद्धिः । एवं विधः, यः । लोकत्रयं - लोक्यन्ते - अवलोक्यं त इति लोकाः - अचेतनबद्धमुक्ताः, तेषाम् त्रयम् । आविश्य-अन्तरात्म तयाऽधिष्ठाय । बिभर्ति - धारयति । अनेन भर्तव्याद्भर्तुरन्यत्वसिद्धिः । अत्र यद्यपि बद्धमुक्तवैलक्षण्यमेव प्रकृतम्, तथापि समान न्याय तया बद्ध विशेषण भूताया अचितोऽपि वैलक्षण्य मुक्तमिति मन्तव्यम् ॥ १७ ॥

एवमुत्तम पुरुषं पराक्त्वेन निर्दिश्य तत्त्वार्थस्स्मारितः । पुरुषो त्तम समाख्याबलेन तत्सर्वं स्वस्मिन्पर्यवसाययति-

यस्मात्क्षरमतीतोऽह मक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥
यो मामेव मसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

यस्मात् - अव्ययत्वादि हेतोः । अहम् । क्षरं - बद्धपुरुषम् । अतीतः - अतिक्रान्तः, अनाघ्रात तत्स्वभाव इत्यर्थः । तथा । अक्षरादपिच - मुक्तादपिच । उत्तमः । बद्धान्मुक्ताच्चो त्कृष्टतम इत्यर्थः । अतः - हेतोः । लोके - लोकयति - वेदार्थमालोकयतीति लोकः - स्मृतिः, तस्मिन् । वेदेच । पुरुषोत्तमः । प्रथितः । " परंज्यो तिरुपसम्पद्य स्वेन रूपेणाभि निष्पद्यते सउत्तम" इति श्रुतौ, "अंशावतारं पुरुषोत्तमस्य ह्यनादि मध्यान्त मजस्य विष्णो " रित्यादि स्मृतिषु चेत्यर्थः ॥ १८ ॥

एवं पुरुषोत्तमशब्द निर्वचनं तथाऽनुसन्धानार्थमिति व्यञ्जयन् पुरुषोत्तमत्व वेदनं स्तौति -

हे भारत । यः - पुमान् । एवं- पूर्वोक्तप्रकारेण । पुरुषोत्तमम् माम् । असम्मूढः- क्षराक्षरपुरुषाभ्यां स्वभावत एकीकृत्य मोहरहितः । अव्ययत्व स्वभाव व्यापनानियमनादि योगेन बद्धमुक्ताभ्या विलक्षणतयैव । जानाति - यथावज्जानाति । सः पुमान् । सर्ववित् मत्प्राप्त्युपायं सर्वं वेत्तीति सर्ववित् । सर्वभावेन - वासुदेवस्सर्वमिति स्युक्तरीत्या । माम् । भजति । मत्प्राप्तिसाधन सकलवेदन सकल भजन प्रकारज्ञ इत्यर्थः ॥ १९ ॥

तस्यै तस्य पुरुषोत्तमत्व वेदनस्य रहस्यतया गोपनीयतमत्वं पारमार्थिकत्वं फलप्रकर्षं च व्यंजयन् निगमयति-

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीभगवद्गीतायां पंचदशोध्यायः ।

हे - अनघ - निष्पापेत्युपदेश योग्यताख्यापनं । गुह्यतमं - अतिरहस्यम् । इदं - पुरुषोत्तमत्ववेदन प्रतिपादकम् । शास्त्रम् । मया-सख्या सर्वज्ञेन चेति भावः । इति - पूर्वोक्तप्रकारेण । उक्तं - स प्रपञ्चमुपदिष्टमित्यर्थः । हे भारत - भरतकुलावतं सेत्याभि जात्योक्तिः । एतत - मत्पुरुषोत्तमत्व वेदनम् । बुद्ध्वा-यथाशास्त्रं विज्ञाय । बुद्धिमान् - मोक्षसाधनज्ञानवान् सन् । कृतकृत्यश्च । स्यात् - भवेत । पुरुषोत्तमत्व साक्षात्कारं करोति - तेनैकशास्त्रजन्यज्ञानमात्रेण मोक्ष साधन चेतनकर्तव्य सर्वकृत्यकारी च भवतीति भावः ॥ २० ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बाळबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

पञ्चदशोध्यायः ॥ १५ ॥

श्रीरस्तु ।

अथ षोडशोऽध्यायः ।

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धि र्ज्ञानयोग व्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्याय स्तप आर्जवम ॥ १ ॥

पूर्वाध्यायत्रयेण प्रकृतिपुरुषयो स्संयोगदशायां विवेक दशायांच लक्षणं प्रकृतिपुरुष संसर्गस्य च गुणफलसंग तद्विपर्यय हेतुकत्वं सर्वावस्थास्वपि प्रकृतिपुरुषयोर्भगवद्विभूतित्वं तत्रापि विभूतिभूताभ्यां च ताभ्यां बद्धमुक्तरूपाभ्यामव्ययत्व स्वभाव व्यापन भरणनियमनैर्वैलक्षण्येन पुरुषोत्तमत्वेन याथात्म्यंचवर्णितम् । इदानीमुक्तस्य कृत्स्नस्यार्थस्य शास्त्राधीनतया शास्त्रवश्यतामुपदेक्ष्यन् पूर्वाध्यायांते पांडवानघशब्दाभ्यां सूचिताधिकारि विशेषनिरूपणाय देवासुर वर्गयो श्शास्त्रवश्य तद्विपरीतयो र्विभागं श्रीभगवानुवाच -

अभयं - आगामिदुःखसाधन दर्शनजं दुःखं भयं, तद्राहित्यमभयम् । सत्त्वसंशुद्धिः - सत्त्वस्य - सत्त्वाश्रयस्यान्तःकरणस्य, संशुद्धिः - सम्यक्शुद्धिः, रजस्तमोनिवृत्तिः, तत्कार्य कामक्रोध वंचनादि निवृत्तिरिति यावत् । ज्ञानयोगव्यवस्थितिः - ज्ञानं - प्रकृति विविक्तात्मज्ञानं, तदेवयोगः, तस्मिन्, व्यवस्थितिः - निष्ठा । दानं- न्यायार्जित धनस्य पात्रे प्रतिपादनम् । दमश्च - मनोनिग्रहश्च । फलाभिसन्धिरहित भगवदाराधनरूप नित्यनैमित्तिकानुष्ठानंच। स्वाध्यायः - आराध्यब्रह्मपरवेदाभ्यास निष्ठा । तपः- एकादश्युपवासादि भगवत्प्रीणन शास्त्रीय भोगसंकोचः । आर्जवं· वाङ्मनःकायानामेकरूपता ॥ १ ॥

अहिंसा सत्य मक्रोध स्त्याग श्शान्ति रपैशुनम् ।
दयाभूतेष्वलोलत्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमा धृतिः शौच मद्रोहो नातिमानिता ।
भवंति संपदं दैवी मभिजातस्य भारत ॥ ३ ॥

अहिंसा - परपीडावर्जनम् । सत्यं - यथार्थविषय भूतहित-वचनम् । अक्रोधः - परबाधा हेतुचित्तविकार रहितत्वम् । त्यागः-आत्महित प्रत्यनीक परिग्रहाभावः । शांतिः - बाह्येंद्रिय निग्रहः । अपैशुनं - परानर्थासूचनम् । भूतेषु - सर्वप्राणिषु । दया - दुःखास-हिष्णुत्वं । अलोलत्वं - विषयेषु निस्पृहत्वम् । मार्दवं - प्रवेशार्हत्वम् , साधुसंगार्हत्वमित्ति यावत् । ह्रीः - अकृत्यकरणे व्रीडा । अचा-पलं - विषयसन्निधावप्य चंचलत्वम् ॥ २ ॥

तेजः - दुर्जनैरनभिभवनीयत्वम् । क्षमा - परैः पीड्यमानस्यापि तान् प्रत्यविकृताचित्तत्वन् । धृतिः - महत्यामप्यापदि कृत्य निर्धारणम् । शौचं - बाह्यांतर करणानां - शास्त्रीय कर्मयोग्यता । अद्रोहः - बलात्कारेण परान् स्ववशीकृत्य निरोधाद्यभावः । नाति-मानिता - अस्थाने गर्वराहितता । इत्येतेगुणाः । हे भारत । दैवीं-देवसंबन्धिनीम् । सम्पदं- ' सत्त्वं देवगुणं विद्यादितरावासुरौ मता वि ' तिविभागात परमसात्विकानां सम्बन्धिनीं भगवदाज्ञानु वर्तन रूपां सम्पदम् । अभिजातस्य - अभिमुखीकृत्य अभिलक्ष्य जातस्य । यदा दैवी सम्पद्भवति - तदोत्पन्नस्येत्यर्थः । भवन्ति - " जायमानंहि पुरुषं यं पश्येन्मधुसूदनः । सात्विकस्सतुविज्ञेय स्सवै मोक्षार्थचिंतक " इति भगवदनुग्रहलब्धा एतेगुणा इति भावः ॥ ३ ॥

दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥
दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
माशुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५ ॥

अथासुरान् गुणानाह –

दम्भः - धार्मिकत्वख्यापनाय धर्मानुष्ठानम् । दर्पः - कृत्याकृत्या विवेकाद्विषयानु भवजन्योहर्षः । अभिमानश्च - स्वविद्यावंशानन्तगु णाभिमानश्च । क्रोधः परपीडाहेतुश्चित्तविकारः । पारुष्यमेवच - साधना मुद्वेगकरस्वभावश्च । अज्ञानं - परावरतत्त्व कृत्याकृत्याविवेकश्च । इत्येतेस्वभावाः । अत्र भवन्तीति क्रियापदं पूर्वश्लोकादनुवर्तते । हे पार्थ । आसुरीं - राजस तामस सम्बन्धिनीम् । संपदं - भगव दाज्ञोल्लंघनरूपाम् । अभिजातस्य - आभिमुख्ये कृत्योत्पन्नस्य - तदेक प्रयोजनतयोत्पन्नस्य । भवन्ति ॥ ४ ॥

दैवी - देवसम्बन्धिनी । संपत् - भगवदाज्ञा रूपा संगकर्मानु ष्ठानम् । विमोक्षाय - क्रमणमत्प्राप्तये । मता - सम्मता भवती त्यर्थः । आसुरी - असुरसम्बन्धिनी । संपत् - काम्यनिषिद्धानुष्ठानम् । निबन्धाय - नितरांबन्धाय , क्रमेणाधोगतय इत्यर्थः । मता । तच्छ्रुत्वा स्वस्वभावानिर्धारणादतिभीतायार्जुनायैवमाह (माशुच इति) हे पाण्डव परमसात्त्विकस्य पाण्डोस्तनय । नहि धार्मिकाग्रेसरस्य सुता असुराभवन्तीति भावः । अतः । त्वम् । दैवीम् - सम्पत्तिं - भगव दाज्ञानुवृत्तिमेव । अभिजातः । असि । तदेकप्रयोजनतयैवजातः । अतः । माशुचः । शोकंमाकृथाः ॥ ५ ॥

परम सात्त्विकानां विवेचनायाति हेयत्वाच्चा सुरसर्गमपि समु क्षेप निरूपयति-

द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एवच ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

असत्य मप्रतिष्ठं ते जगदाहु रनीश्वरं ।
अपरस्परसम्भूतं किमन्य त्कामहेतुकम् ॥ ८ ॥

हे पार्थ । अस्मिन्लोके - कर्मलोके । दैवः - देवसम्बन्धी । आसुरएवच - असुरसम्बन्धीचेति । द्वौ । भूतसर्गौ - प्राणिसृष्टी अत्र सर्गशब्द उत्पत्तिप्रभृति स्वभाववैलक्षण्य मुभयोरिति ज्ञापनाय दैवः - देवसर्गः । विस्तरशः - बहुविस्तृतम् । प्रोक्तः - उपदिष्टः आसुरं - असुरसर्गम् । मे - मत्तः । शृणु - सावधानमाकर्णयेत्यर्थः देवानाम्मदाज्ञा नुवृत्तिशीलाना माचारः कर्मयोग ज्ञानयोग भक्ति योगरूपोबहुशः प्रतिपादितः , मदाज्ञोल्लङ्घनशीलाना मसुराण माचारंच मत्सकाशाच्छृणिवति भावः ॥ ६ ॥

तमेवाह-

आसुराः - असुरप्रकृतयोजनाः । प्रवृत्तिंच - प्रवृत्तिलक्षण मभ्युदय साधनं कर्मच । निवृत्तिंच - निवृत्तिलक्षण म्मोक्षसाधनभूतं कर्म च । न विदुः - यथाव न्नजानन्ति । शौचं - वैदिककर्म योग्यता पादिका बाह्यान्तरकरणशुद्धिश्च । तेषु । न विद्यते । आचारोऽपि तद्धेतु सन्ध्यावन्दनादिश्च । तेषु । न विद्यते । सत्यं - भूतहि यथार्थवचनंच । तेषु । न विद्यते ॥ ७ ॥

ते - आसुरप्रकृतयः पुरुषाः । जगत् । असत्यम् - 'तस्यह एतस्यब्रह्मणोनाम सत्य' मिति 'तानिहवा एतानि त्रीण्यक्षराणि भवन्ति सत्य' मिति 'तद्यत्सदमृतं - यद्यत्तन्मर्त्यं- अथयद्यं- तेनोभौ नियच्छ' ती

एतां दृष्टि मवष्टभ्य नष्टात्मानो ल्पबुद्धयः ।
प्रभव न्त्युग्रकर्माणः क्षयाय जगतो हिताः ॥ ९ ॥

निरुक्तेः, सत्यं - ब्रह्म, कारणतया यस्य नास्ति - तदसत्यं - अब्रह्म कारणकमित्यर्थः । तथा । अप्रतिष्ठं - नास्ति, प्रतिष्ठा - आदिकूर्मशेषादि स्थितिकारणं; यस्यतत् - अप्रतिष्ठम् । अनीश्वरं - न विद्यते, ईश्वरः - नियन्ता, यस्यतत्तथाभूतंच । आहुः । 'अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते' इत्युक्तरीत्या - जगतो मदेकप्रभवत्वं मदेकनिष्ठत्वं मदेकानियाम्यत्वं च नजानन्तीत्यर्थः । अपरस्पर सम्भूतं - परस्परेण-योषित्पुरुष संयोगमात्रेण, सम्भूतं-जन्यम्, अतथाभूतंच । किं अन्यत् अस्ति । इत्याहुः । सर्वं पशुमनुष्यादिकं हि परस्परसंयोगजन्य मुपलभ्यते, स्वेदजादिष्वपि मनुष्यादि दृष्टन्याय एवांगीकार्यः, स्वेदादिरपि सहकारिमात्रम् । अतः । सर्वजगत् । कामहेतुकं - योषित्पुरुषसमागमादि दृष्टमात्र ारणकम् । अतःपूर्वं पूर्वनगरवृत्तान्त न्यायेन कल्पेकल्प ईश्वरशिल्पिनो जगन्नगरवृत्तान्त इति मद्वेषा दपलपन्तीति भावः । ॥ ८ ॥

अल्पबुद्धयः - अल्पा - निहीना, बुद्धिः, येषान्ते; शरीरमहं जानामीत्यनुभवेपि घटादिवज्ज्ञेयं शरीरं ज्ञातारमात्मानंच विवेच यितु मशक्त बुद्धयः । अतएव । नष्टात्मानः - कदाचिदप्य दृष्ट देहाति रिक्तात्मानः पुमांसः । एतां - पूर्वोक्ताम् । दृष्टिं - आसुरीं बुद्धिं, विपरीतबुद्धिम । अवष्टभ्य - अवलंब्य । उग्रकर्माणः - परेषां हिंसापराः; अशुभाचाराः संसर्गिणामपि दोषावहा इतिभावः । अतएव । अहिताः - शत्रवस्संतः । जगतः क्षयाय । प्रभवन्ति । देवान् भावयतानेनेति भगवदुक्त परस्परभावना रहितस्वाचारेण परानपि मोहयन्त स्तापत्रयाभिभूततया कृत्स्नं जगन्नाशयंतीति भावः ॥ ९ ॥

काममाश्रित्य दुष्पूरं दम्भमान मदान्विताः ।
मोहाद्गृहीत्वा सद्ग्राहान् प्रवर्तंते शुचिव्रताः ॥ १० ॥
चिन्ता मपरिमेयां च प्रलयांता मुपाश्रिताः ।
कामोपभोगपरमा एताव दिति निश्चिताः ॥ ११ ॥

पूर्वं कामो जगद्धेतुरुक्तः , अतस्तदाश्रयांग भूत्वा दम्भाद्य शुचिवृत्तांताश्च सम्पद्यन्त इत्याह -

दुष्पूरं - अतिदुर्लभ विषयत्वा त्पूरयितुमशक्यम् । कामं - कामपुरुषार्थम् । आश्रित्य - जगत्कारणतया चावलंब्य । मोहात - अज्ञानात । असद्ग्राहान् - गृह्यन्ते - परिगृह्यन्ते कामपुरुषार्थ सिद्ध्यर्थ मिति ग्राहाः - स्रक्चन्दनादयः , असंतः - अन्यायार्जिताश्च - ते ग्राहाश्च असद्ग्राहाः - तान् । गृहीत्वा - संगृह्य । दम्भमान मदान्विताः - दम्भः - महत्त्वाभिनयः , मानः - तत्कृतचित्तसमुन्नतिः , मदः - तत्कृतगर्वः , तैरन्विताः - युक्ताः । अतएव । अशुचि व्रताः - शास्त्राविहित व्रतयुक्तास्सन्तः । प्रवर्तन्ते - निर्भीकं संसरन्तीत्यर्थः ॥ १० ॥

एवं प्रवृत्त्यनन्तर विकारानाह -

कामोपभोगपरमाः- कामोपभोगएव- परमः- प्राप्यः पुरुषार्थः येषांते- तथाभुताः । एतावदिति - एतदेवफलं - नातोऽधिकम्फलं स्वर्गमोक्षा दिकमस्तीति । निश्चिताः - सञ्जातनिश्चयाः । अपरिमेयां - असंख्या ताविषयाम् । अतएव । प्रळयांतां , प्रळयः - प्राकृतप्रळयः , अन्तः- विषयसाधनावधिः , यस्या स्तां चिन्तांच । उपाश्रिताः - उपागताः । अद्यश्वोवामुमूर्षवोऽपि प्राकृत प्रळय पर्यन्त कालनिष्पाद्यविषयसिसा धयिषापरा इति भावः ॥ ११ ॥

आशापाश शतैर्बद्धाः कामक्रोधपरायणाः ।
ईहंते कामभोगार्थ मन्यायेनार्थसंचयान् ॥ १२ ॥
इदमद्य मया लब्ध मिमं प्राप्स्ये मनोरथम् ।
इदमस्तीद मपि मे भविष्यति पुनर्धनम् ॥ १३ ॥
असौ मया हतश्शत्रु र्हनिष्ये चा परानपि ।
ईश्वरोऽह मढं भोगी सिद्धो ऽहं बलवान् सुखी ॥ १४ ॥

आशापाशशतैः - आशाएवपाशाः - रज्जवः, तेषां शतैः । बद्धाः - नियमिताः । कामक्रोधपरायणाः – कामक्रोधैक निष्ठास्सन्तः । काम भोगार्थं - कामपुरुषार्थानुभवार्थं । अन्यायेन । अर्थसंचयान्प्रति । ईहन्ते । कामभोगेच्छयाऽ र्थसंचया नन्यायेनैवार्जयन्तीत्यर्थः ॥ १२ ॥

चिन्ताविषयानन्त्यमेवाह –

इदं - क्षेत्रपुत्रादिकम् । मया - मत्सामर्थ्येनैव । अद्य । लब्धं - प्राप्तम् । नादृष्टादिना । तथा । इमम् । मनोरथम् । प्राप्स्ये - स्व सामर्थ्येनैव प्राप्तोभविष्यामि, नादृष्टादिना । इदम् । मत्साम र्थ्येनैव सिद्धं धनम् । अस्ति । इदमपि धनम् - अपरंधनमपि । पुनः । मे । भविष्यति । स्वसामर्थ्येनैव लभ्यतइति भावः ॥ १३ ॥

एव मिष्टप्राप्ते स्स्व सामर्थ्यमात्र साध्यत्व मुक्त्वा अनिष्टनि वृत्तेरपि तथा भूतत्वमाह–

असौ शत्रुः । मया । हतः - मत्सामर्थ्येनैवहतः । अप रानपिच - हतशिष्टानपि शत्रून् । हनिष्ये - स्वबलेनैव संहरिष्ये । अतएव । अहम् । ईश्वरः - स्वतन्त्र स्सर्वेषामपि नियामकः । अहम् । भोगी - सकलविषयानुभव समर्थः । सिद्धः - सिद्धसंकल्पः । बलवान् - स्वतस्सिद्धबलवान् । सुखी - स्वतः पुत्रजन्मादि सुखस-

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥ १५॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६॥

न्पन्नः, ननु धनजिघृक्षया वंचकपरिकल्पितेन परिकरेणेति भावः॥ १४॥

आढ्यः - स्वतएव सकलैश्वर्य सम्पन्नः। अभिजनवान् सत्कुल प्रसूतश्च। अस्मि। मया। सदृशः। अन्यः। कः अस्ति - नकश्चिदप्यस्ति, किं त्वहमेव मत्सदृशइतिभावः। यक्ष्ये दास्यामि- विडम्बनार्थं यागदानादिकं करिष्ये। मोदिष्ये - यजमान दातृत्वादि प्रसिद्धयैव सन्तोषं प्राप्स्यामि। इति - इत्थम्। अज्ञानविमोहिताः- ईश्वरानुग्रहनैरपेक्ष्येण लौकिकवैदिककर्म शक्ता इति मन्यन्त इत्यर्थः॥ १५॥

अनेकचित्तविभ्रान्ताः - अनेकैः - बहुभिः, चित्तैः - इदं करिष्ये - एवं करिष्ये - इदं करिष्यामीत्यादि चिन्तावृत्तिभिः, विभ्रान्ताः- विपरीत ज्ञानवन्तः। मोहजाल समावृताः- मोहः - अज्ञानम्, सएवजालं-आनायः, तेनसमावृताः - वेष्टिताः। कामभोगेषु प्रसक्ताः - प्रकर्षेणासक्ताः। "नजातु कामः कामाना मुपभोगेन शाम्यति। हविषाकृष्णवर्त्मेव भूयएवाभि वर्धते" इति न्यायेना त्यासक्ता इतिभावः। अशुचौ - पूयशोणितादि मयत्वादत्यन्ता शुद्धे। नरके। पतन्ति 'इदं कृतमिदं कार्य मिदमन्यत्कृताकृतम्। एवमीहासमायुक्तं कृताकृत' मितिन्यायेन - अकृतसकलकर्तव्यमेवैनं कृतांतो बलादाकृष्य तत्तत्कर्मानुगुणमेवा परिशुद्धे नरके निपातयतीतिभावः॥ १६॥

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम ॥ १७ ॥
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

आत्मसम्भाविताः-स्वयमेवात्मना बहुमानं कुर्वन्तइत्यर्थः । स्तब्धाः - परिपूर्णाः - कृतकृत्यमात्मान म्मन्वाना इत्यर्थः । धनमान-मदान्विताः - धनेन , मानेन-विद्याभि जनाभि मानेनच , योमदः - तेनान्विताः - युक्ताः । अतएव । अहंकारम - ईश्वरादृष्टनिरपेक्ष महमेवसर्वंकरोमीत्येवं रूपं स्वस्वातन्त्र्यभ्रमम् । बलं - कर्तुमकर्तु मन्यथाकर्तुंच पर्याप्तमित्यनुसन्धीयमानं स्वबलम् । दर्पं – निस्स माभ्यधिकोह मित्यौद्धत्यम् । कामं-एवं विधस्सम संकल्पमात्रे णैव सर्वं संपत्स्यतइति कामम् । क्रोधंच – मत्संकल्पप्रतिघातिनः स्वयमेवहानिष्यामीति चित्तविकृतिंच । एतानासुरसर्गगुणान् । संश्रिताः । अतएव । आत्मपरदेहेषु- आत्मनः - स्वस्य, परेषांच-देहेषु । मां - सर्वस्यचाहं हृदिसन्निविष्टो सत्त इत्याद्युक्तप्रकारेण नियामकत्वेनावस्थितम्माम् । अभ्यसूयकाः – मद्गुणेषु दोषाना विष्कुर्वन्तः । ईश्वर स्वातन्त्र्ये किङ्कर्मणा – कर्मणः फलसिद्धौ किमी श्वरेणेत्याद्य सूयापराः । प्रद्विषन्तः - असहिष्णुतया मदाज्ञोल्लंघनपराइति भावः । ते - आसुराजनाः । दम्भेन - यष्टृत्वख्यापनारूपेण हेतुना । अविधिपूर्वकम् । नामयज्ञैः - सोमयाज्यादि नामप्रयोजनै र्यज्ञैः । यजन्ते - यज्ञादीननुतिष्ठन्तीत्यर्थः ॥ १८ ॥

अहं - सर्वसमः । अशुभान् - न विद्यते , शुभं - कल्याणम्मद्रूप विभूत्यादि ज्ञानं , येषां तानशुभान् । नराधमान् - सामान्यतोज्ञातेपि

आसुरीं योनिमापन्नामूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥ १० ॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथालोभस्तस्मादेतत्त्रयं त्यजेत ॥ ११ ॥

मत्स्वरूपरूपगुण विभूत्यादौ मदौन्मुख्यानर्हान् । क्रूरान् - मदौन्मुख्यरहितानां मत्स्वरूपादौ ज्ञातेपि कूटयुक्तिभि स्तदपलपत इत्यर्थः । द्विषतः - दृढमुत्पन्नेपि मत्स्वरूपादिज्ञाने तेनैव मयिनिरूढवैरान् । तान् - आसुरान् जनान् । संसारेषु - सम्यक् अविच्छिन्नतया सरन्ति - परिवर्तन्त इति संसाराः - जन्मजरामरणादिरूपेण परिवर्तमाना स्सन्तानाः- संसरणादि परिवृत्तयइति यावत् , तेषु । तत्रापि । आसुरीषु - असुरसम्बन्धिनीषु । योनिष्वेव । अजस्रं - निरन्तरम् । क्षिपामि - निपातयामि । 'एषएव साधुकर्मकारयतितं यमेभ्यो लोकेभ्य उन्निनीषति - एषएवासाधुकर्मकारयतितंयमधोनिनीषती' ति श्रुत्युक्तरीत्या पूर्वपूर्व तत्तत्कर्म स्वभावानुगुण क्रूरबुद्ध्यादि प्रदानेनाधोनयामीत्यर्थः । अतो न वैषम्य नैर्घृण्यादि गन्धोपीति भावः ॥ १९॥

उत्तरोत्तर मपकर्ष परम्परामाह -

हे कौन्तेय । आसुरीं - असुरसम्बन्धिनीम् । योनिं - मदानुकूल्य प्रत्यनीकं जन्म । आपन्नाः - प्राप्ताः पुमांसः । जन्मनि जन्मनि - पुनः पुनरपि प्रत्यासुरजन्म । मूढाः - मद्विषय विपरीतज्ञानास्सन्तः । माम् । अप्राप्यैव - मत्प्राप्तिहेतुं - अस्ति भगवान् सर्वेश्वरोवासुदेवः पुरुषोत्तम इति शास्त्रजन्यज्ञान मनवलम्ब्यैव । ततः - आसुरजन्मतः । अधमां - नीचान्नीचतराम् । गतिं - रौरवादिकांगतिं । यान्ति ॥ २० ॥

अवश्य परिहरणीयस्या सुरस्वभावस्यापि मूलहेतुमाह -

कामः । क्रोधः । तथा । लोभः । इति । त्रिविधम् । इदं - वस्तुचक्रम् । आत्मनः नाशनम् - आत्मापहारकम् , नरकस्य - आसुरस्वभावाख्यस्य महानरकस्य । द्वारं - प्रवेशोपायः ।

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

तस्मात् - महानर्थसाधनत्वात् । एतत्त्रयं· त्रीन् काम क्रोध लोभान् । त्यज । रौरवादयो हि स्वानुभवेन पापक्षय हेतवः । आसुरस्वभावस्तु पापनिदानतयाऽतिहेयइति तद्धेतवः काम क्रोध लोभा दूरत स्त्याज्या इति भावः ॥ २१ ॥

हे कौन्तेय । तमोद्वारैः - तमसः - आसुरस्वभावस्य , द्वारैः - प्रवेशमार्गैः । एतैः । त्रिभिः - कामादिभिः । विमुक्तः । नरः । आत्मनः । श्रेयः · मदानुकूल्यादिरूपम् । आचरति । ततः - मदानुकूल्याचरणादेवहेतोः । पराम् गतिम् - परमप्राप्यम्मामेव । याति - मदानुकूल्य मत्प्रीत्यादिद्वारा मां प्राप्नोतीत्यर्थः ॥ २२ ॥

शास्त्रानादरोऽप्यस्य नरकस्य प्रधान हेतुरित्याह -

यः - पुमान् । शास्त्रविधिं - शास्त्रं - वेदः , तद्रूपंविधिम् - इदं कुरु · इदं माकार्षीरित्याद्यनुशासनम् । उत्सृज्य - उल्लंघ्य । कामकारतः - स्वेच्छानुसारात् । अथ केनप्रयुक्तोयमिति प्रश्नोत्तरभूतेन - कामएष क्रोधएष इति शास्त्रेण निर्दिष्टकामप्रयुक्त मार्गेणे त्यर्थः । वर्तते - प्रवर्तते । सः । सिद्धिं - स्वर्गादि विषयां सिद्धिम् । नावाप्नोति । सुखं - ऐहिकमपि सुखम् । नावाप्नोति । अनाराधितगोविन्दास्तेनरादुःखभागिन इति ह्युच्यते । पराम् । गतिं - मुक्तिम् । नावाप्नोति - सुतरां न प्राप्नोतीत्यर्थः ॥ २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कार्यं कर्तुमिहार्हसि ।

इति श्रीभगवद्गीतायां षोडशोऽध्यायः ।

तस्मात - अविधिपूर्वक कर्मणो निष्फलत्वात । कार्याकार्यव्यवस्थितौ - कार्यं - शास्त्र वश्यकर्तव्यं भगवदाराधनरूपं कर्म, अकार्यं - शास्त्रवश्यस्या कर्तव्यं भगवदाज्ञोल्लंघनरूपं कर्म, तयोरवश्यज्ञेययोः, व्यवस्थितौ व्यवस्थायाम् : ते - तव । शास्त्रं - स्मृतीतिहासपुराणोप बृंहितवेदः । प्रमाणम् । तस्मात्कारणात । शास्त्रविधानोक्तं - शास्त्रविहितं पुरुषोत्तमाख्यं तत्त्वं तत्प्रीणनं तदाराधनरूपं च कर्म । ज्ञात्वा - यथावद्विज्ञाय ! कार्यं - उपादेयं कर्म पुरुषोत्तमाराधनाख्यम् । इह - अस्मिन्लोके । कर्तुं - आचरितुम् । अर्हसि । अयमर्थः - सर्वोत्तरेण सत्कुलप्रसूतेन त्वया पुरुषकौशलातिशय परिग्राहितेन मोहनशास्त्र वश्यतां विहाय शब्द ब्रह्मचोदितत्वात्तच्चोदित तदाराधन कर्मयोग ज्ञानयोग भक्तियोगेभ्यः कदाचिदपि न प्रमदितव्यमिति ॥ २४ ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

षोडशोऽध्यायः ॥ १६ ॥

श्रीरस्तु

अथ सप्तदशोऽध्यायः ।

अर्जुन उवाच

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥

पूर्वाध्याये भगवताऽधिकारिविशेषनिर्णयार्थं देवासुरविभागमर्थात्प्राप्यतत्त्वमुपायतत्त्वं च निरूप्य - अध्यायान्ते - यश्शास्त्रविधिमुत्सृज्येत्यत्र शास्त्रविहितस्य सफलत्वं शास्त्राविहितस्य निष्फलत्वं चोक्तम् । इदानीमशास्त्रविहितेष्वपि वेदबाह्यागममूलेषु श्रद्धाधर्माभिसन्धिपूर्वकं प्रेक्षावद्वृद्धपरम्परागतेषु दृष्टफलरहितेषु बहुविधव्ययायाससाध्येषु यागतपोदानादिषु केवलशिष्टाचारमूलकधर्मेष्वेवादृष्टफलावश्यंभावं मन्वानस्तेषु गुणतः फलविशेषबुभुत्सयाऽर्जुन उवाच -

ये - पुमांसः । शास्त्रविधिं - शास्त्रानुशासनम् । उत्सृज्य - उल्लंघ्य । श्रद्धया - इदम्फलमनेनावश्यम्भवतीति फलपर्यन्तविश्वासेन । अन्विताः - युक्तास्सन्तः । यजन्ते - यागदानादिकं कुर्वन्ति । हे कृष्ण । तेषां - श्रद्धावतां पुंसाम् । निष्ठा तु - नितरां तिष्ठत्यस्यामिति निष्ठा - प्रतिष्ठा तु, फलहेतुरिति यावत् । तु शब्देन शास्त्रविहितनिष्ठायाः कामकारस्य च व्यावृत्तिः । का - कीदृशी । तामेवाविशेषतः पृच्छति (सत्त्वमिति) अत्र स्त्रीलिङ्गान्तः किं शब्दः- नपुंसकलिङ्गत्वेन परिणतः किमित्यनुवर्तते । किं सत्त्वं - सत्त्वनिष्ठा । आहोस्वित् ।

श्रीभगवानुवाच

त्रिविधा भवतिश्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ १ ॥

किंरजः - रजोनिष्ठा । उत । किन्तमः - तमोनिष्ठा । अवेदमूलकस्यापि श्रद्धापूर्वकत्वा त्सत्त्वकोटिशंका, शास्त्रोल्लंघनात्तमः कोटिशंका, श्रद्धा शास्त्रोल्लंघनाद्रजः कोटिशंकेति भावः । फलोद्देशेन बाह्यागमसिद्धया गानुष्ठातॄणां कोगुणः फलोपकारीति भावः ॥ १ ॥

एवं पृष्टो बाह्यागममूलकस्य कर्मणो निष्फलत्वाद् तत्प्रश्नाविषयत्व ममत्वा वैदिककर्मस्थल एवोत्तरं श्रीभगवानुवाच -

देहिनां - गुणत्रय मय प्रकृति परिणाम शरीरसंसृष्टानां चेतनानां । श्रद्धा - इदमनेन भविष्यतीत्येव मादिफलपर्यन्त साधन विश्वासः । सात्त्विकी - सत्त्वमूला । राजसीचैव - रजोमूलाच । तामसीच - तमोमूलाच । इति । त्रिविधा भवति । यद्यपि शुद्धस्वभावस्या त्मनः श्रद्धासम्बन्धएव नास्ति, तथापि देहशब्दसूचित त्रिगुणमय शरीर सम्बन्धोपाधिकाः श्रद्धादयस्सम्भवन्तीति भावः । ननुसा त्त्विक राजस तामस कर्म बोधकानां शास्त्राणां तद्रुचिकरार्थवादानां च साधारणत्वा त्पुरुष विशेष नियत फलभेद नियत श्रद्धोत्पत्तौ किं नियामक मित्यत्राह (सा स्वभावजेति) सा- त्रिविधाश्रद्धा । स्वभावजा- स्वेषां - तत्तत्कर्म कर्तॄणां, भावाः - असाधारण धर्माः, सात्त्विकादि श्रद्धाहेतु प्राचीन तत्तद्रुचयः, तेभ्योजाता । औषधविशेष लिप्त वन्हि सम्बन्धात्पार्थिवद्रव्ये शुक्लपीत नीलरूपादयइव उद्रिक्त तत्तद्गुणमय शरीरसम्बन्धा त्सात्विक राजस तामस श्रद्धा आत्मना मुत्पद्यन्तइति भावः । ताम् शृणु - तादृश श्रद्धास्वभाव माकर्णये त्यर्थः ॥ २ ॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥

तत्स्वभाव इतुमाह

हे भारत । सर्वस्य - चेतनस्य । श्रद्धा । सत्त्वानुरूपा · सत्त्वं - अन्तःकरणम् , एतच्च देहेन्द्रियोपलक्षणम् , तदनुरूपा । भवति । अन्तःकरण शरीरेन्द्रियाणि यादृशगुण युक्तानि तादृश तदुचित सात्त्विकादि कर्मविषयाभवतीत्यर्थः । अतः । अयम् । पुरुषः । श्रद्धामयः - श्रद्धापरिणामः , तद्गुणप्रयुक्त श्रद्धाविषय कर्म फल प्रधान इत्यर्थः । अतएव । यः - पुमान् । यच्छ्रद्धः - यादृशी श्रद्धा यस्यसः , सः । सएव - तादृश श्रद्धएव । भवति - तद्गुणप्रयुक्त श्रद्धाविषयफल भागेव भवतीत्यर्थः ॥ ३ ॥

फलविशेषाणां श्रद्धाविशेषप्रयुक्तत्व मेवो पपादयति –

सात्त्विकाः - सत्त्वगुणप्रचुराः । जनाः । देवान्-सत्त्वप्रकृती निन्द्रादीनेव । यजन्ते । सात्त्विका स्सात्त्विकया श्रद्धया सात्त्विका नेवाराध्य तत्सायुज्यं दुःखा सम्भिन्नसुखरूप मनुभवन्तीत्यर्थः । राजसाः - रजःप्रचुराः जनाः । यक्षरक्षांसि-यक्षरक्षोजनान् । यजन्ते । पूर्वोक्तरीत्या राजसश्रद्धया राजसानेवाराध्य दुःखासम्भिन्नाल्प सुखरूपन्तत्सायुज्य मनुभवन्तीत्यर्थः । अन्ये । तामसाः । जनाः । प्रेतान् - पिशाचान् । भूतगणांश्च - रुद्रपारिषदांश्च । यजन्ते पूर्वोक्तरीत्या तामसश्रद्धया तामसानाराध्य दुःखमयात्यल्प सुखरूपं तत्सायुज्यं प्राप्नुवन्तीत्यर्थः ॥ ४

अथान्निषिद्ध मप्यशास्त्रीयकर्मणि गुणफलसंबन्धं कण्ठोक्त्या निराचष्टे-

अशास्त्रविहितं घोरं तप्यन्ते ये तपोजनाः ।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवांतःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥ ६ ॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

ये जनाः । दम्भाहंकारसंयुक्ताः- दम्भः – धार्मिकत्वख्यापनम्, अहंकारः - स्वातन्त्र्याभिमानः , ताभ्यां, संयुक्ताः - समन्विताः । कामरागबलान्विताः - कामः - विषयाभिलाषः , रागः - क्षेत्राद्यासक्तिः , बलं - कामाद्यनुकूलाशक्तिः, तैरन्विताः । शरीरस्थं - शरीरेतिष्ठति आरम्भकतयाऽनुवर्ततइति तथोक्तम् । भूतग्रामं - पृथिव्यादिसमुदायम् । अन्तश्शरीरस्थं - नियन्तृतया शरीरान्तर्वर्तिनम् । मांचैव - मच्छरीरभूतं जीवंच । कर्शयन्तः - दृढोपवासादिभिः कृशंकुर्वन्तः । अनेन शास्त्रविहित यागाद्यपेक्षया भगवच्छरीर पीडनापराधो महान् दोषस्तदनुमतइति भावः । अचेतसः - अविवेकिनश्चसन्तः । घोरं - तामसश्रद्धापूर्वकतया दारुणम् । तपः - बाह्यागममूलकं तपः । तप्यन्ते - कुर्वते । इदमुपलक्षणं , यागदानादिकमपि कुर्वते । तान् , आसुरनिश्चयान् - आसुरः असुरसम्बन्धी ; निश्चयः येषांतथा भूतान् । विद्धि- जानीहि । असुराणां मदाज्ञा विपरीत कारिणां यागतिः सा पतन्ति नरके ऽशुचावित्यादिना पूर्वमेवोक्ता । अतोबाह्यागम मूलक श्रद्धाकृतत्वमात्रेण नगुण फलसंबन्ध इतिभावः ॥ ३ ॥

पूर्वंअघट्टकेन श्रद्धानां श्रद्धावतांचेतनानां श्रद्धाविषयाणांच कर्मणां सात्त्विकराजस तामसभेदेन सामान्यत स्त्रैविध्यंफलभेदश्चोक्तः । इदानींतदनुबन्ध्याहारभेदत्रैविध्यं निर्दिश ब्रवत्सर्वं प्रपंचयति -

सर्वस्य - सात्त्विक राजस तामस भेद भिन्नस्य प्राणिवर्गस्य । आहारस्त्वपि - आहारोपिच । त्रिविधः - सात्त्विकादि भेद भिन्नस्सन्नेव ।

आयुः सत्वबलारोग्य सुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धा स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥
कट्वम्ललवणात्युष्ण तीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

प्रियः । भवति । तथा पूर्वोक्तव्यवस्थयैव । यज्ञः तपः दानं च, सर्वं । त्रिविधं सदेव । प्रियम्भवति । तेषां - आहार यज्ञ तपो दानानाम् । इमं - सत्त्वादि गुणभेदेन लक्ष्यमाणम् । भेदम् । शृणु - मत्सकाशादाकर्णय ॥ ७ ॥

तत्रादौ "आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवास्मृतिः" "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष" इति मुक्तिसाधनी भूतध्रुवा नुस्मृति प्रयोजकान् सात्त्विकाहार प्रभृतीन् विवेचयति -

आयुस्सत्त्व बलारोग्य सुखप्रीति विवर्धनाः - आयुषः - जीवनस्य, सत्त्वस्य - ज्ञानहेतु सत्त्वगुणस्य, बलस्य - जाठराग्न्युपचयरूपस्य, आरोग्यस्य - धातुसाम्यरूपरोगराहित्यस्य, सुखस्य - स्व परिणाम कालीनस्य सौख्यस्य, प्रीतेः - स्व परिणामकालीन हर्षस्य च, विवर्धनाः - वृद्धिहेतवः । आयुरादि विवर्धकत्वं शास्त्रावगम्यम्, सुखविवर्धकत्वं प्रत्यक्षसिद्धम्, प्रीति विवर्धकत्वं मादकद्रव्य सेवाया अन्नादिद्वारा लोकाद्धि जकत्ववत् सात्त्विकाहार सेवाया लोकानुकूल कर्मद्वारा प्रत्यक्षसिद्धं । रस्याः - आप्यायक मधुररसवन्तः । स्निग्धाः - स्नेहयुक्ताः । समधातुमयस्य कार्यकारण संघातस्य पिण्डीकरणहेतव इत्यर्थः । स्थिराः बलादि स्थिर परिणामयुक्ताः - हृद्याः - दृष्टमात्राएव सन्तोमनोहराश्च । आहाराः - अन्नादयः । सात्त्विकप्रियाः - सात्त्विकानां - उपचितसत्त्वानां पुंसां; प्रियाः - प्रीतिविषयाः । उपचित सत्त्वविशिष्टाहाराणां स्वानुभव वासनारुचिद्वारा सात्त्विक प्रीतिजनकत्वादिति भावः ॥ ८ ॥

कट्वम्ल लवणा त्युष्ण तीक्ष्ण रूक्ष विदाहिनः, अत्रैकोऽप्यतिशब्दो देहली दीपन्यायात्सर्वत्राप्यन्वेतीति मन्तव्यम् । अतिकटवः - अति

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥ ११ ॥

तिक्तरसा निम्बादयः, अत्यम्लाः-तिन्त्रिण्यादयः, अतिलवणाः, अत्युष्णाः, अतितीक्ष्णाः - उपयोगाक्षण प्रकृति प्रतिकूलामरीचादयः, अतिरूक्षाः - अतिशोषकाः हिंग्वादयः, विदाहिनः - तापकरास्सर्षपादयः । किंच - दुःखशोकामयप्रदाः - रजोमयत्वाद्दुःखं - धातुवैषम्यद्वारा शरीरव्यथाम् । शोकं - तत्परामर्शजपश्चात्तापादिद्वारा दैन्यं, आमयं - कालातिक्रमेण रोगंच, प्रददतीति तथाभूताः । आहाराः । राजसस्य - उपचित रजोगुणस्य । इष्टाः । भवन्तीत्यन्वयः ॥ ९ ॥

यातयामं - यातः - अतीतः, यामः - प्रहरः - यस्य ; तत्तथाभूतं, चिरकालावस्थितम् । गतरसं - गतः - निवृत्तः, रसः - सारः, यस्य तत् ; निष्पीडितसारमित्यर्थः । पूति - दुर्गन्धयुक्तम् । पर्युषितं - दिनान्तरपक्वं, कालातिक्रमेण रसान्तरापन्नमिति यावत् । उच्छिष्टं - गुर्वादिभ्यो न्यभुक्तशिष्टम् । अमेध्यं - अपरिशुद्धमपि च । अयज्ञशिष्टमित्यर्थः । भोजनं - भुज्यइति भोजनं, तमोमया हारः । तामसप्रियं- तामसानां- उपचिततमोगुणानां, प्रियं - प्रीतिविषयः । भुक्तं तत्पुनस्तमोविवर्धनंच । अतो हितैषिभि स्सात्विकाहार सेवैव कर्तव्येति भावः ॥ १० ॥

एवमाहारस्य त्रैविध्यमुक्त्वा यागत्रैविध्यमाह अफलाकांक्षिभिरित्यादि भिस्त्रिभिः-

अफलाकांक्षिभिः - फलाकांक्षारहितैः पुरुषैः । विधिदृष्टः - शास्त्रोक्तमन्त्रद्रव्यादि सम्पन्नइत्यर्थः । यष्टव्यमेवेति - भगवदाराधनतया

अभिसंधाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

देव द्विज गुरु प्राज्ञ पूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

यागः कर्तव्यएवेति । मनः । समाधाय - विहितकर्मानुष्ठानमेवस्वतः प्रयोजन मित्यनुसन्धायेत्यर्थः । यः · यज्ञः । इज्यते - क्रियते । सः - यज्ञः । सात्विकः ॥ ११ ॥

हे भरतश्रेष्ठ । यः · यज्ञः । फलं - स्वर्गादि फलम् । अभिसंधायतु - उद्दिश्य च । दम्भार्थमपिचैव - धार्मिकत्वख्यापनाय च । इज्यते - क्रियते । तम् - यज्ञम् । राजसम् । विद्धि ॥ १२ ॥

विधिहीनं - विधिः - इमं धर्ममनुतिष्ठेति शिष्टानुशासनम् , तेन हीनम् । असृष्टान्नं · सृष्टं - न्यायसम्पादितं न भवतीत्यसृष्टं - शूद्र भिक्षालब्धं , अन्नं यस्यतम् । मन्त्रहीनं - मन्त्रभ्रष्टं । अदक्षिणं - यथोक्तदक्षिणारहितं । श्रद्धाविरहितं· श्रद्धा , आस्तिक्यबुद्धिः , तया, विरहितं - शून्यम् । यज्ञम् । तामसम् । परिचक्षते - शिष्टाः कथयन्ति ॥ १३ ॥

अथ तपसोगुणतस्त्रैविध्यं वक्तुं तस्यकायवाङ्मनोनिष्पाद्यतया प्रथमतः कायादि भेदेन स्वरूपत स्त्रैविध्यं विवक्षित्वा प्रथमतः कायिकं तपआह

देव द्विज गुरु प्राज्ञ पूजनं - देवानां , गुरूणां· ज्ञानोपदेष्टॄणां · प्राज्ञानां-स्वगुरुव्यतिरिक्तानां तत्त्वविदां च , पूजनं - आराधनम्

अनुद्वेगकरं वाक्यं सत्यंप्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥ १७ ॥

शौचं तीर्थस्नानादि शोधन कर्म । आर्जवं - सान्तःकरणशरीर वृत्तिः । ब्रह्मचर्यं - योषित्सुभोग्यताबुद्धिवर्जनं । अहिंसाच - परपीडावर्जनंच । इत्येतत् । शारीरं - शरीरनिष्पाद्यं । तपः । उच्यते । शास्त्रज्ञैः प्रतिपाद्यते ॥ १४ ॥

अथ वाचिकन्तपश्चाह

अनुद्वेगकरं - उद्वेगं - भयं, करोतीत्युद्वेगकरं, तन्नभवतीत्यनुद्वेगकरं; यस्य कस्याप्य भयंकरमित्यर्थः । सत्यं - यथार्थम् । प्रियहितंच - प्रियम् - श्रोतॄणां श्रोत्रसुखम् , हितंच - परिणाम सुखकरंच । यत् वाक्यं - यदेववचनम् । स्वाध्यायाभ्यसनंचैव - स्वाध्यायस्य - वेदस्य, पठनंच । यत् तत् । वाङ्मयम् - वाचिकम् । तप उच्यते ॥ १५ ॥

अथ मानसन्तपआह

मनः प्रसादः - क्रोधादिकालुष्यराहित्यम् । सौम्यत्वं - परेषामनुकूलस्वभावत्वम् । मौनम्- वाङ्नियमनम् । भावसंशुद्धिः - भावः - भावना - चिन्ता , तस्य संशुद्धिः - इतरविषया संस्पर्शश्च । इत्येतत् । मानसं - मनोनिष्पाद्यम् । तपः । उच्यते ॥ १६ ॥

इदानीं कायिक वाचिक मानसानां तपसां प्रत्येकं सात्त्विकादि भेदेन त्रैविध्यमाह -

अफलाकांक्षिभिः - फलाभिसन्धिरहितैः । युक्तैः - भगवद्ध्यान परैः नरैः । परया । श्रद्धया । तप्तम् । तत् । पूर्वोक्तम् । त्रि

सत्कारमानपूजार्थं तपो दंभेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥ २० ॥

विधं - शारीरादि त्रिप्रकारम् । तपः । सात्विकं । परिचक्षते - प्रवदन्ति ॥ १७ ॥

अथ राजसन्तपआह -

यत् । तपः । दम्भेन - हेतुना । सत्कारमान पूजार्थं - सत्कारः - मानसिकादरविशेषः , मानः - वाचिकश्लाघा , पूजा - कायिको नमस्कारः , तदर्थं च - तत्सिद्ध्यर्थं च । च शब्देन स्वर्गाद्यर्थं चातिद्योत्यते । एवमुभयार्थमेव । इह । क्रियते । चलं - चलयति स्वर्गादिपात भयेन चंचलं करोतीति चलम् । अध्रुवं - क्षयि फलकत्वा न्नश्वरम् । तत् - तपः । राजसं । प्रोक्तं - निर्णीतम् ॥ १८ ॥

मूढाः - अविवेकिनः, तत्संबन्धिना , ग्राहेण - आत्मशक्त्य पर्यालोचन कृताभिनिवेशेनत्यर्थः । आत्मनः - स्वस्य । पीडया - निर्बन्धेन । यत् - तपः । क्रियते । परस्य । उत्सादनार्थं - च यत् । क्रियते । तत् - तपः । तामसमिति । उदाहृतं - धर्मशास्त्रोक्तमित्यर्थः ॥ १९ ॥

यत् । दानम् । दातव्यमिति - दानं कर्तव्यमिति विहितत्व बुद्धचैव । नतुफलाभि संधिनेतिभावः । देशे - दिव्यदेशे । काळेच

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजस मुदाहृतम् ॥ २१ ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥
ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधःस्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताःपुरा ॥ २३ ॥

ग्रहणादिकाळे च । पात्रेच - ' नविद्यया केवळया तपसाकेवळेनतु । यत्रवृत्तं ह्युभेचैते तद्धिपात्रं प्रचक्षत ' इति धर्मशास्त्रोक्त विद्यादिसंपन्ने ब्राह्मणेच सति । तत्रापि । अनुपकारिणे- प्रत्युपकारा समर्थाय । दीयते- क्रियते । तत् । दानम् । सात्विकम् । स्मृतम् - धर्मशास्त्र सम्मतमित्यर्थः ॥ २० ॥

यत्तुपुनः - यद्दानन्तुपुनः । प्रत्युपकारार्थं- अनेनवाऽन्येन वा ऽयं मम प्रत्युपकरिष्यतीति बुद्ध्या । फलं- स्वर्गादिकम् । उद्दिश्यवा । परिक्लिष्टंच- मनःक्लेशयुक्तमशुचि द्रव्यकंच । दीयते- क्रियते । तत्- दानम् - राजसम् । उदाहृतम् - शास्त्रोक्तम् ॥ २१ ॥

यत् । दानम् । अदेशकाळे- अशुचिदेशे अनुचितकाळेच । अपात्रेभ्यश्च । दीयते, देशकाळादि संपत्तावपि । असत्कृतं- पादप्रक्षाळनादि सत्काररहितम् । अवज्ञातं- तिरस्कारयुक्तंच । यत् । दीयते । तत्- दानम् । तामसम् । उदाहृतं- कथितम् ॥ २२ ॥

अध्यायारंभे पार्थपृष्टबाह्या गमनविषय विलक्षणानां वेदोक्त सात्विकराजस तामसकर्मणां तदनुबन्धिनां कर्तृणां वेदानांच लक्ष णान्याह ।

ॐ तत्सदिति । त्रिविधः । निर्देशः - नाम । ब्रह्मणः - वेदस्य

तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः ।
प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तत्प्रतिपादित प्राकरणिककर्मणः सम्बन्धी । स्मृतः - तदन्वयितयाशिष्टैः कथित इत्यर्थः । कुतः । तेन - त्रिविधेन निर्देशेन । उपलक्षिताः । ब्राह्मणाः - वेदाध्यायिन स्त्रैवर्णिकाः । शकंध्वादितया स्वार्थिकाणन्त तया रूपसिद्धिर्द्रष्टव्या । वेदाश्च - तदध्येतव्याश्श्रुतयश्च । यज्ञाश्च - तत्प्रतिपाद्य सात्त्विक राजस तामस प्रभेद भिन्नानि तपोदानादीनिच । पुरा - सृष्टिकालएव । विहिताः - 'चातुर्वर्ण्यं मयासृष्टं गुणकर्मविभागशः' इत्युक्तरीत्या , तत्रापि 'धातायथा पूर्वमकल्पय' दिति श्रुत्युक्तरीत्याच मयैव सृष्टा इत्यर्थः ॥ २३ ॥

अथैतदेव चतुर्भिःश्लोकैः प्रपंचयन्नादा वोंकारस्य प्राथम्यात्कर्मानुष्ठाना नुप्रवेशित्वाच्च तदन्वयमेव ब्राह्मण वेद यज्ञानामाह -

तस्मात - त्रिविध निर्देशान्वयित्वेन मयासृष्टत्वादित्यर्थः । ब्रह्मवादिनां - वेदाध्यायिनां त्रैवर्णिकानां सम्बन्धिन्यः । विधानोक्ताः - विधीयन्त एभिरिति विधानानि - विधायकवाक्यानि , तेषूक्ताः । यज्ञ दान तपः क्रियाः - पूर्वोक्ताः सात्त्विक राजस तामस रूपा स्त्रिविधा अपि सर्वाक्रियाः । ओमिति । उदाहृत्य - उच्चार्य । प्रवर्तन्ते - प्रकर्षेणवर्तन्ते । ससम्बान्धिकं प्रणवप्रयुक्ता एता आरभ्यन्त इति यावत् । तासामोंकार पूर्वकतयाऽऽरम्भस्सुप्रसिद्धः , कर्मणा मप्योंकार पूर्वकतयैवानुष्ठानंच सिद्धम् , कर्तॄणां त्रैवर्णिकानामपि तादृशवेदोच्चारयितृत्वात्तादृशकर्मणां च- ओंकारान्वयोऽस्तीतित्रयाणां तदन्वयस्सिद्ध इति भावः । अत्रादा वोंकारोच्चारणं वेदान्तव्युत्पत्तिमतां सर्वान्तरात्म समाराधन स्वाभि संधिना ऽव्युत्पन्नानां मांगळिकतया त्रिवर्गसिद्ध्यर्थं चेतिद्रष्टव्यम् । अनेनोंकारो बुभुक्षु मुमुक्षु साधारणइत्युक्तं भवति ॥ २४ ॥

तदित्यनभिसंधाय फलं यज्ञतपः क्रियाः ।
दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥ २५ ॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणितथा सच्छब्दः पार्थयुज्यते ॥ २६ ॥

अथ मुमुक्षु मात्रार्थतया त्रयाणां ब्राह्मणवेदयज्ञानां तदिति निर्देशान्वयं दर्शयति

मोक्षकांक्षिभिः- मुमुक्षुभिः। विविधाः- सात्विकराजस तामसरूपाः। यज्ञतपः क्रियाः - यज्ञरूपास्तपोरूपाः क्रियाः। दानक्रियाश्च-दानरूपाः क्रियाश्च। च शब्देन पूर्वश्लोकोक्तवेदाध्ययन क्रियाश्च, एताः। तत- भगवदाराधनम् । यत्तत्पदमनुत्तम मित्यस्य भगवन्नाम सहस्रपाठा द्भगवद्वाचकतया तत्समाराधनं लक्ष्यते। तथाच, तदिति-भगवदाराधनमिति बुद्ध्या । फलं- स्वर्गादिकम् । अनभिसन्धाय । क्रियते- अनुष्ठीयते । अनेनयज्ञादीनां भगवत्समाराधनतया तच्छब्दान्वयः, अध्येतव्यवेदस्यापि तत्प्रतिपादकतया मोक्षसाधनत्वाच्च तच्छब्दान्वयः, त्रैवर्णिकानामपि तादृशक्रियानुष्ठानात्तादृश वेदाध्ययनाच्च तच्छब्दान्वय उक्तइति द्रष्टव्यम् ॥ २५ ॥

इदानी मेतेषामेव त्रयाणां सच्छब्दान्वयं वक्तुं सच्छब्द प्रवृत्ति निमित्तं लोकसिद्धमाह (सद्भावइति)

हेपार्थ। सदित्ये तत- पदम्। सद्भावे- देवदत्तस्सन्नित्यादि प्रयोगदर्शनात- विद्यमानतायां। साधुभावे – स्वर्गसाधन सत्कर्मविषय प्रयोगात्पुण्यरूपत्वेच । प्रयुज्यते । तथा । प्रशस्ते- कल्याणे लौकिके कर्मणि । युज्यते- सत्कर्मानेन कल्पितामिति प्रयोगदर्शनात-प्रयुज्यतइत्यर्थः। एवंच मुमुक्ष्वपेक्षित त्रिवर्गसाधन प्रवृत्ति निमित्त योगात्सच्छब्द स्सर्वत्रापि प्रयुज्यतइति भावः॥ २६॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

इति श्रीभगवद्गीतायां सप्तदशोऽध्यायः ।

सच्छब्दं व्युत्पाद्य प्रस्तुते ब्राह्मणादित्रिके तदन्वयं दर्शयति

यज्ञे तपसि दानेच - पूर्वोक्त त्रिविधभेदभिन्न यज्ञदानतपः कर्मसु । स्थितिश्च - श्रद्धया ऽवस्थानम् । सदिति । उच्यते । चशब्देन त्रैवर्णिकाः - वैदिककर्माणि - तत्प्रतिपादकावेदाश्च समुच्चीयन्ते । तदर्थीयं - तेषां - त्रैवर्णिकानाम् , अर्थीयं - त्रिवर्गरूपार्थसाधनम् । कर्म चैव - यज्ञदानादिकर्मच । सदित्येवाभिधीयते - सदिति निर्देशेनैवोच्यते , वेदावैदिककर्माणि त्रैवर्णिकाश्च बुभुक्षवस्सच्छब्दान्विता एवेति भावः ॥ २७ ॥

अध्यायारम्भे ' यश्शास्त्रविधिमुत्सृज्ये ' त्यादि प्रश्नोत्तरसन्दर्भेण श्रद्धापूर्वकस्याप्यागमसिद्धस्याऽसुरत्वेना सत्त्वमुक्तम् , इदानींश्रद्धा पूर्वक वेदमूल त्रिविध यज्ञादीनां सच्छब्दान्वयसिद्ध्यर्थं वेदमूलकस्याप्यश्रद्धापूर्वकत्वे ऽसत्त्वमाह

हे पार्थ । अश्रद्धया कृतम् । यत् । हुतं - होमः । दत्तम् - दानम् । तप्तम् - तपश्च । तत् सर्वम् । असदिति - उच्यते - सच्छब्दानन्वया दसदित्युच्यते । कुतइत्यत्राह । तत् - अश्रद्धयाकृतहोमा

दिकम् । इह - संसारदशायाम् । नो - उपकारकं नभवति , त्रिव
साधनं नभवतीत्यर्थः । प्रेत्यच - मुक्तिदशायांचेति यावत् । नो-उपकारक
नभवति , मोक्षसाधनमपि नभवतीत्यर्थः । किंतु वेदोक्तमपि श्रद्धायुक्त
मेवैहिकामुष्मिकफलसाधनत्वा स्वच्छन्दान्वितमिति - अशास्त्री
श्रद्धायुक्तम प्यसत्त्वान्नानुष्ठेयमिति श्रद्धायुक्तमेववैदिकं कर्म सत्त्व
दनुष्ठेयमिति चाध्यायसारार्थ इति भावः ।

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरद
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां
सप्तदशोध्यायः ।

श्रीरस्तु

अथ अष्टादशोऽध्यायः ॥

अर्जुन उवाच

सन्नयासस्य महाबाहो तत्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

पूर्वाध्यायद्वये देवासुरविभागानुक्तिमुखेन हेयोपादेयविभागः । उपादेयस्या संगकर्मणस्सात्विकाहारसेवाद्युपचित सत्त्ववृद्ध्या ऽऽरंभः, तस्यच सच्छब्दान्वयोल्लक्षणं बाह्यागमविषय त्रिवर्गसाधनकर्मण श्रौतात्सच्छब्दनन्वयो लक्षणं- चतुर्वर्गसाधन कृत्स्नवैदिक कर्मणो लक्षणं प्रणवान्वयः- भगवत्प्राप्तिसाधन कर्मणोलक्षणं च सच्छब्दान्वयः- अश्रद्धाकृतस्य वैदिकस्याप्यसच्छब्दान्वय इति चोक्तम् । इदानीमपवर्गसाधनस्या संगकर्मणएव मोक्षसाधनतयो पयोगित्वविशेष उच्यते । तत्र तावत्त्याग सन्न्यासयोर्मोक्षसाधनतया तत्र तत्र निर्देशदर्शनात्तयोः पृथक्त्वैकत्व निर्णयाय स्वरूपनिर्णयाय चार्जुनः पृच्छति (सन्नयासस्येति)

हेमहाबाहो ! सन्नयासस्य- ' वेदान्तविज्ञान सुनिश्चितार्था स्सन्न्यास योगाद्यतयश्शुद्धसत्वाः , ते ब्रह्मलोकेतु परांतकाले परामृतात्परिमुच्यन्तिसर्वे' इतिश्रुतौसन्नयासविशिष्टकर्मयोगशुद्धांतःकरणा यतयःपरिमुच्यन्तइति मोक्षसाधनतयोक्तस्य सन्नयासस्य । त्यागस्य च- " न कर्मणा न प्रजयाधनेनत्यागेनैके अमृतत्वमानशुः " इति श्रुतौ मोक्षसाधनतयोक्तस्य त्यागस्यच । तत्वं - याथात्म्यम् । वेदितुं - ज्ञातुम् । इच्छामि । हेकेशिनिषूदन । हृषीकेश । पृथक् - भिन्नरूपम् । तत्त्वंच । वेदितुम्

श्रीभगवानुवाच

काम्यानां कर्मणां न्यासं सन्यासं कवयोविदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

इच्छामीत्यनुषंगः । अयंभावः - कर्मस्वरूपमात्रस्य त्रिवर्गापवर्ग साधारणतया मोक्षासाधारणतयोक्तयो स्तद्विषययो स्सन्यासत्यागयोः - स्यक्तं - सन्यस्तमिति पर्याय प्रतिपाद्यत्वदर्शनेन तयोरभिन्नत्वेतत्स्वरूप ज्ञातव्यं - सन्नयास शब्दस्य चतुर्थाश्रमेपिरूढ़ेस्सन्नयास त्यागयोर्भेदेपि तत्स्वरूपमवश्य ज्ञातव्यमिति ॥ १ ॥

अथ मोक्षोपयोगिनो स्सन्नयासत्यागयोरेकमेव स्वरूपं - तच्चे दृशमिति निर्णयन् भगवानुवाच -

कवयः - सन्नयासतत्ववेदिनः । सन्नयासं - मोक्षशास्त्रस्थ सन्नयासशब्दवाच्यम् । काम्यानां - स्वर्गादित्रिवर्गमात्र फलकानां कर्मणाम् । न्यासं - स्वरूपत्यागम् । विदुः - वदन्ति । अयंभावः - मुमुक्षुभिः काम्यकर्माणि न कर्तव्यानि - नित्य नैमित्तिक कर्मणामिव तेषामकरणे प्रत्यवायाभवात । प्रत्युत तत्फलस्य त्रिवर्गस्य - "वासुदेवमनायस्य जपहोमार्चनादिषु । तस्यांतरायो मैत्रेय देवेन्द्रत्वादिकं फलम्" इत्युक्तरीत्या मुक्तिफलप्रतिबन्धात्मकत्वाच्च । अतः काम्यकर्मस्वरूपत्यागएव सन्नयास शब्दार्थइति । विचक्षणाः - पण्डिताः । त्यागं-मोक्षशास्त्रस्थत्यागशब्दोक्तं तमेवसन्नयासं । सर्वकर्म फलत्यागं - सर्वेषां- नित्यनैमित्तिक काम्यरूपाणां कर्मणां, यानिफलानि, तेषां, त्यागं - वर्जनम् । प्राहुः । अयम्भावः - यदि मुमुक्षूणां स्वफलविरोधा त्काम्यकर्म स्वरूपत्याग एवोच्यते तर्हि विरुद्धं फलमात्रमेवत्यज्यताम्, नत्वविरुद्धं कर्मस्वरूपमपि; नच तदनुष्ठाने प्रयोजनाभावः, नित्यनैमित्तिकेष्विव भगवत्प्रीतेरेव फलत्वात; नच नित्यनैमित्तिकेषु "स्वकर्मणा तमभ्यर्च्यसिद्धिंविन्दति

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥ ३ ॥

मानवः । " इत्यादिवत् - काम्यानां भगवत्प्रीति साधनत्वेमानाभावः, "योहवै तदक्षरं गार्ग्यविदित्वाऽस्मिन् लोकेजुहोति यजते तपस्तप्यते बहूनि वर्षशतान्यंतवदेवास्य तद्भवती " तिश्रुत्या याग होम तपो दानादीनां भगवद्वेदनपूर्वकत्वेन तदभावेनच नित्यानित्य फलकत्व प्रतीत्या नित्यनैमित्तिकवदेव भगवत्समाराधनत्वसिद्धेः, अतएव - 'सर्व कर्म फलत्याग' मित्यनेन नित्यनैमित्तिकवदेव काम्यस्यापिफलत्यागएवत्यागः- न स्वरूपत्याग इति भगवतैवोप बृंहितेयंश्रुतिः ; अन्यथा सर्वशब्दवैयर्थ्यप्रसंगादिति । अतो मोक्षशास्त्रस्थ सन्न्यासत्याग शब्दार्थस्य काम्यकर्म स्वरूपत्याग सर्वकर्मफलत्यागात्मकत्व विषयेयं वादिविप्रतिपत्तिरितिभावः । अत्र सन्न्यासत्यागयो रेकत्व मंगीकृत्यैव भगवतोत्तरं दत्तम्, उभयोर्भेदांगीकारेणैव व्याख्यानाविरोधस्तूत्तरत्र स्पष्टयिष्यते ॥ २ ॥

पूर्वं फलविरोध तदभावाभ्यां वादिविप्रतिपत्तिरुक्ता । इदानीं दोषयोग तदभावाभ्यां वाद्यन्तर विप्रतिपत्तिमाह -

एके - केचन । मनीषिणः - विद्वांसः, सांख्याः तन्मतानुसारिणो वैदिकाश्च । दोषवत् - रागहिंसादि दोषयुक्तम् । कर्म - सर्वं वैदिक कर्मेत्यर्थः ; नतु काम्यमात्रम्, प्रथमपक्षेण पौनरुक्त्यापत्तेः । अतः । सर्वमपि । त्याज्यं - दोषवत्त्वेन मुक्तिप्रतिबन्धकत्वान्मुमुक्षूणां वर्जनीयम् । इति । प्राहुः । तदुक्तं सांख्यशास्त्रे - " दृष्टवदानुश्रविकस्सह्यविशुद्धिक्षयातिशययुक्त "इति । अपरे - अस्मन्मतानुसारिणः । यज्ञ दान तपः कर्म - यज्ञ दान तपोरूपं शास्त्रविहितं क्रियासामान्यम् । न त्याज्यं - हिंसाद्यन्वितमपि न वर्जनीयम् अपितु तथाभूतं लौकिकमेव त्याज्यम् । इति च प्राहुः ॥ ३ ॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥ ४ ॥
यज्ञदान तपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

एवं वादिविप्रतिपत्तिमुपन्यस्य स्वसिद्धान्तमाह –

हे भरतसत्तम । तत्र- पूर्वोक्तरीत्या सन्दिग्धेत्यागेविषये । निश्चयं - त्यागविषय संशयनिवर्तन क्षमं निर्धारणम् । मे - भ्रमादि दोषरहिता त्सर्वज्ञादात्मनः । शृणु । पुरुषव्याघ्र । त्यागः - क्रियमाण वैदिक कर्मविषयः परित्यागः । त्रिविधः - कर्मजन्यस्वर्गादिफलं मेभूया दितिफला भिसन्धित्यागएकः , मत्फलसाधनत्वा न्मदीयमिदं कर्मेति ममताबुद्धित्यागरूपोऽपरः , अस्मिन्कर्मण्यहं कर्तेति बुद्धिं परित्यज्य सर्वेश्वर कर्तृत्वाभि सन्धिरूप स्तृतीयइति । सम्प्रकीर्तितोहि - ' मयि सर्वाणि कर्माणि सन्नस्याध्यात्मचेतसा । निराशी निर्ममोभूत्वा युध्यस्वविगतज्वर' इति पूर्वमेवोक्तः खल्वित्यर्थः । अत्र सिद्धान्तकथने त्यागेनिश्चयं शृणवित्युक्त्या सन्न्यासेनिश्चयंशृणवित्यनुक्त्याच पूर्व प्रश्नोत्तर सन्दर्भस्यैकार्थ विषयत्वं स्पष्टम् ॥ ४ ॥

सर्वथा मोक्ष शास्त्रोक्त त्यागो न कर्मस्वरूपविषय इत्याह –

यज्ञ दान तपः कर्म - यज्ञदानतपोरूपं वैदिककर्म सामान्यम् । न त्याज्यं - आत्म वेदनोत्पत्त्यनन्तरमपि न हेयम् । अपितु । तत् - यज्ञादिकं सर्वं कर्म । कार्यमेव , ' आप्रयाणात्तत्रापि हि दृष्ट ' मित्यादि सूत्रोक्तरीत्या यावदायुष महरहः कर्तव्यमेवेत्यर्थः । यतः । यज्ञः दानं तपश्चैव , इत्येतानि । मनीषिणां - मननशीलानाम् , उपासकाना मित्यर्थः । पावनानि- उपासनप्रतिबन्धक प्राचीन कर्मनिवर्तकानीत्यर्थः अनेनदोषवत्त्वाक्षेपो निरस्तोवेदितव्यः ॥ ५ ॥

एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानिच ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥
नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्याग स्तामसः परिकीर्तितः ॥ ७ ॥

निश्चयं शृणित्यत्रोक्तं निश्चयं तथैव दृढीकुर्व न्नुपसंहरति –

हे पार्थ । एतान्यपि - यान्युपासकानामपि पावनानि-एतान्यपि कर्माणि । संगं - कर्तृत्व ममता बुद्धिम् । फलानिच - फलाभिसंधिंच । त्यक्त्वातु - परित्यज्यतु । कर्तव्यानि - अवश्यकार्याणि । इति । निश्चितं - निर्धारितम् । उत्तमं - सर्वातिशायि । मे - मम । मतम् । मत्संबन्धिसिद्धान्तइत्यर्थः ॥ ६ ॥

त्याज्यं दोषवदिति सांख्यमतं वेदबाह्यमततुल्यत्वा न्निरा करोति –

नियतस्य- वर्णाश्रम नियत पंचमहायज्ञादि नित्य नैमित्तिकरूपस्य । कर्मणः । सन्न्यासः । नोपपद्यते - नैवयुज्यते । पंचमहायज्ञादिकर्मणः । मोहात् । परित्यागः - सन्न्यासः । तामसः - तमोगुणप्रभवः । परिकीर्तितः - कथितः । अयंभावः - महायज्ञाद्यकरणे यज्ञशिष्टाशना लाभात्- 'आहारशुद्धौसत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष'इति मुक्तिसाधनतयोक्त शुद्धाहारालाभात्, 'ते त्वघंभुञ्जते पापा ये पचंत्यात्मकारणात् ।' इत्युक्तरीत्या पापाशनप्रसक्त्यादि विपरीतज्ञान फलकः सर्वकर्मफलत्याग स्तामस इति पूर्वमेवोक्तमिति। 'अत्रापि कर्मण स्सन्न्यासो नोपपद्यत ' इत्युपक्रम्य त्यागइति त्यागशब्देनानुवादा त्तयो रेकार्थत्वं ज्ञायत इत्यर्थभेदांगीकारेण व्याख्या नोचितेति भावः ॥ ७ ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
संगं त्यक्त्वा फलं चैव सत्यागः सात्विको मतः ॥ ९ ॥
न द्वेष्ट्य कुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

कायक्लेशभयात - कायस्य-शरीरस्य , क्लेशः-आयासः , तस्माद्धयं अवसादः, तस्माद्दुःखात्‌ अर्थार्जनादि साध्यत्वाच्च । दुःखमित्येव नत्वधर्मत्व बुद्ध्येतिभावः । कर्म-पंचमहायज्ञादि नित्यनैमित्तिकादि कर्म । यः । त्यजेत-योगनिष्पत्त्यर्थे ज्ञानाभ्यास मेवालम्ब्य नित्यनैमित्तिकादि कर्मत्यागं कुर्यादितिभावः । सः । राजसं - रजोमूलम् । अय थावस्थित शास्त्रार्थरूपमित्यर्थः । त्यागं - नित्यादित्यागम् । कृत्वा । त्यागफलं - सात्विकत्याग फलमात्म साक्षात्कारम् । नैवलभेत - नैवप्राप्नुयात । किंतु कर्मणैव । नच कर्मणोदुःखरूपत्वान्मनः प्रसादाभावः - स्वाराधन मियत्वेन भगवतो मनःप्रसादन संपत्तेरिति भावः ॥ ८ ॥

आत्मसाक्षात्कारहेतुं सात्विकत्यागमाह -

हे अर्जुन । नियतम् कर्म - पंचमहायज्ञादिकर्म । संगं-कर्मणि ममता कर्तृत्वाभिसन्धिम् । फलंचैव - स्वर्गाद्यभिसन्धिंच । त्यक्त्वा । कार्यमित्येव - मदाराधनत्वात् स्वयं प्रयोजनमित्येव । क्रियतेयत् क्रियते चेत् । सः त्यागः । सात्विकः- सत्त्वमूलः । मतः-सम्मतः । यथावस्थित शास्त्रार्थज्ञान मूलक इत्यर्थः । सत्त्वं यथावस्थितज्ञान हेतुरिति पूर्वत्रोक्त त्वा च स्पष्टमितिभावः ॥ ९ ॥

सात्विकत्यागवतः - उदासीनवदासीन इत्याद्युक्तरीत्या विकाराभावोलक्षणमुच्यते -

सत्त्वसमाविष्टः - प्रवृद्धसत्त्वगुणनिष्ठः । अतएव । मेधावी - यथास्थितवस्तुतत्त्वज्ञः । अतएव । छिन्नसंशयः - निश्शेषनिवृत्तसंशयः ।

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागी त्यभिधीयते ॥ ११ ॥
अनिष्टमिष्टं मिश्रंच त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्यासिनां क्वचित् ॥ १२ ॥

त्यागी - त्रिविधत्यागनिष्ठः पुमान् । अकुशलं - ग्रामादिकं निषिद्धकर्म । नद्वेष्टि । कुशले - कल्याणेस्वर्गादि साधनेकर्मणि । नानुषज्जते - नात्यन्तप्रीतिमामान् भवति । त्यक्तब्रह्मव्यतिरिक्तफलत्वा त्कर्मणि ममता रहितत्वा त्कर्तृत्वाभि सन्धिरहितत्वाच्च वासनावशा त्प्रसक्तयो रपि कुशलाकुशलयोः प्रीतिद्वेषरहित इत्यर्थः ॥ १० ॥

अथत्रिविधत्याग एव मोक्षशास्त्रोक्तत्यागः-नकर्मस्वरूपत्यागः - अशक्यत्वादित्याह -- (नहीति)

देहभृता - देहधारिणा । अशेषतः - कार्त्स्न्येन । कर्माणि - अन्नपानादीनि तदनुबन्धीनि महायज्ञद्रव्यार्जनादीनिच । त्यक्तुं - हातुम् । नशक्यंहि । किन्तु । यः । कर्मफलत्यागी - पंचमहायज्ञ फलकामनारहितः । अनेनैव कर्मण्यममता कर्तृतात्यागोप्यर्थसिद्धः । अत्र त्रिविधत्यागी य इत्यर्थः । सः । त्यागीति - 'सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः । त्यागेनैके अमृतत्वमानशुः ।' इत्यादि शास्त्रोक्तत्यागीति । अभिधीयते - तत्त्ववेदिभिः प्रोच्यतइत्यर्थः ॥ ११ ॥

ननु दर्शपूर्णमासज्योतिष्टोमादीनि फलसंबन्धितयैव श्रूयन्ते, नित्यनैमित्तिकान्यपि - 'प्राजापत्यं गृहस्थाना' मित्यादिना तत्तत्फलसाधनतयैव स्मर्यन्ते, अतस्तत्तत्फलसाधन स्वभावतया लौकिक कर्मवत्फलानभिसन्धानेपि फलावश्यंभावा दमृतत्वफलार्थिनो विषसंवीजावापवन्मोक्षफलार्थिनः कर्मानुष्ठाने मोक्षविरुद्ध फलावाप्तिरवर्जनीया, अतस्तत्स्वरूपत्यागएव मोक्षशास्त्रार्थः, नफलत्याग इत्यत्राह -

अनिष्टं - नरकादि । इष्टं - स्वर्गादि । मिश्रंच - इष्टानिष्टरूप पशुपुत्रादिच । इति । त्रिविधं - त्रिप्रकारम् । फलम् । कर्मणः -

पंचैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

वेदोक्तानिषिद्ध ज्योतिष्टोमादि पुत्रेष्ट्यादि कर्मजातात । अत्यागिनां-त्रिविधत्यागरहितानाम् । कर्तृत्वाद्यभिसन्धि मतामितियावत् । प्रेत्य-मृत्वा, कर्मानुष्ठानोत्तरकाल मित्यर्थः । भवति - उत्पद्यते । सन्नया सिनांतु - त्रिविधत्यागिनांतु । क्वचित् - इहपरत्रवा । तत्फलम् ! नभव तीत्यर्थः । अयंभावः - नहिबीजावापादि लौकिककर्मणामिव वैदिक कर्मणामप्यनुद्दिष्ट फलजनक स्वभावता, फलसाधनताग्राहक शास्त्र विरोधात ; शास्त्रंहि - स्वर्गकामोयजेतेत्यादि कामविषयस्यैव स्वर्गा देःफलत्वं यागादेश्च तत्साधनतां बोधयति ; अतस्त्यागिनो मुमुक्षो रकाम्यतया तदनुष्ठितान्नित्यादिकर्मणो नस्वर्ग पश्वाद्युत्पत्तिः ; अपि तु - 'तमेतं वेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसा नाशकेने' त्यादि श्रुत्या कर्मणा मिष्यमाणज्ञान साधनत्वविधाना दिच्छा विषयात्मसाक्षात्कारफलं सिद्ध्यतीति । एवम्मुमुक्षोः प्रामादिक निषिद्धकर्मण्यपि कर्तृत्वाद्यनभिसन्धानादेव नानिष्टफलं जनयतीति ध्येयम् ॥ १२ ॥

पूर्वं कर्मस्वरूपत्यागस्य तामसत्वा त्क्रियमाणेष्वेव कर्मसु फल ममता कर्तृत्वाभिसन्धि त्याग एव शास्त्रसिद्धस्सन्न्यासः - स एव त्यागश्चेत्युक्तम् । इदानीं मेतत्सिद्ध्यर्थं मन्तर्यामिणि भगवति कर्तृत्वाभि सन्धिप्रकारमाह ।

हेमहाबाहो । सर्वकर्मणाम् । सिद्धये निष्पत्तये । सांख्ये - वैदिक बुद्ध्या यथावस्थितवस्तुविषयया निष्पादिते । कृतांते - सिद्धान्ते । प्रोक्तानि । एतानि - वक्ष्यमाणानि । पंच । कारणानि । मे-मत्तः । निबोध अवगच्छ । अयंभावः - 'य आत्मनितिष्ठन्नात्मनोंतरो यमात्मानवे

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

दयस्यात्माशरीरं सआत्मानमन्तरोयमयति । अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा ।' इत्यादि श्रुतयः-शरीरेंद्रिय मनःप्राणजीवात्मोप करणं परमात्मानमेव कर्तारं निर्धारयन्ति । अत्र स्वशेषभूतेन जीवेन भगवान् स्वधृतवस्त्राभरणादिन्यायेन स्वशेषभूतै जीव करणकळेबरादिभिश्च - लोकवत्तुलीलाकैवल्य मिति न्यायेन सिद्धस्वलीला प्रयोजनाय लौकिकं वैदिकं कर्मारभते । अतोजीव गतक्षुन्निवृत्त्यादि फलं तत्साधनकर्मच शुकादि पोषणवत्परमपुरुषस्यैव प्रयोजनतया पर्यवस्यतीति सिद्धम् ॥ १३ ॥

तदेवाह (अधिष्ठानमिति)

न्याय्यंवा- धर्म्यंवा । विपरीतंवा- अधर्म्यंवा । शरीरवाङ्मनोभिः शरीरेण- वाचामनसाच । यत् । कर्म । नरः । प्रारभते- अनुतिष्ठति ; तस्य- कर्मणः । एते । पंच । हेतवः- कारणानि । तान्येवाह 'अधिष्ठान' मित्यादिना । अधिष्ठानं- अधिष्ठीयते जीवात्मनेत्यधिष्ठानम्, भूतसं घातरूपं शरीरम् । तथा । कर्ता- जीवात्मा । पृथग्विधं- नानाव्यापार युक्तम् । करणंच - समनस्कं कर्मेन्द्रिय पंचकं ज्ञानेन्द्रिय पंचकंच । विविधा- प्राणापानादि बहुप्रकारा । पृथक्चेष्टाच- प्राणापानादि भेदेन पृथग्भूतस्यवायोश्चेष्टाच । अत्र - कर्महेतु कलापे । पंचमम् । दैवंचैव- अन्त र्यामीपरमात्माच । इत्येते पंचहेतव इतिपूर्वेणान्वयः । ननु- अस्मिन्लोके कर्तृशब्देन जीवोनिर्दिष्टः, कर्ताच स्वतन्त्रइति तंप्रतिपरमात्मनःकरण कळेबरादिव द्गुणभूतत्वमायातीतिचेन्न ; 'सर्वस्यचाहं हृदिसन्निविष्टो मत्तस्स्मृति र्ज्ञानमपोहनंचे' ति-'ईश्वरस्सर्वभूताना'मितिच पूर्वोत्तरसंदर्भेण- 'परात्तुतच्छ्रुते' रिति ब्रह्मसूत्रोक्तरीत्या- 'एष एव साधुकर्म कारयति

तत्रैवं सति कर्तार मात्मान ङ्केवलन्तु यः ।
पश्यत्यकृतबुद्धित्वा न्न स पश्यति दुर्मतिः ॥ १६ ॥

त' मिति श्रुत्याच जीवकर्तृत्वे परमात्मायत्तत्वस्य स्फुटमवगमेन जीवस्यैव भगवत्पारतन्त्र्य प्रसिद्धेः । ननु परमात्मनाप्रेरितो जीवोयदिहित निषिद्धयोः प्रवर्तेत तर्हिवायूदकादि प्रेरिततृणादिवन्नकार्यताबुध्येति कार्यताबुद्ध्या ऽप्रवृत्तत्वाद्विधिनिषेध शास्त्रकिंकरोनस्यात्- कथं तुवा तर्हि तस्य प्रवृत्तिनिवृत्यो र्विधिनिषेधशास्त्रार्थवत्त्वमितिचेन्न - अनाकलित वेदान्ताभिप्रायतानिबन्धनंह्येतच्चोद्यम् । नहि परमात्मावायवादिवद्बलात्प्रेरयति , अपितुपरमकारुणिकतया जीवस्यकरणकळेबरादीनि तेषां प्रवृत्तिनिवृत्त्यनुकूलां शक्तिं भूतलादिवत्स्वरूपेण स्वसंकल्पेणच तेषांजीवस्यच दत्वा-उदासीनवदन्तर्यामिणिस्थिते स्वपूर्वकर्मवासनानुगुणेच्छया जीवः क्वचित्प्रवर्तते - तदप्रतिषेधात्मकानुमति मात्रेणान्तर्यामिणि स्थिते तन्निष्पादनेच सत्युत्पन्नज्ञानचिकीर्षा प्रयत्नत्वलक्षण जीवकर्तृत्वस्लाभ परमात्मायत्तेऽनन्तरं चोदासीने तस्मिन् प्रथमं स्वतन्तत्र प्रवृत्तिहेतुताया जीवस्य संभवेन सर्वसामंजस्यमितिभावः ॥१५॥

ननु विधिनिषेधशास्त्रार्थवत्त्वाय जीवस्य कर्तृत्वाभ्युपगमे ऽकर्तृत्वानुसन्धानं भ्रमएवस्यादित्यत्राह ।

एवंसति-जीवकर्तृत्वे परमात्मानुमति पूर्वकेसति । तत्र - तस्मिन् कर्मणि । आत्मानं केवलं-आत्मानमेव । कर्तारं । यस्तु पश्यति- अहमेव कर्तेति यस्तुमन्यत इत्यर्थः । सः-पुमान् । अकृतबुद्धित्वात - अनिष्पन्नयथावस्थित बुद्धित्वात । दुर्मतिः- विपरीतमतिस्सन् । नपश्यति-आत्मानं यथावस्थितं परतन्त्र कर्तारं नपश्यतीत्यर्थः । अतएव स्वतन्त्र कर्तृत्वधीरेव भ्रमइतिभावः ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्नहन्ति न निबद्धयते ॥ १७ ॥
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

अकर्तृत्वानुसन्धानमेव विशदयति॥-

यस्य - पुंसः । भावः - कर्तृत्वविषय मनोवृत्तिः । नाहंकृतः - नाहमभिमानकृतः । अहमेवस्वतन्त्रः करोमीत्यभिमानेन नकृत इत्यर्थः । अतएव । यस्य । बुद्धिः । नलिप्यते - नसज्यते । स्वफल ममतासक्ता नभवतीत्यर्थः । सः - पुमान् । इमान् । लोकान् हत्वापि - हिंसित्वापि । नहन्ति - हननदोष भाङ्नभवति । ननिब ध्यते - तेनकर्मणा नानिबध्यते । तत्फलं नानुभवतीत्यर्थः । अनेन कथं भीष्ममहंसंख्ये - इत्यादिक्रमपि प्रतिक्षिप्तं भवतीतिद्रष्टव्यम् ॥ १७ ॥

इयता प्रबन्धेन सन्न्यासशब्दार्थं स्त्रिविधत्यागश्शोधितः । अस्यच सर्वमिदमकर्तृत्वाद्यनुसन्धानं सत्त्वगुणवृद्धयैव भवतीति कर्मचोदनानुबन्धिनां ज्ञानादीनां सत्त्वादिगुणत्रैविध्येन त्रैविध्यं प्रपंच यिष्यन् कर्मचोदनां निरूपयति ॥ -

ज्ञानं - कर्मविधिवाक्यजन्यं ज्ञानम् । इदं कर्ममयाकर्तव्यमिति ज्ञानम् । ज्ञेयं - तज्ज्ञानविषयज्योतिष्टोमादिकर्म । परिज्ञाता फल कामिनोममेदं कर्तव्यमिति कार्यबोद्धाचेतनः । इति त्रिविधा । कर्मचोदना - बोधबोद्धव्यबोद्धृयुक्तः कर्मविधिरित्यर्थः । तत्रबोद्धव्य मितिचोक्तं कर्मैव ससंबन्धिकं विवृणोति (करणमिति) कर्म संग्रहः - संगृह्यते ऽनुष्ठानार्थं संक्षिप्यतइतिसंग्रहः, कर्मचासौसंग्रहश्च कर्मसंग्रहः करणं व्रीहिभिर्यजेतेतिविहित व्रीह्यादिद्रव्यम् कर्म तात्पर्यार्थ यागादि । कर्ता - तदनुष्ठाताच । इति । त्रिविधः । पूर्वं बाह्यरसकर्मानु

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥
सर्वभूतेषु येनैकं भाव मव्यय मीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥

ज्ञानार्थं कर्तृत्वावस्थामापन्नत्वा द्गुणभूतेन कर्त्रा व्रीह्यादिद्रव्येण स्वस्वरूपेण च त्रिप्रकारं कर्मेत्यर्थः ॥ १८ ॥

एवं कर्मचोदनां तद्विषयं कर्मच विविच्य चोदनानुबन्धिनां ज्ञानादीनां त्रैविध्यं गुणतो दर्शयितुं पूर्वश्लोकोक्तं निष्कृष्यानुवदति (ज्ञानमिति) ज्ञानं- कर्तव्य कर्मविषयं ज्ञानं । कर्मच- अनुष्ठीयमानं ज्योतिष्टोमादिकर्मच । कर्ताच- अस्यानुष्ठाताच । गुणसंख्याने- गुणकार्य गणने । गुणभेदंतः- सत्वादिगुणभेदात । त्रिधैव । प्रोच्यते । तान्यपि- सत्वादिगुण भेद भिन्नानि ज्ञानादीन्यपि । यथावत श्रृणु - सावधानतया यथावच्छ्रवणयोग्यो भवेत्यर्थः । अत्रपूर्वश्लोकोक्तस्य कार्यकर्मज्ञानस्य ज्ञानशब्देन- तादृशज्ञानाश्रयस्य कार्यकर्मबोद्धुः कर्तृशब्देन- करणनिष्पाद्यत्वेन निर्दिष्टस्य कर्मणः कर्मशब्देनचानुवाद इतिद्रष्टव्यम् ॥ १९ ॥

एवंचोदनानुबन्धिनो निरूप्याद्यस्य गुणतस्त्रैविध्यं प्रतिपादयति "सर्वभूते" ष्वित्यादिभिस्त्रिभिः ।

विभक्तेषु- सितनीलादिरूपेण पृथग्भूतेषु । सर्वभूतेषु - ब्राह्मणक्षत्रियादिवर्ण ब्रह्मचारि गृहस्थाश्रमादि नानाप्रकारेष्वचित्संसृष्टजीवेषु । अविभक्तं 'गवामनेकवर्णानां क्षीरस्यत्वेकरूपते' ति श्रुत्युक्तरीत्या ज्ञानैकाकारतया विभागरहितम् अव्ययं- व्ययस्वभावेष्वपि ब्राह्मणादिशरीरेषु नाशरहितम् । एकं-ज्ञानैकाकारतयैकरूपम् । भावं-आत्मवस्तु ।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥
यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्वार्थवदल्पं च तत्तामसमुदाहृतं ॥ २२ ॥
नियतं सङ्गरहितमरागद्वेषतः कृतं ।
अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥

येन- कर्मकर्तव्यता ज्ञानेन । ईक्षते- पश्यति । कर्माधिकारवेळायां सर्वाधिकारिषु शुद्धात्मस्वरूपं विषयीक्रियत इत्यर्थः । तज्ज्ञानम् – तादृशकर्मकर्तव्यताज्ञानम् । सात्विकं- सत्वमूलम् । विद्धि ॥२०॥

राजसं कर्मकर्तव्यता ज्ञानमाह (पृथक्त्वेनेति) यज्ज्ञानम् ।

सर्वेषु । भूतेषु - ब्राह्मणादिशरीरेषु । पृथक्त्वेनतु - ब्राह्मणत्वाद्याकारपृथक्त्वेन सितनीलादिभेदेनच । नानाभावान्- नानाभूतात्मनः । पृथग्विधाम्- नानारूपानेव । वेत्ति- प्रकाशयति । तत् । ज्ञानम् । राजसं- रजोमूलम् । विद्धि ॥ २१ ॥

तामसं कर्मकर्तव्यता ज्ञानमाह

यत्तु- कर्मकर्तव्यता ज्ञानम् । एकस्मिन् - एकफलेकर्मणिप्रेतभूतगणाद्याराधने । कृत्स्नवत्- कृत्स्नफलसाधनइव । सक्तं- आसक्तम् । अहेतुकं- अत्यल्पसाधनतया कृत्स्नफलसंगहेतुरहितम् । अतत्त्वार्थवत् - राजसकर्तव्यताज्ञानवदेव- आत्मन्येकरूपेपि मिथ्याभूतपृथक्त्वविषयम् । अल्पंच - अल्पनिहीनाराधनविषयत्वा त्स्वरूपतः फलतश्चाल्पम् । तत्- ज्ञानम् । तामसं- तमोमूलकम् । उदाहृतम्॥२२॥

एवं ममेदंकर्तव्यमिति कर्मकर्तव्यताज्ञानस्यानुष्ठानवेळायां स्वांशादिविषये गुणतस्त्रैविध्यमुक्त्वा कर्तव्यस्य कर्मणो गुणतस्त्रैविध्यमाह-

नियतं - वर्णाश्रमनियतं । संगरहितं - कर्तृत्वादि संगशून्यम् । अफलप्रेप्सुना - फलं - स्वर्गादि , प्राप्तुमिच्छतीति फलप्रेप्सुः , स नभव

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजस मुदाहृतम् ॥ २४ ॥
अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म तत्तामसमुदाहृतम् ॥ २५ ॥

तीत्य फलमेप्सुः, तेनपुंसा । अरागद्वेषतः - कीर्तिरागापकीर्तिद्वेषाभ्यां विना, अदंभेनेत्यर्थः । यत् । कर्म । कृतम् - भगवदाराधनतया स्वतःप्रयोजनमित्यनुष्ठितम् । तत् - कर्म । सात्विकं - सत्त्वमूलम् । उच्यते - सत्त्वगुणतत्त्ववादिभिः कथ्यत इत्यर्थः ॥ २३ ॥

राजसं कर्माह -

यत् कर्मतु । कामेप्सुना - फलकामिना । साहंकारेणवापुनः - अत्रवाशब्दश्चार्थे - अहमेव करोमीत्यभिमान वताच पुंसेत्यर्थः । बहुलायासं - प्रवृत्तिस्वभाव रजोमूलकत्वा द्बहुवित्तव्ययायासयुक्तं सत् । क्रियते । तत् - कर्म । राजसं - रजोमूलम् । उदाहृतं-उक्तम् ॥ २४ ॥

तामसकर्म स्वरूपमाह -

अनुबन्धं - अनुबध्यते कर्मणि क्रियमाणे पश्चात्संबध्यते इत्यनुबन्धः दुःखं, तं । क्षयं - कर्मणिक्रियमाणे ऽर्थनाशम् । हिंसां - तत्रैवप्राणि पीडाम् । पौरुषंच - आत्मनि कर्मसमापनसामर्थ्यंच । अनवेक्ष्य - अविमृश्य । मोहात् - परमात्मकर्तृत्वाद्यज्ञानात् । यत् । कर्म । आरभ्यते - उपक्रम्यते । तत् - कर्म । तामसं - तमोमूलम् । उच्यते ॥ २५ ॥

इदानीं सात्विकं कर्तारमाह -

मुक्तसंगोनऽहंवादी धृत्युत्साह समन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥ २६ ॥
रागी कर्मफलप्रेप्सु लुब्धो हिंसात्मको ऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

मुक्तसंगः - त्यक्तफलसंगः । अनहंवादी - अहमेव कर्तेतिवदन शीलरहितः । धृत्युत्साह समन्वितः - धृतिः - आरब्धेकर्मणितत्समाप्ति पर्यंतानुषक्तावर्जनीय दुःखधारणम् , उत्साहः - मानासिको योग शालित्वम् , ताभ्यां , समन्वितः - सम्यग्युक्तः । सिद्ध्यसिद्ध्योः - आरब्धकर्म फलनिष्पत्त्यनिष्पत्त्योः । निर्विकारः - अविकृतचित्तः । कर्ता । सात्विकः - विवृद्धसत्त्वः । उच्यते । सत्त्वगुणयाथात्म्य विद्भिः कथ्यत इत्यर्थः ॥ २६ ॥

राजसंकर्तारमाह -

रागी - यशोनुरागी । कर्मफलप्रेप्सुः - कर्मफलानि - स्वर्गादीनि, प्रेप्सुः - प्राप्तुमिच्छुः । लुब्धः - कर्मापेक्षितद्रव्यत्याग स्वभावरहितः । अतएव · हिंसात्मकः - हिंसास्वभावः , परान् पीडयित्वा तैः कर्मकुर्वाणः । अशुचिः - कर्मापेक्षित शुद्धिरहितः । हर्षशोकान्वितः- स्वकर्मसिद्ध्यसिद्धिजहर्षविषादयुक्तः । कर्ता । राजसः- विवृद्धरजोगुणः । परिकीर्तितः - रजस्तत्त्वज्ञैः कथितइत्यर्थः । ॥ २७ ॥

तामसंकर्तारमाह

अयुक्तः- अतिमात्रं शास्त्रीयकर्मायोग्यः । प्राकृतः- विवेकशून्यः । स्तब्धः- स्तिमितस्वभावः । अनारम्भक इवियावत् । शठः- गूढविप्रिय

बुद्धे र्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमान मशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ॥ ३० ॥

कृत । अभिचारादिकर्मरुचिरित्यर्थः । नैकृतिकः- वंचनशीलः । अलसः- आरब्धकर्मणोऽपि समापनाशक्तः । विषादी - अतिमात्राव सादशीलः । देशकालवैषम्य शोकवस्त्वनुस्मृत्याद्यनुरोधेन मनोदैन्य शील इत्यर्थः । दीर्घसूत्री- दीर्घं- दीर्घकालघतियथातथा- सूत्रयितुं चिन्तयितुं शीलमस्येति दीर्घसूत्रीच । अभिचारकर्मकुर्वन् परेषु दीर्घ कालवर्त्यनर्थं पर्यालोचन शीलश्चेत्यर्थः । एवंविधः । कर्ता । तामसः - विवृद्धतमोगुणः । उच्यते - तमस्तत्त्वविद्भिः कथ्यत इत्यर्थः ॥ २८ ॥

एवं कर्मचोदनांश भूताना मनुष्ठानकालीन कर्मकर्तव्यताज्ञान कर्मकर्तॄणां गुणतस्त्रैविध्यमुक्तम् । इदानीं तादृशज्ञान हेतुभूतशास्त्र जन्य सकलतत्त्वपुरुषार्थ निर्धारणरूपाया बुद्धेस्तद्दार्ढ्यरूपाया धृतेश्च गुणतस्त्रैविध्यमाह -

हे धनंजय । बुद्धेः - विचारपूर्वक निर्धारणायाः । धृतेश्चैव विघ्नादिशंकाया मप्यारब्धक्रिया निर्वाहक शक्तेश्च । गुणतः - सत्त्वादि गुणवशात । त्रिविधं - त्रिप्रकारम् । भेदम् । पृथक्त्वेन -असं कीर्णरूपतया । प्रोच्यमानं - प्रकर्षेणाऽभिधीयमानं संतम् । अशेषेण कात्स्न्येन । यथावत- संशयविपर्य रहिततया यथोक्तरूपेण । शृणु ॥ २९ ॥

इदानीं सात्त्विकींबुद्धिमाह -

हे पार्थ । या । बुद्धिः- विचारपूर्वकनिर्धारणा । प्रवृत्तिंच स्वर्गाद्यभ्यु दयसाधनकर्मच । निवृत्तिंच-मोक्षसाधनंकर्मच । "प्रवृत्तिलक्षणं धर्मं प्रज

यया धर्म मधर्मं च कार्यं चाकार्यमेवच ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

पतिरथाब्रवीत्। निवृत्तिलक्षणं धर्म मृषिर्नारायणो ब्रवीदि" त्यादि शास्त्र सिद्धं कर्मापीत्यर्थः। वेत्ति-यथावद्विषयीकरोति। मीमांसितशास्त्रप्रयुक्तो भयविधकर्मविषया निर्धारणायस्य पुंसोजायत इत्यर्थः। तथा। कार्या कार्यं - कार्यं - देशकालादि सामग्रीपर्यालोचनेन स्वतः प्रयोजन रूपतया च निवृत्तिलक्षणं निष्कामकर्मैवकर्तव्यम् , अकार्यं - प्रवृत्ति लक्षणं कर्माकर्तव्यंच। या - बुद्धिः। वेत्ति - यथावद्विषयीकरोति पूर्वोक्तनिर्धारणायस्यैवं ज्ञानमुत्पद्यतइत्यर्थः। तथा। भयाभये बिभेत्यस्माज्जन इति व्युत्पत्त्या भयं भयस्थानभूतकाम्य कर्मानुष्ठानम् , सर्वेश्वराज्ञानवर्तनम् , अभयं - अभयस्थान भूतसर्वेश्वराज्ञानु वर्तनंच। वेत्ति। बन्धं यथावदवगत प्रवृत्तिधर्मफलं संसारम्। मोक्षंच- यथाव दवगत निवृत्तिधर्मफलं संसारमोक्षंच। वेत्ति - जानातीत्यर्थः। सा-बुद्धिः। सात्त्विकी - विवृद्धसत्त्वमूला। एवं विधबुद्धियुक्तः परमसात्त्विक इति ज्ञेय इति भावः ॥ ३० ॥

राजसीं बुद्धिमाह -

हे पार्थ। यया- बुद्ध्या। धर्मं- प्रोक्तं द्विविधमपिधर्मम्। अधर्मंच। आगमोक्तं निष्फलकर्मंच। कार्यंच- पूर्वोक्तरीत्या कर्तव्यंच। अकार्यमेव च-अनन्तर पूर्वाध्यायोक्तरीत्या ऽकर्तव्यंच। अयथावत्- यथावास्थितरूपं नभवति-यथातथा। प्रजानाति-निवृत्तिलक्षणो धर्मोमोक्षसाधनतया ऽवश्यं कार्यः, प्रवृत्तिलक्षणस्तु धर्मो ऽभ्युदय साधनत्वेपि बन्धहेतुतया न कार्यः, आगमिकं कर्मतु निष्फलत्वा त्प्रत्युतनिरयहेतुत्वाच्च सुतरामकार्यमिति यथावन्नजानाति , प्रत्युतागमिकमेव कर्म फलवत्कर्तव्यं - निवृत्तिलक्षणं निष्फलत्वा न्न कर्तव्यमिति विषयीकरोतीत्यर्थः। सा - बुद्धिः। राजसी - रजोमूला। एवं विधबुद्धिमान् राजसइतिभावः ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥
धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः ।
योगेनाऽव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥

तामसीं बुद्धिमाह –

हे पार्थ । या · बुद्धिः । तमसा - तमोगुणेन । वृता - निरुद्ध प्रसरासती । अधर्मं – आगमोक्तम् । धर्ममिति - धर्मरूपतया । मन्यते – विषयीकरोति । तथा । सर्वार्थान् - सिद्धसाध्यरूपानर्थान् । विपरीतांश्च - अस्वाभाविकधर्माक्रान्तांश्च। शुक्ताविदं रजतमित्यादिवत - धर्ममधर्मं - अधर्मंधर्मं – सन्तमसन्तं - असन्तं सन्तम् अपरं तत्त्वं परम् परंतत्त्वमपरंच । जानातीत्यर्थः । सा - बुद्धिः । तामसी- विवृद्धतमोमूला । पूर्वश्लोकोक्त राजसबुद्धिर्धर्ममात्रान्यथा भावावगाहिनी, एतच्छ्लोकोक्ता तामसी बुद्धिस्तु धर्मिधर्मान्यथा भावावगाहिनीतिभेदः । अनेन सतोजगतो ऽसत्त्ववादिनः परतत्त्वस्या परतत्त्वतावादिनश्च तामसा इति स्फुटंज्ञायत इतिभावः ॥ ३२ ॥

एवं त्रिविधां शास्त्रनिर्धारणात्मिकां बुद्धिं निरूप्य तदुपयोगिनीं तद्दाढर्यरूपां धृतिमाह –

हे पार्थ । योगेन - स्वतःप्रयोजनभूतेन मोक्षसाधन भगवद्योगेन अनुसंहितेन हेतुना । अव्यभिचारिण्या - फलांतरास्पर्शिन्या । यया। धृत्या – पूर्वोक्तबुद्धिदार्ढ्यरूपया । मनःप्राणेंद्रियक्रियाः – योगोद्देशेन प्रवृत्ताः · मनसः प्राणस्येंद्रियाणांच क्रियाः - व्यापारान् । धारयते । सा । धृतिः । सात्त्विकी – प्रवृद्धसत्त्वमूला । मनःक्रियाया योग करणत्वं - मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धम् । प्राणक्रियाया योग करणत्वं - 'पुनर्वायुपथं प्राप्यमनोगच्छति वायुवदि' ति शास्त्रोक्तरीत्या यत्रमनः - तत्रवायुः - यत्रवायुः - तत्रमन इत्यनोन्य परिष्वंगान्मनःक्रिया

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुंचति दुर्मेधाः धृतिः सा पार्थ तामसी ॥ ३५ ॥

तुल्यन्यायतयासिद्धम् । इन्द्रियाक्रियाया योगकरणत्वं - "स्वाध्याया योग मासीतयोगात्स्वाध्याय मेवच । स्वाध्याय योगसंपत्त्या पर मात्मा प्रकाशते " इति स्मृत्या योगांगनिषेवणरूप सर्वेन्द्रियव्यापार प्रत्याहरणरूपे प्रत्याहारे निरुध्यमाणरूपेण च द्रष्टव्यम् ॥ ३३ ॥

राजसीं धृतिमाह -

हे अर्जुन । फलाकांक्षी - पूर्वत्रापवर्गार्थधृते रुक्तत्वादिह फल शब्द स्त्रिवर्गफलपरः, तदाकांक्षतीति फलाकांक्षी, धर्मार्थकामी पुरुषः । यया धृत्यातु - राजस बुद्धिदाढ्र्यरूपया धृत्यातु । धर्म कामार्थान् - अत्रधर्मकामार्थशब्दाः - तत्साधनलक्षणया धर्मचिन्ताका मिनीजिज्ञासा धनप्रीत्यात्मक मनोव्यापार तदनुगुण प्राणेन्द्रियव्या पारपराः, तान् । प्रसंगेन - प्रकृष्ट फलसंगेन, धारयते - पुरुषः - दृढीकरोति । सा । धृतिः । हे पार्थ । राजसी - विवृद्ध रजो मूला ॥ ३४ ॥

तामसीं धृतिमाह -

हे पार्थ । यया- धृत्या, तामसबुद्धिदाढ्र्यरूपया । स्वप्नं - तदुप लक्षितां निद्राम् । मदमेवच - विषयानुभव जनितं मदंच । भयं - भिभेत्यस्माज्जन इति दुरभिमानकृत भयहेतुप्रबल विरोधादिरूपम् । शोकं - शोचत्यनेन जन इति क्रोधादि हेतुक शोकहेतुबन्धु विरोधा दिकम् । विषादं - विषीदत्यनेन जन इति मनसोदु खदाय बहु वित्तव्ययादिकम् । तद्धेतुभूत मनःप्राणेन्द्रिय क्रियाव्यापाराः, ताः ।

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥ ३६ ॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्विकं प्रोक्त मात्मबुद्धि प्रसादजम् ॥ ३७ ॥

दुर्मेधाः - दुर्मतिःपुमान् । नविमुंचति - धारयते । अत्रधारयत इति वक्तव्ये न विमुंचतीत्युक्तिर्हि त्याज्यमपि नत्यजतीति तत्स्वभावद्योतनाय । सा । धृतिः । तामसी - विवृद्धतमोमूला । अत्रैकरूपतया निर्दिष्टेषु स्वप्नमदयो स्सुखानास्पदत्वेन योग्यफला हेतुतया भयादीनां त्रयाणां हेयहेतुतया च तत्तदनुगुणसाहचर्येण योजना कृतेत्याकलनीयम् ॥ ३५ ॥

पूर्वं साधनभेदानुक्त्वा - इदानीं तत्साध्यसुखभेदानाह -

इदानीं - शेषभूतज्ञान कर्त्रादिनिरूपणानन्तरम् । त्रिविधं - सत्त्वादिगुणभेदा त्त्रिप्रकारम् । सुखंतु - तत्साध्य सुखभेदंतु । शृणु । यत्र - सौख्ये । अभ्यासात - चिरकालाभ्यासात् । रमते - क्रमेण निरतिशयरसं प्राप्नोति । दुःखान्तंच - दुःखस्य - निखिलसांसारिक दुःखस्य , अन्तंच - निश्शेषनिवृत्तिंच । निगच्छति - नितरां गच्छति ॥ ३६ ॥

एतदेव विवृण्व स्तदेव विशिनष्टि -

तत - श्रुतिप्रसिद्धम् । यत - सुखम् । अग्रे - योगारंभदशायाम् । विषमिव - बहूपायास साध्यत्वा द्विविक्तस्वरूपस्याननुभूतचरत्वाच्च प्रतिकूलमिव । मन्दमतीनां जिहासास्पदमिति भावः । परिणामे - अभ्यासबलेन स्वरूपाविर्भाव रूपपरिपाके । अमृतोपमं - जरामरण विरोधित्वा द्ब्रह्मानन्दापृथक्त्वेन परमभोग्यत्वाच्च मृततुल्यमित्यर्थः । आत्मबुद्धिप्रसादजं - आत्मबुद्धिः - आत्म

विषयेंद्रिय संयोगा द्यत्तदग्रे ऽमृतोपमम् ।

परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

यदग्रे चानुबंधे च सुखं मोहनमात्मनः ।

निद्रालस्य प्रमादोत्थं तत्तामस मुदाहृतम् ॥ ३९ ॥

विषयिणीबुद्धिः, तस्याःप्रसादः - इतरविषय स्पर्शरूपकालुष्य निवृत्तिः, तस्माज्जातम् । तत् । सुखं । सात्त्विकं - विवृद्धसत्त्वमूलम् । भोक्तृ- तद्याथात्म्य विद्भिः कथितमित्यर्थः ॥ ३७ ॥

राजसंसुखमाह -

तत् - श्रुतिप्रसिद्धम् । यत् - वैषयिकम् सुखम् । अग्रे - अनुभववेळायम् । विषयेंद्रियसंयोगात - विषयाः - अन्नपानादि भोग्याः, इन्द्रियाणि - रसनादीनि, तेषां संयोगात - संपर्कात् । अमृतोपमं - अमृतवत्परमभोग्यम् । परिणामे - अन्नपानादि विषय सुखतानिमित्त क्षुदादिनिवृत्तिरूप विपाकावस्थायाम् । विषमिव - परान्नपरदारोपभोगादिकं यौवनाद्यवस्थास्वेव सुखदायि, वार्धके च तदेव विषवत्परमानिष्टम्, अनन्तरंच निरयद्वायीति भावः ॥ तत् - सुखं । राजसं विवृद्धरजोमूलं । स्मृतं तत्त्ववेदिभिः कथितमित्यर्थः ॥ ३८ ॥

तामसं सुख माह ।

यत् सुखं । अग्रेच अनुभववेळायां च । अनुबन्धेच - अनुबद्ध्यते - पश्चा त्सम्बद्ध्यत इति अनुबन्धः परिपाकः, तस्मिंश्च । आत्मनः- जीवस्य । मोहनं-यथावस्थित वस्तु प्रकाशरूप मोहकारणम् । निद्रालस्य प्रमादोत्थं - निद्रा-सुषुप्त्यवस्था, आलस्यं इन्द्रियव्यापार मांद्यं, प्रमादः-मनसो ऽनवधानम्, तेभ्यः उत्पन्नम् निद्रायासुख

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभि स्स्या त्रिभिर्गुणैः ॥ ४० ॥

हेतुत्वं लोकसिद्धम् । आलस्यस्य गात्र संक्षोभवैधुर्य हेतुत्वात् प्रमादस्यच चित्तैकाग्रय प्रयासवैधुर्य हेतुत्वाच्च तद्द्रष्टव्यम् । त्रयाणाम्मोहहेतुत्वंच स्पष्टम् । अनिनसुखाभासाशया ऽकालनिद्रा हेयत्युक्तंभवति । यामद्वयंशयानस्तु ब्रह्मभूयायकल्पते । इति हिस्मृतिरर्थात्भावः । तत् - सुखम् । तामसं - विवृद्धतमोमूलं । उदाहृतम् - तत्त्वज्ञैः कथितम् ॥ ३९

प्राकृत गुणातीत शुद्धसत्त्वमय भगवत्प्राप्ति लक्षणमोक्षात्प्राङ् नियतदेशकाल फलभोगे स्च्चावचैस्सर्वैरपि क्षेत्रज्ञैरुक्तानां सत्त्वादीनां त्रयाणां दुस्त्यजत्वा न्मुमुक्षुणा सावधानं रजस्तमसी अभिभूय सत्त्वमेवो पादेयमिति ज्ञापनपूर्वकं गुणकार्यप्रकरणं निगमयति -

पृथिव्यां - भूलोकवर्तिमनुष्यादिषु । दिवि । देवेषु वापुनः । स्वर्गाद्यूर्ध्वलोक वर्तिषु चेत्यर्थः । प्रकृतिजैः - प्रकृतिसंभूतैः । त्रिभिः । एभिः । गुणैः - सत्त्वादिभिः । मुक्तम् । सत्त्वं - प्राणिव स्तु । यत् । तत् । नास्ति । असम्भावितामित्यर्थः । अतोगुण वश्यत्वात्तत्कार्यानुषक्त स्सर्वइति भावः ॥ ४० ॥

अध्यायादौ मुक्तिसाधनतया श्रुत्युक्तस्सन्न्यास स्त्यागश्चैकः, सच कर्मसु क्रियमाणेष्वेव सर्वेश्वरे कर्तृत्वानुसन्धानेन स्वकर्तृत्व मम ता फलत्यागरूपः, सच सत्त्वमूलइति सत्त्वस्योपादेयत्वसिध्यर्थं सत्त्व रजस्तमसां कार्यभेदाश्चोक्ताः । इदानीमेवंभूतस्य कर्मणः परमपुरु षाराधनरूपतां तथाऽनुष्ठितस्य कर्मण स्तत्प्राप्तिलक्षणं फलं च प्रतिपाद यितुं ब्राह्मणाद्यधिकारिणां स्व प्राचीन कर्मानुसारि गुणभेदभिन्नानि कर्माणि कृष्यादिवृत्त्या सह निरूपयति -

ब्राह्मण क्षत्रिय विशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभाव प्रभवैर्गुणैः ॥ ४० ॥
शमो दम स्तपः शौचं क्षांति रार्जव मेव च ।
ज्ञानं विज्ञान मास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४१ ॥

हे परन्तप ! ब्राह्मणक्षत्रियविशां - द्विजत्वेन वेदाधिकारिणां ब्राह्मणक्षत्रियवैश्यानाम् । शूद्राणाम् - वेदानधिकारिणां चतुर्थानाम् । स्वभावप्रभवैः - स्वेषां ब्राह्मणादीनाम् , भावाः - असाधारणधर्माः , ब्राह्मणजन्मादिहेतु प्राचीन कर्मवासनाः ; तत्प्रभवैः - पूर्वकर्मानुगुण सत्त्वादिगुणवृद्धेरुक्तत्वा त्तत्प्रसूतैरित्यर्थः । गुणैः - सत्त्वादिभिस्सह । कर्माणि - वक्ष्यमाण शमदमादीनि कृषिगोरक्षादीनिच । प्रविभक्तानि - प्रकर्षेण विभज्य कथितानि । ब्राह्मणस्य स्वभाव प्रभवो गुणः - तमो रजोभिभवेन विवृद्धसत्त्वगुणः । एवंक्षत्रियस्य स्वभावप्रभवोगुणः सत्त्वतमोभिभवेन विवृद्धरजोगुणः । वैश्यस्य स्वभावप्रभवो गुणः सत्त्वरजो भिभवेनाल्पो द्रिक्त स्तमोगुणः । शूद्रस्यस्वभाव प्रभवोगुणः - सत्त्वरजोभि भवेनो द्रिक्त स्तमोगुणः । इत्येव मेते गुणविशेषाः - असाधारण कर्माण्येतानि वृत्तयश्चैताइति सर्वमिदं मोक्षशास्त्रे संकीर्णं प्रतिपादितमित्यर्थः ॥ ४१ ॥

प्रथमतः - ब्राह्मणासाधारण कर्माण्याह ॥

शमः - बाह्येंद्रियनिग्रहः । दमः - अन्तरिंद्रिय निग्रहः । तपः - शास्त्रीय भोगसंकोचरूपः कायक्लेशः । शौचं - शास्त्रीयकर्मयोग्यतात्मिकाशुद्धिः । क्षान्तिः - परैः पीड्यमानस्यापि चित्तविकारशून्यता । आर्जवमेवच - मनोवाक्कायाना मेकरूपताच । ज्ञानम् - परापरतत्त्व याथात्म्यज्ञानम् । विज्ञानं - तत्रापि परतत्त्वगतासाधारण विशेष ज्ञानम् । आस्तिक्यं - अस्ति भगवान् वासुदेवः पुरुषोत्तमो जगदुदय

शौर्यं तेजो धृति र्दाक्ष्यं युद्धे चा प्यपलायनम् ।
दान मीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥
कृषि गोरक्ष वाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ ४४ ॥

विभवत्व लोक स्सकलोपनिषत्प्रतिपाद्यः - तदाराधनानि सकल वैदिक कर्माणि तदाराधितस्स सकल फलप्रदश्चेति निश्चय विशेषश्च । ब्राह्मं - ब्राह्मणासाधारणम् । स्वभावजं कर्म ॥ ४२ ॥

क्षत्रियासाधारण कर्माण्याह -

शौर्य - युद्धे निर्भय प्रवेशसामर्थ्यम् । तेजः परैरतिरस्कार्यत्वम् । धृतिः - आरब्धे कर्माणि विघ्नोपनिपातेपि तत्समापनसामर्थ्यम् । दाक्ष्यं - कौशलम् । युद्धेचापि । अपलायनं - आत्ममरण निश्चये प्यपराङ्मुखता । दानं-आत्मीयधनस्य परस्वत्वापादनम् । ईश्वरभावश्च- स्व व्यतिरिक्तानां सर्वेषां नियमनसामर्थ्यं चेत्येतत् । क्षात्रं - क्षत्रियासाधारणम् । स्वभावजम् । कर्म ॥ ४३ ॥

वैश्यशूद्रयोः कर्माह-

कृषिः - फलोत्पादनार्थं कर्षणम् , गोरक्षः - पशुपालनम् , वाणिज्यं - धनागमहेतुभूतं क्रयविक्रयात्मकं कर्मच । वैश्यम् - वैश्यानां सम्बन्धि । स्वभावजम् । कर्म । वैश्यस्य स्वाभाविक वृत्ति रित्यर्थः । परिचर्यात्मकं - त्रैवर्णिकसेवारूपम् । कर्म । शूद्रस्यापि । स्वभावजं - स्वाभाविकं कर्म । वृत्तिरित्यर्थः । अत्र श्लोकद्वयेपि प्रदर्शनार्थं कानिचिद्वर्णानि कानिश्चद्वृत्तयश्चोक्ताः । वस्तुतस्तु त्रैवर्णिकानां मुमुक्षूणां शमदमादयएव साधारणधर्माः । असाधारणधर्म वृत्तयस्तु ब्राह्मणानां याजनाध्यापन प्रतिग्रहाः - क्षत्रियाणां जनपद

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥
यतः प्रवृत्ति र्भूतानां येन सर्व मिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥

परिपालनादयः, वैश्यस्य यथोक्ताः कृष्यादयः, शूद्रस्यतूक्ता त्रैवर्णिक शुश्रूषा - असाधारणधर्मो वृत्तिश्चेति मन्तव्यम् ॥ ४४ ॥

ननुमोक्षशास्त्रे - तत्तद्धर्मोपदेशस्य कःप्रसंग इत्यत्राह -

स्वेस्वे - तत्तद्वर्णासाधारणे । कर्मणि - यज्ञशौर्यादौ । अभिरतः - निष्ठायुक्तः पुमान् । संसिद्धिं - परमपदम् । लभते । ननु निषिद्धस्य कर्मणः कथं परमपदसाधनत्व सिद्धिरित्यत्राह (स्वेति) स्वकर्मनिरतः - स्वधर्मनिष्ठः । पुमान् । यथा - येनप्रकारेण । सिद्धिं- नैष्कर्म्यसिद्धिद्वारेण फलम् । विंदति । तत् - तथा । शृणु ॥ ४५ ॥

तदेवाह -

यतः - यस्मात् मत्तः । भूतानां - सर्वेषां प्राणिनाम् । प्रवृत्तिः- 'अहं सर्वस्य प्रभवोमत्तस्सर्वंप्रवर्तते । ' इति पूर्वोक्तरीत्या- उत्पत्त्यादि सर्वक्रियाः, भवं तीत्यर्थः । येन - मया । सर्वम् इदं - अखिलंजगत् । ततं - 'मयाततमिदं सर्वंजगदव्यक्त मूर्तिन' त्यादि पूर्वोक्तरीत्या बहिरं तश्च व्याप्तमित्यर्थः । तं - अग्नींद्राद्यन्तरात्मानम्माम् । स्वकर्मणा- वर्णाश्रमनियत त्रिविधत्याग युक्तकर्मणा । अभ्यर्च्य - आराध्य । मानवः । सिद्धिं - नैष्कर्म्यसिद्धिद्वारा परमपदम् । विंदति - प्राप्नोतीत्यर्थः । शूद्रादेरपि "धर्मव्याधादयो ऽप्यन्ये पूर्वाभ्यासा ज्जुगुप्सिते । वर्णावरत्वे संप्राप्तास्संसिद्धिं श्रमणीयथे"त्यादि शौनकोक्तरीत्या विदुरादिव त्पूर्वजन्मसिद्धाधिकार संपत्त्यावा भावि जन्माधि

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥
सहजं कर्म कौंतेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

कार्य सम्पत्त्यावा परमपदप्राप्ति रविरुद्धेति भावः । एवं वर्णाश्रमधर्माणां स्वरूपेण परित्याज्यत्वं परमपदप्राप्ति प्रकारश्चोक्तः ॥ ४६ ॥

अथ 'दैवमेवापरे यज्ञ' मित्यादिना कर्मयोगांतर्गततया पूर्वोक्तानां योगानां तत्तदधिकार्य परित्याज्यत्वं प्रत्यभिज्ञापयति ॥

स्वनुष्ठितात् - सुष्ठु अनुष्ठितात् - आचरितात् । परधर्मात् - प्रकृति संसृष्टस्य दुश्शकतया तदन्यसांख्य योगनिष्ठयोग्य धर्मात्, सकलेंद्रियव्यापार नियमनरूप ज्ञानयोगादित्यर्थः । विगुणः - किंचिदंगविकलोपि । स्वधर्मः - स्वेन - प्रकृतिसंसृष्टेनैवोपादेयोधर्मः - त्रिविधत्यागयुक्तो भगवदाराधना त्मकः कर्मयोगः । श्रेयान् । प्रकृति संसृष्टस्येंद्रिय व्यापारात्मकस्य धर्मस्य सुशकतया स एव प्रशस्त इत्यर्थः । किंच । स्वभावनियतं - प्रकृतिसंसृष्टस्य स्वभाव प्राप्तम्, अवर्जनीयमित्यर्थः । कर्म - क्रियारूपं कर्मयोगम् । कुर्वन् - आचरन् । किल्बिषं - प्रत्यवायम् । नाप्नोति । विषतरु निंबादि जातजन्तूनां स्वभावनियताहार सेवावत प्रकृतिसंसृष्टस्य स्वोचितकर्मयोग सेवा ऽनर्थाय नभवति, किंतु स्वानुचित्त ज्ञान योगसेवैव मर्त्यानाममृतसेवावद्धानये भवतीत्यर्थः ॥ ४७ ॥

पूर्वं प्रकृति संसृष्टस्य सुशकत्व दुश्शकत्वाभ्यां कर्मयोग ज्ञान योगयो वैषम्यं स्मारितम् । इदानीं सौकर्या प्रमादाभ्या मपि वैषम्यमाह ॥

हे कौंतेय । सहजं - स्वभावप्राप्तत्वेन सुशकम् । कर्म - सकलेंद्रियव्यापार रूपं कर्मयोगम् । सदोषमपि कष्टं कर्मेतिन्यायेन क्लेश

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्नयासेनाधिगच्छति ॥ ४९ ॥
सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे ।
समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

युक्तमपि । नत्यजेत । इन्द्रियव्यापाररूपस्य कर्मयोगस्य प्राकृतजन सहजत्वेन प्रमादाभावात् क्लिष्टमपि तदेवोपादेयम् , नतु तद्विपरीतो ज्ञानयोग इति भावः । किंच । क्लेशश्चोभयत्रापि समान इत्याह (सर्वेति) हि - यस्मात । सर्वारम्भाः - कर्मारम्भाज्ञानारम्भाश्च । दोषेण - क्लेशेन । धूमेन । अग्निरिव । आवृताः । कर्मयोग ज्ञानयोगयोः क्लेशस्त्वविशिष्टः , किंतु कर्मयोगे सौकर्याप्रमादौ गुणौ - ज्ञानयोगेतु तद्विपर्यय इतिभावः ॥ ४८ ॥

यदर्थोयं प्रयास स्तदाह -

सर्वत्र - सर्वेषु मुक्तिव्यतिरिक्तफलेषु । असक्तबुद्धिः - अनासक्त चित्तः । अतएव - जितात्मा - जितमनाः । विगतस्पृहः - परम पुरुषकर्तृत्वानुसन्धानेनात्मकर्तृत्वस्पृहारहितः । पुमान् । सन्नया सेन - त्रिविधत्यागात्मकेन सन्नयासेन । कर्म कुर्वन्नपीतिभावः । परमां - ज्ञानयोगफलभूताम् । नैष्कर्म्यसिद्धिं - निर्गतानि कर्माणि - इन्द्रियव्यापारोपरतिरूपध्यानयोगः , तस्य सिद्धिं - लाभम् । अधिगच्छति - प्राप्नोति ॥ ४९ ॥

ततः किं तत्राह -

हे कौंतेय । सिद्धिं - अहरहरनुष्ठीयमानेन कर्मयोगेन ध्यान सिद्धिम् । प्राप्तः - गतः । पुमान् । यथा - येनप्रकारेण । ब्रह्म । आप्नोति । तथा - तं प्रकारम् । मे - मत्तः । समासेनैव - संक्षेपेणैव ।

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ।
विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

निबोध - शृणु । ब्रह्मप्राप्तिप्रकार माकर्णयेत्यर्थः । तदेव ब्रह्म विशिनष्टि (निष्ठेति) ज्ञानस्य - ध्यानात्मकस्य । या । परा निष्ठा - परमप्राप्यमित्यर्थः ॥ ५० ॥

तमेव प्रकारं दर्शयति -

विशुद्धया - यथावस्थितात्मतत्त्वविषयया । बुद्ध्या - निर्धारणया । युक्तः । धृत्या - सात्त्विकबुद्धिदार्ढ्यरूपया । आत्मानं - मनः । नियम्य च - विषयेच्छाविमुखीकृत्य च , योग्यं कृत्वा चेत्यर्थः । शब्दादीन् । विषयान् । त्यक्त्वा - दूरीकृत्य । रागद्वेषौ - तत्सन्निधानकृतरागद्वेषौ । व्युदस्य - निरस्य च ॥ ५१ ॥

विविक्तसेवी - विविक्तं - ध्यानविरोधिरहितं देशं , सेवत इति तथाभूतः । लघ्वाशी - लघ्वशनशीलः । "नात्यश्नतस्तु योगोऽस्ति" त्युक्तरीत्या अत्यशनानशनरहितः । यतवाक्कायमानसः - यतानि - ध्यानाभिमुखीकृतानि , वाक्कायमानसानि - तत्तद्वृत्तयः , येन सः । नित्यं - अहरहः । ध्यानयोगपरः - ध्यानयोगे - प्रधानभूते - निष्ठितः । वैराग्यं - समुपाश्रितः - ध्येयतत्त्वव्यतिरिक्ततत्त्वेषु दोषपरामर्शेन वैराग्यं वर्धयन्नित्यर्थः ॥ ५२ ॥

अहंकारं - अनात्मन्यात्माभिमानम् । बलं - तद्विवृद्धिहेतुभूत वासनाबलम् । दर्पं - तत्कार्यममार्गप्रवृत्तिम् । कामम् । क्रोधम् ।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥ ५४ ॥
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

परिग्रहं - विषयसंग्रहम् । विमुच्य । निर्ममः - सर्वेष्वनात्मीयेष्वात्मीयत्वाभिमानरहितः । शान्तः आत्मानुभवैकसुखः । ब्रह्मभूयाय - ब्रह्मभावाय । कल्पते - समर्थो भवति । सर्वबन्धविनिर्मोचनपूर्वकं यथावस्थितमात्मानमनुभवतीत्यर्थः ॥ ५३ ॥

ततोऽपि किं तत्राह -

ब्रह्मभूतः - प्रभूतयथावस्थितापरिच्छिन्नज्ञानस्वभावः । अतएव - प्रसन्नात्मा - प्रसन्नः - क्लेशकर्मविपाकादिकालुष्यरहितः, आत्मा - चित्तं यस्य सः । अतएव । सर्वेषु । भूतेषु - ब्रह्मादिस्तम्बपर्यन्तेषु प्राणिषु । समः - अनादरशीलः । पुमान् । न शोचति । न काङ्क्षति - 'यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते' इति पूर्वोक्तरीत्या गुरुशोकेनाप्यविचालितो मद्व्यतिरिक्तं कंचनापि नाभिकाङ्क्षति । किंतु । परां - अव्यभिचारिणीं । मद्भक्तिं - मयि - सकलहेयप्रत्यनीके कल्याणगुणनिधौ निखिलजगत्कारणे श्रीपतौ, भक्तिम् । लभते - अनायासेन प्राप्नोति । एतच्च व्याधकुलसंवर्धितराजकुमारस्वामिना सुस्पष्टं पूर्वमुपपादितम् स्मर्तव्यम् ॥ ५४ ॥

तत्फलमाह-

अहम् । यश्च अस्मि - स्वरूपतः स्वभावतश्च यादृशश्चास्मि । यत्स्वरूपस्वभाववानित्यर्थः । यावांश्च । अस्मि - गुणतो विभूतितश्च यन्महिमा यद्गुणविभूतिश्चास्मीत्यर्थः । भक्त्या - एवंभूतया

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

पूर्वोक्तया भक्त्या। मां - ज्ञात्वा - विशदमनुभूय। तदनन्तरम्। मत्तत्त्वज्ञानानन्तरम्। ततः - भक्तितः। माम्। विशते - प्रविशति। मत्स्वरूपस्वभावगुण विभूतिज्ञानानन्तर भाविन्या विशदनिरतिशयभक्त्या मां प्राप्नोतीत्यर्थः। पूर्वमपि - 'भक्त्यात्वनन्यया शक्य अहमेवं विधो ऽर्जुन। ज्ञातुं द्रष्टुंच तत्वेन प्रवेष्टुंच परं तप' ति भक्तेरेव प्रवेशहेतुत्वमुक्तं स्मर्तव्यं ॥५५॥

एवं वर्णाश्रमनियत नित्यनैमित्तिक कर्मणां कर्तृत्वा द्यभिसंधि रहितानामनुष्ठितानां परमपुरुषाराधनरूपाणां परिपाकउक्तः। इदानीं काम्यानां कर्मणामप्युक्तरूपेणानुष्ठितानां सएव परिपाकइत्याह -

सदा। मद्व्यपाश्रयः - अहमेव - व्यपाश्रयः - शेषी यस्यसः। मयि सन्न्यस्तकर्तृत्वादिस्सन्। सर्वकर्माण्यपि - काम्यकर्मसहितानि सर्वाणिकर्माण्यपि। न केवलं नित्यनैमित्तिककर्माण्येवेतिभावः। कुर्वाणः - अनुतिष्ठन्। पुमान्। मत्प्रसादात - मदनुग्रहात्। शाश्वतं - सनातनं। अव्ययं - निर्विकारं। पदं - पद्यते गम्यत इति पदं - प्राप्यम्मां। अवाप्नोति ॥ ५६ ॥

एवं सामान्यत उपदिश्य विशेषतो प्युपदिशति -

चेतसा। सर्वकर्माणि। मयि। सन्नस्य - 'मयिसर्वाणि कर्माणि सन्नस्याध्यात्मचेतसा। निराशीः' इत्युक्तप्रकारेण जीवस्य मच्छेषत्वमन्नियाम्यत्वविषयबुद्ध्या सर्वाणि लौकिकानि वैदिकानि युद्धादीनिच कर्माणि मत्कर्तृत्वानुसंधानेन मयि समर्प्येत्यर्थः।

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥
यद्यहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

मत्परः · अहमेव - परः - फलतयाप्रधानभूतः यस्य सः । मदेकप्राप्यत्वाभिसन्धिमानित्यर्थः । बुद्धियोगं । उपाश्रित्य - कर्मानुष्ठानवेळाया मिममेव बुद्धियोगमुपजीव्येत्यर्थः । सततम् । मच्चित्तः । भव ॥ ५७ ॥

एवं नित्यनैमित्तिककाम्यरूपाणां दर्शितबुद्धिविशेषयोगसहितानां कर्मयोगशब्दवाच्यानां परंपरया परिपूर्णभगवत्प्राप्तिपर्यंतपरिकरमुपपाद्य सर्वधा कर्मयोगएव कर्तव्यइति निगमयन् विपक्षेऽनिष्टमाह –

मच्चित्तः · मय्येव चित्तं कर्तृत्वानुसन्धानरूपं यस्य सः । एवं सर्वधा कर्माणि कुर्वन्नित्यर्थः । मत्प्रसादात - तादृशकर्मानुष्ठानमूलमदनुग्रहात । सर्वदुर्गाणि - सर्वाणि संसारदुर्गाणि । तरिष्यसि । संसाराद्विमोक्ष्यसइत्यर्थः । अथ · एवम्मदुपदेशानन्तरमपि । त्वम् । अहंकारात · अहमेव कृत्याकृत्यविवेकं स्वयं जानामि - किमन्योपदेशेनेति भावात । मदुक्तम् । न श्रोष्यसिचेत । विनंक्ष्यसि · नित्यसंसारितया विनिष्टोभविष्यसि । नहि मद्व्यतिरिक्तः कश्चित्कृत्याकृत्यविचक्षणः प्रशास्तोऽस्तीतिभावः ॥ ५८ ॥

पूर्वत्र स्ववाक्यश्रवणफलतया युद्धाप्रवृत्तौ विनाशउक्तः । इदानीं युद्धप्रवृत्ति रन्यथा प्यवश्यं भाविन्येव - तवमौर्ख्यदोषः परमधिक इत्याशयेनाह –

अहंकारं - अहमेव सर्वं हिताहितं जानामीति स्वातन्त्र्यम् । आश्रित्य । नयोत्स्ये - युद्धंनकरिष्ये । इति । यदिमन्यसे –

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥ ६० ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

अभिमन्यसे चेदित्यर्थः । ते - तव । एषः । व्यवसायः - स्वातन्त्र्याभिमानः । मिथ्या - असत्य इत्यर्थः । तत्र हेतुमाह । प्रकृतिरिति । प्रकृतिः - पूर्ववासना । त्वां । नियोक्ष्यति - प्रेरयिष्यति । मत्स्वातन्त्र्यवियोगाख्यां विनापि पशुवदवशं त्वां युद्धे प्रकृतिरेव बलात्प्रेरयिष्यतीत्यर्थः ॥५९॥

तदेवोपपादयति-

हे कौन्तेय । स्वभावजेन - स्वस्य - क्षत्रियस्य तव, भावः - प्राचीनवासना, तज्जातेन । स्वेन - स्वकीयेन । कर्मणा । 'शौर्यं तेज' इत्यादिपूर्वोक्तासाधारणधर्मेण । निबद्धः - शमीवह्निवदनुबद्धः । मोहात् - अज्ञानात् । यत् - युद्धादिकम् । कर्तुम् । नेच्छसि । प्रमादवशे ऽधर्मत्वबुद्ध्या न चिकीर्षसि, तदेव । अवशोऽपि - अस्वतन्त्रोऽपि वा । परकर्षणोद्भूतमःप्रेरितस्सन्वा । करिष्यसि । गतजलसेतुबन्धवदुपेक्षावशं करिष्यसीत्यर्थः ॥ ६० ॥

ननु त्वदौदासीन्ये च कथमचेतनया प्रकृत्या मम प्रवृत्तिसम्भवः ? सम्भवेवा कथं तव सर्वप्रवृत्तिहेतुत्वमित्यत्राह-

हे अर्जुन । ईश्वरः - नियन्ता । नियमनानुकूलव्याप्तिमान् वासुदेव इति यावत् । यन्त्रारूढानि - यन्त्रं - प्रवृत्तिनिवृत्त्यनुकूलप्रदेशयुक्तरथरूपं शरीरम्, आरूढानि । सर्वभूतानि - 'आत्मानं रथिनं विद्धि शरीरं रथमेव च' इति श्रुत्युक्तरीत्या तत्तद्रथिकत्वेनावस्थितान् सर्वानात्मन इत्यर्थः । मायया - गुणत्रयरूपया प्रकृत्या । भ्रामयन्-

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ॥ ६१ ॥
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६२ ॥

पूर्ववासनोद्भूतगुणानुगुणं प्रवर्तयन्नित्यर्थः । सर्वभूतानां - तेषामेव प्राणिनाम् । हृद्देशे - प्रवृत्तिनिवृत्तिहेतुभूतज्ञानोत्पत्तिदेशे । तिष्ठति - उदासीनवदास्ते । नहि भूतावेशन्यायेन जीवमीश्वरः प्रवर्तयति ; अपितु सत्वादिगुणमयान् भावान् पुरस्कृत्य पूर्वपूर्ववासनानुगुण गुण सङ्गद्वारेणेति वासनायाः प्रधर्षणादिवशा त्प्रवर्तकत्वेपि नात्मप्रवर्तक त्वहानिः , नचौदासीन्यस्यव्याहतिश्चेतिभावः ॥ ६१ ॥

ननु ईश्वरः स्वतन्त्रो यदि मायया जीवं प्रवर्तयति - परतन्त्रः कथं तां निरस्येदित्यत्राह-

हे भारत । तमेव - सर्वप्रशासितारमप्याश्रितवात्सल्येन त्व त्सारथ्येस्थित्वा युद्धंकुर्वित हितोपदेष्टारमेवत्यर्थः । अनेन परत्व सौलभ्ये सूचिते । एवकारेण तत्प्रयुक्तमायायास्तदन्येनानिवर्तनीयत्व मुक्तम् । सर्वभावेन - हितोपदेष्टृत्वप्राप्यत्वप्रापकत्वादिरूपेण । शरणं - गोप्तारम् । गच्छ - अवगच्छ । अवश्य मन्यथापि भाविन्या युद्धप्रवृत्तेर्विनाशहेतुत्वेन तदुपदिष्टरीत्यैव युद्धादिधर्मं कुर्वित्यर्थः । एवंसति , तत्प्रसादात् - तस्य - सर्वेश्वरस्य , प्रसादात् - कर्मयोगा नुष्ठानजनितानुग्रहात् । परां - उत्कृष्टां । अपुनरंकुरामिति यावत । शांतिं - सर्वकर्मनिवृत्तिम् । शाश्वतं - पुनरावृत्तिरहितम् । स्थानं - "तद्विष्णोःपरमंपदँ सदापश्यन्तिसूरयः, तेहनाकम्महिमानस्सचन्ते यत्रपूर्वेसाध्यास्सन्तिदेवाः" इत्यादि श्रुतिप्रतिपाद्यं लोकम् । प्राप्स्यसि । ॥ ६२ ॥

गीताशास्त्रार्थं निगमयति -

इति - पूर्वोक्तरीत्या - सम्यक् समग्रंचेति यावत् । गुह्यात् - गुह्यतरं - ज्ञानं - आयुर्धनुर्गान्धर्ववेदमूलाल्लोकप्रमाणसिद्धविषय

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

ज्ञानं गुह्यम् , तस्मात् प्रकृष्टातीन्द्रियपारलौकिकस्वर्गादिसाधन ज्ञानं वेदमूलं गुह्यं , ततोऽपि वेदान्त तदुपबृह्मणं विशोधितं मुमुक्षवपेक्षितं यथाधिकारमनुष्ठेयं मुक्तिरूपफलव्यवहिताव्यवहितोपायरूपं कर्मयोगादित्रितयज्ञानं गुह्यतरम् ज्ञानं । मया - सर्वज्ञेन परमाप्तेन च । ते - 'शिष्यस्तेहंशाधिमा' मिति जिज्ञासवे तुभ्यम् । आख्यातं - कथितम् । एतत् - मदुक्तम् । अशेषेण - कात्स्न्र्येन । विमृश्य - सम्यग्विचार्य । यथा - यंधर्मम् । इच्छसि । तथा - तन्धर्मम् । कुरु - आचर । यथाधिकरं कर्मयोगं ज्ञानयोगं भक्तियोगंवाऽनुतिष्ठेत्यर्थः । नतु - युद्धंकुरु माकुरुवेत्यर्थः । अकरणेऽनिष्टस्य स्फुट मुक्तत्वादित्यवगन्तव्यम् ॥ ६३ ॥

एवं शास्त्रार्थभूतानां त्रयाणाम्मध्ये भक्तियोगस्य मोक्षसाधनत्वेन सारार्थतया पुनस्तमुद्धृत्य श्लोकद्वयेन प्रत्यभिज्ञापयति-

सर्वगुह्यतमं-सर्वेषु गुह्यतरेषु कर्मयोगादिषु - गुह्यतमं - अतिशयेन गुह्यं । परमं - साक्षान्मोक्षसाधनविषयत्वात्सर्वोत्तरं । वचः । भूयः । शृणु । 'इदंतुते गुह्यतम' मित्यादिना 'मन्मनाभवे' त्यंतेन नवमाध्यायेन सुनिरूपितत्वेपि सारार्थत्वा त्पुनराकर्णयेत्यर्थः । एवमुक्ति र्नोपच्छंदनमात्रं स्तुतिर्वेत्याह (इष्टइति) मे । दृढं - अत्यर्थं । इष्टः - ' प्रियोहि ज्ञानिनोऽत्यर्थ ' मित्युक्त ज्ञानितुल्यः । असि । इति मत्वा । येन , परमहितोपदेश योग्योसि , ततः हेतोरित्यर्थः । ते हितं- अव्यवहितफलसाधनं । वक्ष्यामि- उपदेक्ष्यामि ॥६४॥

गुह्यतमांगिस्वरूपं फलाव्यवहित साधनतया निरूपयन् तत्स्वरूपं प्रत्यभिज्ञापयति -

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुचः ॥ ६६ ॥

मद्भक्तः - मयि भक्तः । निरतिशयप्रीतिमान् । मन्मनाः - मय्येव मनो यस्य सः - मन्मनाः । भव । मय्यतिशयितप्रीत्या सततं मत्स्मृतिमेव कुर्वित्यर्थः । मद्भक्तस्सन् । मद्याजी - मत्पूजनशीलो भव । मय्यतिप्रीतिरूपाराधनमशेषशेषवृत्तिरूपमाचरेत्यर्थः । मद्भक्तस्सन् । माम् । नमस्कुरु । मय्यतिमात्रप्रीतिरूपं प्रह्वीभावमात्मार्पणं च कुर्वित्यर्थः । अत्र सर्वाण्यपि कर्तृविशेषणानि विशिष्टक्रियारूपभक्तिलाभाय । एवं च क्रियारूपतावन्निरन्तरस्मृत्याराधनेच्छानुसन्धानात्मिका भक्तिः मत्प्राप्तिसाधनमिति पर्यवस्यतीति ध्येयम् । एवं कुर्वन् । मामेव । एष्यसि । प्राप्स्यसि । ते - तुभ्यम् । सत्यं - यथार्थम् । प्रतिजाने - प्रतिज्ञां करोमि । यतः । त्वम् । मे । प्रियः - प्रीतिविषयः । असि । मद्भक्तियुक्तत्वादेव ममात्यर्थप्रीतिविषयः, अतस्त्वद्विश्लेषमसहमानस्त्वाम्मामवश्यं प्रापयामीत्यर्थः ॥ ६५ ॥

एवं विस्तरसंग्रहाभ्यामुक्तानां कर्मयोगादीनां त्रयाणां सारतममनुसन्धानविशेषमुद्धृत्य तत एव मामेवैष्यसीत्युक्तेष्टप्राप्तिप्रतिबन्धकभूतानिष्टानां निवृत्तिमाह -

सर्वधर्मान् - पूर्वोक्तानशेषान् धर्मान् - साक्षात्परम्परया च श्रेयस्साधनभूतान् कर्मयोगज्ञानयोगभक्तियोगान् । परित्यज्य - 'त्यागो हि पुरुषव्याघ्र त्रिविधस्सम्प्रकीर्तित' इत्युक्तरीत्या कर्तृत्वममताफलाभिसन्धित्यागेन त्यक्त्वेत्यर्थः । कर्मयोगे फलत्यागस्स्वर्गादिविषयः, ज्ञानयोगे कैवल्यविषयः, भक्तियोगे - ऐश्वर्यादिफला

न्तराविषय इत्यवगन्तव्यम् । मां- 'ईश्वरस्सर्वभूताना' मित्युक्तरीत्या अन्तर्यामिणं, 'मयाऽध्यक्षेण प्रकृतिस्सूयते स चराचर' मित्युक्तरीत्या प्राप्यं, 'मत्प्रसादा त्परांशान्ति स्थानं प्राप्स्यसि शाश्वत' मित्युक्तरीत्या प्रापकम्, 'अहं हि सर्वयज्ञानां भोक्ताच प्रभुरेव' चेत्युक्तरीत्या सर्व कर्माराध्यश्च माम् । एकं - मुख्यम् । शरणं - उपायम् । व्रज । अवगच्छ । अहंहि तत्तदाराधनप्रीतः फलंददामीति सर्वशास्त्रसिद्धः, अतोमामेवोपायत्वेनानुसन्धत्स्व । नत्वविदित वेदान्तवत - 'प्लवाह्येते अदृढायज्ञरूपाः अष्टादशोक्तमवरंयेषुकर्म । एतच्छ्रेयोयेऽ भिनन्दन्ति मूढा जरामृत्यूपुनरेवापियन्ती' त्यादि श्रुत्युक्तरीत्या नश्वरसाध्य यज्ञो पासनादिकान् धर्मानिति भावः । अहं - उक्तप्रकारेणाराधितः फल प्रदानौपयिक सर्वज्ञत्व सर्वशक्तित्व परमकारुणिकत्वादि गुणसम्पन्न इति भावः । त्वा - त्रिविधत्यागयुक्ततया धर्माननुतिष्ठन्तम्भवन्तम् । सर्वपापेभ्यः - मज्ज्ञानप्राप्तिप्रतिबन्धकाकृत्यकरणकृत्याकरण रूपेभ्यः । मोक्षयिष्यामि - विमोचयिष्यामि । माशुचः - शोकं मा कृथाः । अथवा - मन्मनाभवेति सारार्थतया प्रकृतस्य भक्तियोगस्य भगवत्प्रियपुरुष निर्वर्त्यत्वेन तदारंभ विरोधि पापाना मानंत्या त्परिमित कालेन पुंसा मनंत प्रायश्चित्ता चरणे शक्तेः दीर्घकालनैरंतर्यसेव नीयत्वेन दौष्कर्याच्च फलविळम्बशङ्कया ऽऽत्मनोभक्तियोगारम्भानर्ह तया शोचन्तमर्जुनम्प्रत्याह (सर्वेति) सर्वधर्मान् - अत्रधर्मशब्देन - 'धर्मेणपापमपनुदती' ति श्रुत्युक्त धर्मसंग्रहः । सर्वशब्देन प्रायश्चित्त रूपधर्माणां विविधत्वं - बहुवचनेनानन्त्यं च विवक्षितम् । विविधा नन्तप्रायश्चित्तरूपकृच्छ्रचान्द्रायणादीनित्यर्थः । परित्यज्य - अशक्त स्य तव दुष्करतया स्वरूपतएव परित्यज्येत्यर्थः । एकं - अनेकप्रातिभटम् । मां- सर्वज्ञं सर्वशक्तं परमकारुणिकं वात्सल्य जलधिं च । शरणं उपायं । 'शरणं गृहरक्षित्रोरुपाये च निगद्यत' इति कोशात । व्रज - रक्षिष्यतीति महाविश्वासपूर्वकाध्यावसायरूपप्रपदनं कुरु । अहं - सर्वज्ञः सर्व शक्तिः । त्वा - अल्पज्ञमल्पशक्तिं च भवन्तम् । सर्व पापेभ्यः -

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥

यथोदितभक्त्यारम्भविरोधि सर्वपापेभ्यः। मोक्षयिष्यामि। मा शुचः। एकेन सुकरेणाविलम्बेन विविधानन्तपापनिवृत्तौ विविधैरनन्तैर्दुष्करैः फलविलम्बिभिः प्रायश्चित्तैर्नशोकः कार्यइतिभावः। इदानीं भक्त्यारम्भविरोधिपापनिबर्हणोपायतया प्रपदननिर्देशोऽन्येषामपि दुष्करेष्टोदाहरणरूपः। अतः इत्थमेव सुदुष्करेष्टहेतु प्रतिभट तया सर्वत्र शरणागतिरेवैष्टव्या। अतएव 'सुदुष्करेण शोचेद्योयेन येनेष्टहेतुना। सर्वस्याहमेवोक्ते चरमश्लोक संग्रह' इत्यभियुक्तैरप्युक्तम् ॥ ६६ ॥

अनधिकार्युपदेशस्यात्यन्तानिष्टत्वात्प्रथमतस्तन्निषेधति –

इदं - परमगुह्यतमंशास्त्रम्। अतपस्काय - न विद्यते तपोयस्य तस्मै। अकृततपस इत्यर्थः। ते - त्वया। न वाच्यम्। अभक्ताय – 'यस्यदेवे पराभक्तिर्यथा देवे तथागुरौ। तस्यैते कथिताह्यर्थाः प्रकाशंते महात्मन' इति श्रुत्युक्तरीत्या मयि देवे त्वयिवक्तरिच भक्तिमनाचरते पुंसे तप्ततपसेपि। कदाचन। नवाच्यमित्यनुषंगः। अशुश्रूषवेच – मयि देवे त्वयिवक्तरिच भक्ताय तप्ततपसेपिच शुश्रूषामकुर्वते च। नवाच्यं। यः। मां। अभ्यसूयति – मत्स्वरूपरूपगुणादिषु श्रुतेषु दोषानाविष्करोति। तस्मै च पूर्वोक्तशुश्रूषादि गुणसंपन्नायापि। नवाच्यं। नचाभ्यसूयतइति पूर्वोक्तशैल्या वक्तव्यत्वेपि 'विद्याहवै ब्राह्मणमाजगाम गोपाय मा शेवधिस्तेऽहमस्मि। असूयकाया नृजवे जडाय नमां ब्रूयावीर्यवती तदा स्या'मिति श्रुतिस्मृति निषिद्धतया ऽसूयकस्यात्यन्तपरिहरणीयत्वज्ञापनाय विषमशैल्या निर्देश इत्यवगन्तव्यम् ॥ ६७ ॥

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता नच मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥
अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

एवमनधिकार्युपदेशं निषिध्याधिकार्युपदेशस्य फलमाह -

यः - पुमान् । परमम् । इदम् । गुह्यं - रहस्यम् । मद्भक्तेषु - मयिभक्तिमत्सु । अभिधास्यति । व्याख्यास्यति । अनेन - 'श्रावयेच्चतुरोवर्णा' निति चातुर्वर्ण्याधिकारेपि भक्तानामेवेदं व्याख्यातव्य मित्युक्तम्भवति । सः - पुमान् । मयि । पराम् । भक्तिम् । कृत्वा - लब्ध्वा । भक्तेभ्यो व्याख्यानरूपकर्मयोगेनैव भक्तिंप्राप्य । मामेव । एष्यति प्राप्स्यति । अत्रैवकारेणा धिकारिभ्यो गीतां कथयन्त्या स्तस्य फलांतरा नभिसंधिं जनयामीति तात्पर्यं द्योत्यते । असंशयः । अत्र संशयोनास्तीत्यर्थः ॥६८॥

मनुष्येषु - मनुष्याणांमध्ये । तस्मात - गीताव्याख्यातुः । अन्यः कश्चित । प्रियकृत्तमः । पूर्वमतिशयेनप्रियकारी । नाभूच्च । किंच । तस्मात । अन्यः । मे - मम । प्रियतरः । भुवि - लोके । नभविताच - नभविष्यतिच । 'प्रोवाचतां तत्त्वतो ब्रह्मविद्या' मिति विहितब्रह्मविद्योपदेशेन मद्भक्तविषये महोपकारकत्वात तत एव भक्तिं लब्ध्वा मुच्यतइति भावः ॥ ६९ ॥

एवमुपदेष्टुः फलमुक्त्वा ऽध्येतुश्श्रोतुश्च फलमाह द्वाभ्यां -

यः - पुमान् । धर्म्यं - धर्मादनपेतम् । इमं - वर्तमानम् । संवादं - युवयोरावयोः प्रश्नोत्तररूपं सन्दर्भम् । अध्येष्यते - अध्ययनमि

श्रद्धावाननसूयश्च शृणुयादपि योनरः ।
सोऽपि मुक्त श्शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्मणाम ॥ ७१ ॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनंजय ॥ ७१ ॥

वाकरिष्यते । गीताना मुपनिषत्सारत्वादध्येष्यत इत्युक्तिः । भारतस्य धृतराष्ट्रादीना मुत्पत्तेः पूर्वमेव भगवत्प्रसादात् स्फुरितत्वेन जनमेजय मुखेन मनुष्यलोक प्रवर्तन मभिप्रेत्याध्येष्यत इतीदानीमेवैतद्ग्रन्थाध्ययनस्य भविष्यत्त्वेन निर्देशः । तेन - पुरुषेण - तावन्मात्रेण । अहं - अवाप्तसमस्तकामः निखिल जगत्कारणभूतः । लक्ष्म्यादि परिजन परिचर्यमाण इत्यर्थः । ज्ञानयज्ञेन- 'ज्ञानयज्ञेनचाप्यन्ये यजन्तोमामुपासते' इत्युक्त भगवदनुसन्धानरूप भक्तियोगेन । इष्टः - आराधितः - स्याम् । इति । मे । मतिः - निश्चयः । 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवती' त्यध्ययनानुष्ठानयो स्समानफलत्वं श्रूयते । 'यो ऽश्वमेधेन यजते य उचैनमेवं वेद' ति ज्ञानानुष्ठानयोश्च समानफलत्वं श्रूयते । अतो गीताध्ययनतदर्थज्ञानाभ्यां गीताप्रतिपाद्यज्ञानयोगाराधनेनैव प्रसन्नो भवामीत्यर्थः ॥ ७० ॥

श्रद्धावान् - आस्तिक्यबुद्धिमान् । अनसूयश्च वक्तरिप्रतिपाद्येच दोषाविष्काररहितः । यः - नरः । शृणुयादपि - आचार्यमुखात्पाठश्रवणमात्रं कुर्यादपीत्यर्थः । सोऽपि । श्रवणमात्रकर्ता वर्णाश्रमविहितकर्मपरित्यागयपि । मुक्तः - भक्तिविरोधिपापैर्विमुक्तस्सन् । शुभान् - कल्याणान् । पुण्यकर्मणां - भगवदाराधनरूपपुण्यकर्मकृतां । लोकान् - समूहान् । प्राप्नुयात - गीताश्रवणजनितभगवदनुग्रहात् महात्मसहवासयोगोपदेशद्वारा मुक्तिं प्राप्नोतीत्यर्थः । ननु नरककल्पस्वर्गप्राप्नोति - प्रक्रमविरोधादिति ध्येयम् ॥ ७१ ॥

अथ विदितार्जुनाभिप्रायोऽपि भगवानादरेणाविस्मरणसिद्ध्यर्थमुपदेशसाफल्य मजानन्निव पृच्छति -

हेपार्थ । एकाग्रेण - सावधानेन । चेतसा- चित्तेन । त्वया । एतत् - मदुक्तमर्थजातं । श्रुतंकच्चित् - मदुपदेशेन ज्ञातं किमित्यर्थः । हेधनंजय ।

अर्जुन उवाच ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥

ते - तव । अज्ञानसम्मोहः - अज्ञानमूलको भ्रमः । प्रणष्टः कच्चित् । निश्शेषं निवृत्तः किमित्यर्थः । येन सर्वथा न योत्स्य इत्युक्तवानिति भावः ॥ ७२ ॥

अथार्जुनः स्वस्य कृतकृत्यतां गीताशास्त्रोपदेशफलसिद्धिं चोद्घाटयति -

हे अच्युत - आश्रितरक्षणाच्च्युतिरहित । मोहः - विपरीतज्ञानरूपः अनात्मनि प्रकृतावात्माभिमानरूपः भगवदात्मकस्य प्रपञ्चस्य (?) दनात्मकत्वाभिमानरूपः कर्मणो भगवदाराधनतया तत्प्राप्त्युपायभूतस्यासाधनत्वाभिमानरूपश्च सर्वो मोहः । त्वत्प्रसादात् - तव परमकारुणिकस्य - अनुग्रहात् । नष्टः - निवृत्तः । स्मृतिः - ज्ञातृत्वैकाकारतया स्वभावतः प्रकृतिविलक्षण प्रत्यगात्मस्वरूप निखिलजगदुदयलीलाशेषदोषप्रत्यनीक कल्याणैकस्वरूप स्वाभाविकानवधिकातिशयासंख्येय कल्याण गुणगण महार्णव सर्वशेषि परब्रह्म शब्दाभिधेयपुरुषोत्तमज्ञानरूपा परावरतत्त्वज्ञानाभ्यासपूर्विका अहरहरनुष्ठीयमान विहितकर्म निषिद्धपरिहार शमदमाद्यात्मगुणनिर्वर्त्यभक्तिरूपोपासन लभ्यो वेदान्तवेद्यः परमपुरुषो वासुदेवस्त्वमिति ज्ञानरूपा च भवदुपदेशजातबुद्धिरूपा स्मृतिः । मया । लब्धा - प्राप्ता । गतसन्देहः - निवृत्तसकलसंशयः । स्थितः । अस्मि । बन्धुस्नेहकारुण्यविवृद्ध विपरीत ज्ञानमूलविषादाद्विमुक्तोऽस्मीति यावत् । तव । वचनं - युद्धं कुर्विति वाक्यम् । करिष्ये - यथोपदिष्टं युद्धादिकं करिष्यामीत्यर्थः ॥ ७३ ॥

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जयेति पृच्छते धृतराष्ट्राय सञ्जयोवक्ति -

सञ्जय उवाच ।

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवाद मिम मश्रौष मद्भुतं रोमहर्षणम् ॥ ७४ ॥
व्यासप्रसादा च्छ्रुतवा नेतद्गुह्यमहं परम् ।
योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम् ॥ ७५ ॥
राजन् संस्मृत्य संस्मृत्य संवाद मिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

इतीमं - पूर्वोक्तरूपम् । अद्भुतं - अत्याश्चर्यम् । अतएव, रोम र्षणं - पुलकोद्गमकरम् । वासुदेवस्य - वसुदेवसूनोः कृष्णस्य । हात्मनः - महाबुद्धेः । पार्थस्य च - पृथायाः - तत्पितृष्वसुः कुन्त्याः त्रस्या र्जुनस्य च । संवादम् । अश्रौषम् - श्रुतवानस्मि ॥ ७४ ॥

ननु दूरस्थ स्त्वं कथं श्रुतवा नित्यत्राह -

व्यासप्रसादात् व्यासानुग्रहात् । तदनुग्रह लब्ध दिव्य चक्षु श्रोत्रादिति यावत् । योगं - योगाख्यम् । परं - उत्कृष्टम् । एतत् । गुह्यं - गुह्यतरम् । योगेश्वरात् - योगः - कल्याणयोगः, तेन ईश्वरात् - र्वनियन्तुः । साक्षात् । कथयतः - कृष्णात् । अव्यवधानेन तस्मिन् थयतीति यावत् । स्वयम् । श्रुतवान् - अहमेवाश्रौषमित्यर्थः ॥ ७५ ॥

दूरस्थोपि प्रत्यक्षं श्रुतवानस्मीति विस्मितस्सन्नाह द्वाभ्यां -

हेराजन् - धृतराष्ट्र । अद्भुतं । पुण्यं - ज्ञानयज्ञादिव त्परमपावनं । केशवार्जुनयोः । इमं । संवादं । मुहुर्मुहुः - पुनःपुनः । संस्मृत्यसंस्मृत्य - साक्षाद्भृशं स्मृत्वास्मृत्वा । हृष्यामिच - पुनःपुनः पुलकितसर्वांगो भवामिच ॥ ७६ ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनःपुनः ॥ ७७ ॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीभगवद्गीतायाम् अष्टादशोध्यायः ।

तत् - व्यासप्रसादात् साक्षात्कृतं । हरेः - कृष्णस्य । अत्यद्भुतं - अत्यन्ताश्चर्यं । रूपंच - विश्वरूपंच । संस्मृत्यसंस्मृत्य - अपूर्वत्वात् पुनःपुनस्स्मृत्वा स्मृत्वा । हे राजन् । मे । महान् । विस्मयः । भवति । विस्मयावेशो भवतीत्यर्थः । पुनःपुनः । हृष्यामिच - पुलकित गात्रोभवामिचेत्यर्थः ॥ ६७ ॥

किमत्रबहुनोक्तेन -

यत्र । योगेश्वरः - कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्याचेतनस्यच वस्तुनो ये ये योगाः - तेषामीश्वरः - स्वसंकल्पायत्तस्वेतर समस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः । कृष्णः - वसुदेवसूनुः । अस्ति । यत्र । धनुर्धरः । पार्थः - तत्पितृष्वसुःपुत्रस्तत्पदाम्बुजद्वयैकाश्रयोऽर्जुनश्च । अस्ति । तत्र । श्रीः । विजयः । भूतिः । नीतिश्च । इत्येताः । ध्रुवाः - निश्चलाः सन्ति । इति । मम - मतिः - निश्चयः । अस्ति ॥ ३८ ॥

इति श्रीभगवद्गीताभाष्यार्थसंग्रहतात्पर्यदीपे श्रीवरवर
मुनिविरचितायां बालबोधिन्यपराभिधानायां
गीतार्थसंग्रहदीपिकायां

अष्टादशोऽध्यायः ॥ १८ ॥

॥ शास्त्रंच समाप्तम् ॥